(2) Sometimes, even otherwise, he is over-elaborate without necessity of explanation in the context. These may be known as cases of highly scholarly but irrelevant interpretation. The long discussion on मङ्गल before 1.1 and the meaning of the words कुक्कुटा: and शिव-शिवा (4.16) can be cited as a few cases in the matter.

(3) Sometimes his etymologies are only imaginary, fantastic and wrong. To illustrate, in 4.39, the word निदारक is explained as "being devoid of off-spring and therefore capable of greater sex-enjoyment." Similarly fantastic are also the etymologies of काव्य अमृत (2.29 and अभिरामा (4.26).

A few cases of other imaginary and fantastic etymologies are those of—
शृगाल (४.१६); लाटा (४.१७); सीधुरस (४.२१); सारङ्गा (४.२७); उत्पल (४.५१); उद्धय: (४.१०४) and पर्वत (१.१०५).

(4) He has some fantastic notions about women and sex-life, perhaps because he is a Saṁnyāsi, though he sincerely feels that he is right. This can be illustrated thus—

(i) Almost invariably he explains the word स्त्री as नितम्बिनी.

(ii) He states that a woman having no progeny is capable of greater sex-enjoyment.

(5) At times, though rare, he quotes, rather carelessly as in the Vṛtti on 4.149 तथा चावादि माघसर्वकषावृत्तौ. But the question is—where?

However, the author's overmuch love for grammar, his fantastic etymologies at places and his lack of proper care sometimes in giving his Vṛtti in the right proportion, do not in any way minimise the scholarship and value of the work. It can be classified as a very important Vṛtti, not only in Jain works on poetics, but also in the wider world of Sanskrit काव्यमीमांसा.

---

**Corrections-Introduction**

Page 2, line 6 read 1681 in place of 1981

Page 3, line 2 after No. add 2079

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# Abbreviations

**Manuscripts**

पा. Hemacandra Jain Bhandar, Patan.

पु. Bhandarkar Oriental Institute, Pune.

व. Oriental Institute, Vadodara.

ला. L. D. Institute of Indology, Ahmedabad.

**Other Works**

| | | |
|---|---|---|
| अ.चि. | अभिधानचिन्तामणिः | हेमचन्द्र |
| अ.म. | अलङ्कारमहोदधिः | नरेन्द्रप्रभसूरि |
| अ.श. | अमरुशतकम् | अमरु |
| अ.शे. | अलङ्कारशेखरः | केशवमिश्र |
| अ.स. | अलङ्कारसर्वस्वम् | रुय्यक |
| का.क.वृ. | काव्यकल्पलतावृत्तिः | अमरचन्द्रयति |
| का.प्र. | काव्यप्रकाशः | मम्मट |
| का.द. | काव्यादर्शः | दण्डी |
| का.शा. | काव्यानुशासनम् | हेमचन्द्र |
| का.भा. | काव्यालङ्कारः | भामह |
| का.रु. | काव्यालङ्कारः | रुद्रटः |
| का.सू.वृ. | काव्यालङ्कारसूत्रवृत्तिः | वामन |
| गी.गो. | गीतगोविन्दम् | जयदेव |
| चि.मी. | चित्रमीमांसा | अप्पय्यदीक्षित |
| जै.व्या. | जैनेन्द्रव्याकरणम् | देवनन्दिमुनि |
| दश. | दशरूपकम् | धनञ्जय |
| दे.ना. | देशीनाममाला | हेमचन्द्र |
| ध्व. | ध्वन्यालोकः | आनन्दवर्धन |
| ना.शा. | नाट्यशास्त्रम् | भरत |
| नी.श. | नीतिशतकम् | भर्तृहरि |
| ने.नि. | नेमिनिर्वाणम् | वाग्भट |
| नै. | नैषधीयम् | श्रीहर्ष |

Jain Education International For Private & Personal Use Only www.jainelibrary.org

| | | |
|---|---|---|
| पा.अ. | अष्टाध्यायी | पाणिनि |
| पा.उ. | उणादिसूत्राणि | ,, |
| प्र.अ.प्र. | प्रतापरुद्रीय-अलङ्कारप्रकरणम् | वैद्यनाथ |
| भा.प्र. | भावप्रकाशन | शारदातनय |
| म. | शब्दानुशासनम् | मलयगिरि |
| मे.घ. | मेघदूतम् | कालिदास |
| र.म. | रसमञ्जरी | भानुदत्त |
| वै.श. | वैराग्यशतकम् | भर्तृहरि |
| वृ.र. | वृत्तरत्नाकरः | भट्टकेदार |
| शृ.ति. | शृङ्गारतिलकम् | रुद्रभट्ट |
| शृ.श. | शृङ्गारशतकम् | भर्तृहरि |
| शा.व्या. | शाकटायनव्याकरणम् | शाकटायन |
| शिशु. | शिशुपालवधम् | माघ |
| स.क. | सरस्वतीकण्ठाभरणम् | भोज |
| सा.व्या. | सारस्वतव्याकरणम् | अनुभूतिस्वरूपाचार्य |
| सु. | सुभाषितावलिः | |
| हे.उ. | उणादिसूत्राणि | हेमचन्द्र |
| हे प्रा. | शब्दानुशासनम्-प्राकृताध्यायः | ,, |
| हे.यो.शा. | योगशास्त्रम् | ,, |
| हे.व्या. | शब्दानुशासनम्-संस्कृत | ,, |

⊗

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्री

## वाग्भटालङ्कारः

# ज्ञानप्रमोदिकावृत्तिसमेतः

श्रीनाभेयाय नमः

यस्यानेकगुणास्पदस्य सततं नामस्मृतेर्भावतो
लभ्यन्ते भविकैः शिवैकरसिकैः चित्रेप्सिताः सम्पदः ।
नाभिक्ष्मापतिनन्दनं वृषधरं श्रीमद्युगादिप्रभुं
तं वन्दे निखिलान्तरायतिमिराहर्बान्धवं स्वर्णभम् ॥१॥

श्रीवर्धमानं जगतः पतिवरं[1] सिद्धार्थभूपान्वयवार्द्धिकौस्तुभम् ।
नत्वा जिनं सौवगुरुक्रमाम्बुजं वागीश्वरीं चापि मतिप्रदायिनीम् ॥२॥

यद्वाग्भटाह्वः कविभूपतिर्व्यधात् श्रीवाग्भटालङ्कृतिशास्त्रमप्यहम् ।
तस्यैव वृत्तिं विदधे समासतः स्वस्य स्मृतेर्बालविबोधनाय च ॥३॥

इह खलु ग्रन्थारम्भे वाग्भटः श्रीवाहडदेवापरनामा कविराजोऽल्पधियामवबोधाय रुद्रटालङ्कारादिशास्त्रसंक्षेपं समुद्धर्तुकामः शिष्टसमयपरिपालनाय विशिष्टशिष्टाचारानुमितवेदबोधितोपायताकं प्रारिप्सितप्रतिबन्धकप्रत्यूहव्यूहविघातकं समुचितेष्टदेवतानमस्कारलक्षणं प्रेक्षावत्प्रवृत्त्यर्थं चाभिधेयादित्रयं व्याचिख्यासुर्भावमङ्गलमाह श्रियं दिशत्विति । ननु नमस्कारादिमङ्गलाचरणं फलमानाभावादनुचितमिति चेन्न । फलं तावदारब्धकर्मविषयकप्रत्यूहव्यूहापोह एव वर्तते । न त्वभिमतकर्मसमाप्तिस्तत्र, मङ्गलस्योभयतो व्यभिचारात् । तस्मिन्सत्यपि कादम्बर्यादौ तदभावात्तद्विधानमन्तरेणापि प्रमत्तनास्तिकानुष्ठितकर्मसमाप्तेः प्रत्यूहापोहहेतुः । नैवम् । यावन्मङ्गलं तावत्प्रत्यूहाभावाभ्युपगमात्, प्रत्यूहापोहाभिलाषुकाणां तादृशशिष्टाचारानुमितवेदेन प्रत्यूहापोहकामो नमस्कारादिरूपं मङ्गलमाचरेदित्येवंरूपेण प्रत्यूहाभावामङ्गलयोः कार्यकारणभावावगमेन व्यभिचाराभावात् । आरब्धकर्मसमाप्तिस्तु विघ्नलक्षणप्रतिबन्धकध्वंसे सति लोकावगतस्वकारणादेव, यथा कारीरीक्रतुनावग्रहविनाशे वृष्टिः स्वहेतोरेव भवति । तद्वद्यत्र क्वचन कृतेऽपि मङ्गले समाप्त्यभावः तत्र प्राचीनविघ्नभूयस्त्वमङ्गलानन्तरोत्पन्नविघ्नान्तरलोकावगतकारणाभावलक्षणहेतुत्रयसद्भावादिति मन्तव्यम् । यत्रापि च नमस्कारव्यतिरेकेण निर्विघ्नाभिमतकर्मसमाप्तिर्दृश्यते, तत्र मानसप्रणिधानरूपोऽयमुपपद्यत एवेति । चिन्तामणौ तु विघ्नसंसर्गाभावश्च समाप्तिहेतुः । क्वचित् स्वतःसिद्धः, क्वचिन्मङ्गलसाध्य इत्याद्युदाहृतवन्तो गङ्गेशचरणाः । अत एव मङ्गलव्यतिरेकेणापि प्रमत्तानुष्ठितकर्मसमाप्तिश्च । जन्मान्तरानुवर्तमान-

---

1 पर-पा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

विघ्नात्यन्ताभावादिति प्रयोगस्तु मङ्गलं विघ्नध्वंसद्वारकं तदितरद्वारकत्वे ऽसति । कालान्तरभाविफल-जनकत्वादित्यनुमानम् । तथा मङ्गलं समाप्तिफलकं, तत्कामैः शिष्टैः क्रियमाणत्वात्, तत्फलकलौकिक-धर्मवत्[2] इति अपरमनुमान. इत्याद्यनेकयुक्तितः फलमनयोर्विद्यमानत्वादुचितमेव मङ्गलाचरणमिति विज्ञाय 'आशीर्नमस्क्रियावस्तुनिर्देशो वापि तन्मुखम्' इत्याशीराद्यन्यतमस्य प्रबन्धमुखलक्षणत्वादलङ्काररूपं वस्तु आदौ श्रीरवपूर्वकं निर्दिशंश्च निर्विघ्नमारब्धकर्मसमाप्तिकामः तन्मङ्गलमाचरितवान् ग्रन्थकारः ।

**श्रियं दिशतु वो देवः श्रीनाभेयजिनः सदा ।**
**मोक्षमार्गं सतां ब्रूते यदागमपदावली ॥१॥**

व्याख्या । श्रीनाभेयजिनो वो युष्मभ्यं श्रियं दिशतु इत्यन्वय । इह यत्तदोर्नित्याभिसम्बन्धात् पुरतः तुर्यांह्रिस्थितयदागम इत्यत्र वक्ष्यमाण'यत्' शब्देनानभिहितस्यापि 'तत्' शब्दस्य ग्रहणात्, स इति लभ्यते । ततोऽयमर्थः । सः श्रीनाभेयजिनो वः, श्रीयते आश्रीयते सर्वैरिति श्रीः, तां श्रियं सातिशयलक्ष्मीं त्रिवर्गसम्पत्तिं, भारतीं शोभां वा । तथा चोक्तं विश्वप्रकाशे—

श्रीर्वेषरचनाशोभाभारतीसरलद्रुमे । लक्ष्म्यां त्रिवर्गसम्पत्तौ वेषोपकरणे मतौ ॥

इति । दिशतु ददातु इत्यर्थः । दिशतु इति दिशेरतिसर्जनार्थकात् कर्तरि लोटः प्रथमपुरुषैकवचनम् । इत्थमन्यस्मिन्नपि स्थले यथासम्भवं युक्तिबलादन्यशब्दादेरध्याहारः कार्यः । नाभेरपत्यं पुमान्नाभेयः । इतश्चानिञः इत्येयणि । श्रिया अष्टमहाप्रातिहार्यादिलक्ष्म्या युक्तो नाभेयः श्रीनाभेयजिनः ।[3] किंलक्षणः श्रीनाभेयजिनः? देवः । दीव्यति दिव्यकेवलज्ञानश्रिया सातिशयार्चिः प्रकरतिरस्कृतनिखिल-रोचिः । प्रस्तरत्वात् दीव्यत इति देवः । 'एचादित्वादच्' [स. ३.१०] । स क इत्याह यस्य तीर्थं करस्य आगमपदानां समयोक्तीनां, आवली राजिः, यदागमपदावली । सतां सत्पुरुषाणां, भवाटवी-पातरक्षणान्मोक्षस्य मार्गः, तथा तं सम्यगवबोधश्रद्धानचरणाह्वरत्नत्रयात्मकसिद्धेरध्वानम्, ब्रूते व्यक्तं वक्ति । यथाऽन्यस्यापि कस्यापि कस्यचन आगमस्य आगमनस्य, पदानि चरणन्यासप्रति-बिम्बानि, तेषां आलिः निरीक्षिता सती सतां वर्त्म प्रकटयति इत्युक्तिलेशः । एतेन परमेश्वरस्य श्रीनाभेय १, जिन २, देव ३, मोक्ष ४ इत्याद्युत्तरार्धलक्षणपदसमुदायोक्तातिशयाधिकारचतुष्केण पूर्वव्याख्यातशब्दार्थानुसारेण पूजापायापगमज्ञानवचनाह्वयातिशयचतुष्टयं मूलातिशयत्वेन ज्ञापित-मित्याशयः । यथा ग्रन्थादौ त्रिप्रकाराणां देवतानां स्तुतिः संबोभोति । तथा चाह-समुचितायाः १, इष्टायाः २, समुचितेष्टायाः ३ च देवताया इति । तासां देवतानां स्तुतयो यथा राजनीतिकाम-शास्त्र१ रघुवंश२, योगशास्त्रारम्भेषु३ः, नृपकन्दर्पादि१शंभूमा २ योगिनाथ ३महावीरलक्षणानां यथाक्रमं देवतानां स्तुतयः सूचिताः । इह पुनः ग्रन्थारम्भे वाग्भटो विद्वच्छिरोमणिः श्रीनाभेयस्तुत्या समुचितेष्ट-देवतास्तुतिं निर्मिमीते स्म । अथ टीकान्तरं चानुसृत्य अस्य व्याख्यानान्तरं प्रोच्यते । श्रियोऽष्टमहा-प्रातिहार्यो लक्ष्म्योः चतुस्त्रिंशदतिशयरूपलक्ष्म्या वा । इनः स्वामी श्रीनः आर्हन्त्यलक्ष्मीनायकः 'ञिभीभये' इत्यतो यकि, भीयते इति भेयं, भावे यः एरचात इति यः । भय मत्यर्थः । न विद्यते भेयं, भवभ्रमोद्भवमयं यस्य सः, अभेयः । जिन इत्युक्तेऽवधिजिनः श्रुतजिनश्चाप्युच्यते । श्रुत-जिनस्तु श्रुतकेवली कथ्यते । तयोः तस्य वा प्रायः रागादिभिः जयात्तन्निराकरणार्थमभेय इति ।

2 कर्मवत्-ब., पा.

3 अत्र ब. मध्ये विशेषं-मयूरव्यंसकादित्वान्मध्यमपदलोपी समासः । रागद्वेषाद्यन्तरङ्गातिवर्गाज्जेतृत्वाज्जिनः । श्रीनाभेयो योऽसौ जिनः श्रीनाभेयजिनः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अभेयश्चासौ जिनेश्चेति कर्मधारयेऽभेयजिन इत्येतादृशश्च सामान्यकेवली पठ्यते । तस्य संसृति-भ्रान्तिभयापोहात् तन्निवृत्त्यर्थं श्रीनः इति । श्रीनश्चासावभेयजिनश्च श्रीनाभेय इत्येवंलक्षणोऽर्हन्नेव भवतीत्युत्सर्गतोऽर्हतो नमस्कृतिर्विहिता भवति । अथवा काव्यशास्त्रस्य सर्वेषामपि सामान्योपयोगित्वात् वैष्णवमतेनापि नमस्कारो लभ्यते, व्याख्यान्तरतो यथा-श्रीः कृष्णवधूः । नाभेरुद्भवत्वात् ब्रह्मापि नाभेयोऽभिधीयते । विष्णोर्नाभिस्थपद्मे वेधसो निवास इति लोकवाक्यम् । तथा चाहुर्नाभिभूः पद्मभूरित्याद्यभिधानानि । जिनः पीताम्बरोऽप्युच्यते । तथा चोक्तं—"पीताम्बरो मार्जजिनः कुमोदक" [२.१३०] इत्याद्यभिधानचिन्तामणौ । ततोऽयमर्थः-श्रीश्च नाभेयश्च श्रीनाभेयः, तदुपलक्षितो जिनः । सः श्रियं शोभां, दिशतु । वेति निपातपदमवधारणे पूरणे च । तदुक्तं-"निपाताश्चोपसर्गाश्च धातवश्चेति ते त्रयः । अनेकार्थाः स्मृताः सर्वे, पाठस्तेषां निदर्शनात् ॥" इति मिश्रः । कथंभूतः श्रीनाभेयजिनः ? उ देवः । उ शब्दः ईश्वरार्थकः । उक्तं च काव्यकल्पलतावृत्तौ "उः ईश्वरः इत्येकाक्षरनाममालायां च ॥" उः गिरीशः, स एवार्चनीयत्वाद् देवो यस्य स, उ देवः । तथा चोक्तं—

"सुखसन्तानसिद्ध्यर्थं नत्वा ब्रह्माच्युतार्चितम् । गौरीविनायकोपेतं शङ्करं लोकशङ्करम् ॥ [वृ र, १ १]

इति केदारमिश्रः । इत्याद्यश्लोकतात्पर्यार्थः ॥१॥

नन्वभिधेयादिशून्यत्वात् काकदन्तपरीक्षादिवदिदं ग्रन्थकरणमनुपपन्नमिति चेन्न, तत्सद्भावात् । तथा ह्यस्मिन् शास्त्रेऽलङ्काररसादिवक्तव्यतारूपमभिधेयम् । तत्परिज्ञानं श्रोतॄणामनन्तरप्रयोजनं कर्तुश्च तदेव सत्त्वानुग्रहः । परम्परप्रयोजनं तूभयोरपि परमपदावाप्तिः । सम्बन्धस्तूपायोपेयतावलक्षणः, तत्र वचनरूपापन्नं शास्त्रं उपायः, तत्परिज्ञानमुपेयम् । तदुक्तं—

ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते । शास्त्रादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥

इति न्यायेन श्रोतॄणां सुखप्रवृत्तयेऽस्य ग्रन्थस्य तद्वत्त्वम् । अमुमेवार्थं व्यक्तीकर्तुमभिधास्यमानार्थ-परिच्छेदपरिपाट्युद्देशसम्बद्धं काव्यकृत्यं विवृण्वन्नाह—

**साधुशब्दार्थसन्दर्भं गुणालङ्कारभूषितम् ।**
**स्फुटरीतिरसोपेतं काव्यं कुर्वीत कीर्तये ॥२॥**

काव्यं कुर्वीत इति इह कर्मक्रियापदान्वयानुरोधेन विनेय इत्यादि गम्यमानकर्तृ सत्त्वात् ततो विनेयः कर्ता । एतादृशं काव्यं, कवेः कर्म काव्यं, एतद्राजादिते त यणि प्रत्यये साधुः । वृत्तं कीर्त्त(र्त)ये यशसे कुर्वीत निर्मिमीते । कुर्वीतेत्यत्र फलवत्कर्त्रात्मनेपदकरणात् कीर्त्त(र्त)ये इत्यनेन चात्मगामि फलं निर्दिष्टम् । किंलक्षणं काव्यम् ? साधुशब्दार्थसन्दर्भं कथयिष्यमाणानर्थकादिदोषापेतः शब्दः साधुर्भण्यते । अर्थो ह्यभिधास्यमानदेशविरुद्धादिदूषणत्यक्तः साधुश्च । ततः साधू निर्दोषौ शब्दार्थौ यत्र, सन्दर्भे स साधुशब्दार्थः । साधुः प्रधानः शब्दार्थसन्दर्भो रचना यस्मिन् तत्तथा । यदाह वामनः—

"अदोषौ सगुणौ सालङ्कारौ शब्दार्थौ काव्यम् ।"[4] [का शा १.११]

तयोस्तच्छरीरत्वादिति भावः । 'साधुशब्दार्थे' इत्येतेन तु शब्दार्थाभिधायको द्वितीयः परिच्छेदः स्थापितः । पुनः कथंभूतम् ? गुणालङ्कारभूषितम् । गुण्यन्ते अभ्यस्यन्ते श्रेयोऽर्थिभिः इति गुणाः,

4 इदं वस्तुतस्तु काव्यानुशासने श्रीहेमचन्द्रोक्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

औदार्यादयो मैत्रीक्षमोपशमरूपादयो वा । यदुक्तं विश्वप्रकाशे-'गुणो प्रधाने रूपादौ मौर्व्यां सूदे वृकोदरे । संवेसत्त्वादिसंस्थादिविद्यादिहरितादिषु' इति । अलङ्क्रियत एभिरित्यलङ्काराः । शब्दालङ्काराश्चित्रवक्रोक्त्यादयोऽर्थालङ्काराश्च जात्युपमादयः । ततश्च द्वन्द्वे, गुणालङ्काराश्च गुणालङ्काराः, तैर्भूषितं शोभितमेतेन । तार्तीयीको गुणपरिच्छेदस्तुर्यस्त्वलङ्कारपरिच्छेदः प्रज्ञापितः । पुनः कीदृशम् ? स्फुटरीतिरसोपेतम् । स्फुटा वृत्तानुकूल्येन स्पष्टायाः, रीयते यात्याभिरिति रीतयो गौडीयाद्याः पदग्रंथनविशेषाः । सामाजिकैः रस्यन्ते चर्व्यन्ते इति रसाः । रसन्ति रसेन युज्यन्ते इति वा । 'एचाद्यच्' । शृङ्गारप्रभृतयोऽभिधास्यमानाः । ततः स्फुटरीतयश्च रसाश्च स्फुटरीतिरसाः, तैः उपेतं युक्तम् । एतेन तुरीयपरिच्छेदे रीतिकथनं प्रख्यापितं, पञ्चमस्तु रसपरिच्छेदो ज्ञापितः । प्रथमः पुनरयं शिक्षापरिच्छेदः । काव्यरसे च सम्यक्कवित्वलब्धिस्फूर्तिमत्कर्तृकस्य धनाप्त्याद्यनेकगुणत्वेऽपि कीर्तेरेवादानं मुख्यत्वख्यापनार्थं, यद्धि काव्यं द्रविणं व्यवहृतिबोधनं, शिवेतरक्षपणं, दीर्घदर्शिनामाह्लादनं च वितनोति । तदेव च कवित्वं कान्तासम्मितभूतं कान्तावत्सरसताप्रापणेन सम्मुखीकृत्य रामचन्द्रवत् प्रवर्तनीयं न दशास्य इव इत्याद्युपदिष्टिं च निर्मीते । तथा चोक्तं काव्यप्रकाशे-

"काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये । सद्यः परनिवृ(र्वृ)तये कान्तासम्मिततयोपदेशयुजे ॥१॥ [का.प्र. १-२]

शास्त्रं हि त्रिधा, प्रभुसम्मितं, सुहृत्सम्मितं कान्तासम्मितं चेति । तत्राद्यं शब्दश्रेष्ठं वेदादि १ द्वितीयमर्थैदंपर्यवत्पुराणादिः २, तृतीयं चोक्तलक्षणं प्रधानकाव्यादिः ३ । एतद्विलक्षणं काव्यं तु विपरीतफलमेव स्यादित्यर्थः ॥२॥

अथ कवित्वस्योत्पादनाय सामग्रीमभिधत्ते—

**प्रतिभा कारणं तस्य व्युत्पत्तिस्तु विभूषणम् ।**
**भृशोत्पत्तिकृदभ्यास इत्याद्यकविसंकथा ॥३॥**

आद्यकवीनां पुरातनकवित्वविधातॄणां सन्मुखं संकथनं संकथा, 'भीषिभूषीत्यङ्' [हे. व्या. ५.३ १०९] संकथा उपदेशो, वार्ता शिक्षा वा इति विद्यते । इतीति किम् ? सर्वं हि वाक्यं सावधारणमामनन्ति इति न्यायात् । प्रतिभानं प्रतिभा, सैव तस्य काव्यस्य कारणं बीजं भवति । यदुक्तं ज्ञानबीजभूतः संस्कारविशेषः प्रतिभेति काव्यप्रकाशे ।[5] यद्वा नूतननूतनज्ञप्तिप्रकारभासिनी बुद्धिः प्रतिभेति । तदुक्तं-"बुद्धिर्नवनवोल्लेखशालिनि प्रतिभा मता ।"[6] [भट्टतोतः] ननु कवित्वनिर्मितौ प्रतिभैव योनिश्चेत्, तर्हि व्युत्पत्तिर्भूरिग्रन्थपरिज्ञानं किं घटयति ? प्रोच्यते तस्य वृत्तस्य प्रतिभयोत्पाद्यमानस्य तु पुनः, व्युत्पादनं व्युत्पत्तिः, विभूषणं विशिष्टालङ्कारः स्यात् । अभ्यसनं अभ्यासः अभ्यासीदति वा । अन्यतो पिचे तिङः । भूयोभूयस्तन्निर्माणरूपः तस्य काव्यस्य, भृशं अत्यर्थं, उत्पत्तिः झटित्युत्पादनं करोतीति भृशोत्पत्तिकृत् स्यात् । अभ्यसने ह्यन्तःकरणदार्ढ्यादियोगादविलम्बेनैव वृत्तनिर्माणात् । तथोक्तं हेमचन्द्राचार्यवर्यैः—

आगमेनानुमानेन ध्यानाभ्यासरसेन च । त्रिधा प्रकल्पयन् प्रज्ञां लभ्यते योगमुत्तमम् ॥१॥[7]

इत्यनेन प्रतिभाव्युत्पत्त्यभ्यासा त्रयोऽप्यात्मीयात्मीयविषयपृथक्त्वाभिधायित्वेनोक्ताः ॥३॥

5 शक्तिः कवित्वबीजरूपः संस्कारविशेषः । 6 मूले तु-'प्रज्ञा नवनव......' इति ।

7 पातञ्जलयोगसूत्रे व्यासभाष्ये समाधिपादे सूत्रमीमांसायामुद्धृतमिदम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमोपदिष्टां प्रतिभां व्याचष्टे—

प्रसन्नपदनव्यार्थयुक्त्युद्बोधविधायिनि ।
स्फुरन्ती सत्कवेर्बुद्धिः प्रतिभा सर्वतोमुखी ॥४॥

एवंविधसत्कवेः-संश्चासौ कविश्च सत्कविः, तस्य, श्रेष्ठकवित्वकर्तुः, बुद्ध्यतेयऽनया सा बुद्धिः, प्रतिभेत्यभिधीयते । कथंभूता प्रतिभा ? प्रसन्नं प्रसन्नानि कोमलामलप्रस्फुटाक्षरत्वेन सुललितानि, पद्यते गम्यतेऽर्थो यैः तानि पदानि । वर्षादित्वादल्, [हे. व्या. ५.३.२९ वर्षादयः क्लीबे] । नव्या नूतना, अर्यन्ते अधिगम्यन्ते अमी अर्थाः निर्णेयार्थाः । ऊषिकुषिगार्तिभ्यः स्थः इति थः । अर्थ्यन्ते इति वा । ततः प्रसन्नपदानि च नव्यार्थाश्च प्रसन्नपदनव्यार्थास्तेषां, युज्यंत आभिस्ताः युक्तयः, तासामुद्बोधः । उत् प्राबल्येन बोधो ज्ञानं, तस्य विधायिनी निर्मात्री । यद्वा प्रसीदन्ति स्म प्रसन्नानि असंकुलानि यानि पदानि । नव्याश्च या अर्थयुक्तयः, तासां उद्बोधो विकाशः(सः), तं विदधाति सृजतीत्येवंशीला । सा तथा । पुनः किंविशिष्टा ? स्फुरन्ती अस्खलद्रूपा । सर्वतो मुखमारम्भो यस्याः सा, तथा । सर्वांगीणेत्यैदम्पर्यम् ॥४॥

अव्यवहितोक्तां व्युत्पत्तिं निरूपयति—

शब्दधर्मार्थकामादिशास्त्रेष्वाम्नायपूर्विका ।
प्रतिपत्तिरसामान्या व्युत्पत्तिरभिधीयते ॥५॥

द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते इति, शास्त्रशब्दस्य प्रत्येकमभिसम्बन्धात् । शपति कूटोच्चारकं शब्दः । शाशपिमनीतिदः [हे.उ. २३७] शब्द्यतेवा(र्वा ?) । शिष्यत इति शास्त्रं शासनाद्वा । शब्दप्रतिपादकं शब्दशास्त्रं व्याकरणम् । धरति स्वैरतां धर्मः, अर्तीरीतिमः । धरति स्थापयति सुगताविति वा । तथोक्तं हेमचन्द्रसूरिपादैर्योगशास्त्रे-दुर्गतिं प्रपतत्प्राणि-धारणाद्धर्म उच्यते [हे. यो. २.११] । ततो धर्मप्रतिपादकं धर्मशास्त्रं अर्हत्प्रज्ञप्तसमयः । अर्थशास्त्रं चाणक्योदितनृपनीतिग्रन्थः । कामशास्त्रं काम्यत इति कामो अनङ्गः, तत्प्रधानं शास्त्रं कामशास्त्रं, कोकवात्स्यायनाद्यम् । आदीयते प्रथमं गृह्यते इत्यादिः पुंसि उपसर्गादः । किं ततः च ? आदिशब्दान्नामकोषच्छन्दोऽलंकृतिहयद्विपविशिष्टामणिपरीक्षाप्रमुखशास्त्राणि, सौगतादिदृष्टयाऽभिधायकशास्त्राणि चादीयन्ते । ततः शब्देत्यादिना द्वन्द्वे विहिते, शब्दधर्मार्थकामाः, ते आदौ येषां तानि शब्दधर्मार्थकामादीनि । शब्दधर्मार्थकामादीनि च तानि शास्त्राणि च । तथा तेषु समस्तेषु, आम्नायो गुर्वाम्नायो, पूर्वो यस्याः सा, आम्नायपूर्वा । सैवाम्नायपूर्विका, 'स्वार्थे' [हे. व्या. ४.४.६०] के । असामान्या प्रतिपत्तिः विशेषपरिज्ञानं व्युत्पत्तिर्भण्यते । व्याकरणानभिज्ञो हि वृत्तो क्रियादिपदं विरचय्य निर्णीतिमान्न भवति । धर्मशास्त्राद्यकुशलस्तु तत्तत्प्रबन्धेषु वृषार्थाऽनङ्गापवर्गादिकार्यवृन्द-मुदाहर्तुमक्षमः कथं भवति कविरिति ।

पश्चादुद्दिष्टमभ्यासं विवृणुते—

अनारतं गुरूपान्ते यः काव्ये रचनादरः ।
तमभ्यासं विदुस्तस्य क्रमः कोऽप्युपदिश्यते ॥६॥

योऽनारतं नास्त्यारतं विरामार्थकं यस्मिंस्तत् नञ्समासेऽनारतं सततम् । अन्तं समीपमुपगतं उपान्तं, गुरूणामुपान्तं, तस्मिन्, गुरुसन्निकर्षे । काव्ये कवित्वविषये रचनायाः गुम्फस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

आदरो रचनादरो भवति, तमभ्यासं विदुः निर्णीतत्वेनावगच्छन्ति । कवय इत्यध्याहार्यम् । अनेन कर्हिचित् सकृत् योऽभ्यासोऽभ्यसनमात्रं व्यधायि, सोऽभ्यास एव नोद्यत[8] इति सूचितम् । तस्य प्रथमोदितस्याभ्यासस्य, कोऽपि कश्चिदपि, न अखिलः इत्यभिप्रायः क्रमप्रकारः उपदिश्यते प्रणीयते ।।८६।।

तमेव व्यक्तीकरोति—

बिभ्रत्या बन्धचारुत्वं पदावल्यार्थशून्यया ।
वशीकुर्वीत काव्याय छन्दांसि निखिलान्यपि ।।७।।

विनेयः पदावल्या पदानामावली लेखा, तथाऽष्टगणरूपया, निखिलानि समस्तान्यपि छन्दांसि छाद्यत एभिः प्रस्ताराद्भूरिति छन्दांसि । छादेर्नश्च दात्पूर्वः इति छादयतेरसुन् दात्पूर्वो नकारश्च । अनुपधत्वात् ह्रस्वत्वम् । श्रीशालिनीं मालिन्यादीनि वशीकुर्वीतानायत्तान्यपि स्वायत्तानि विदधीत । कस्मै ? काव्याय, वृत्तनिर्मापणार्थम् । किंलक्षणया पदावल्या ? अर्थेनाभिधेयेन शून्या अर्थशून्या, तयापीत्यर्थः । किं कुर्वत्या ? बन्धचारुत्वं बिभ्रत्या । बन्धस्य ग्रन्थनस्य चारुत्वं साम्त्वसोमालपद-पदवीयोगेन चेतोहृत्त्वं बिभ्रत्या दधत्या । यादृक्षो ह्यादितोऽभ्यासस्तादृगेवाग्रे कार्यसिद्धिरिति रमणीय-वृत्तं कर्तुकामैः अभ्यासोऽपि मार्दवलालित्योपेतपदवृन्दसुस्वादुत्वान्वित एव कर्तव्य । इह तु उदाहरणम्-

हेलादोला पत्रमाला विशाला श्रद्धा मेधा सिद्धिवृद्धा समृद्धा ।
ज्ञेया हेया नामधेयावसेया प्रज्ञा संज्ञोपज्ञया धर्मरूढ ।।१।। [ ]

"शालिन्ययुक्ता स्तौतगौगोऽिधलोकैरिति" [वृ.र. ३.३४] लक्षणयुक्तशालिन्यभ्यासोऽर्थसम्पर्करहितयापि पदपंक्त्या कर्तव्यश्च । इत्थमखिलान्यपि छन्दांसि अर्थयुक्तैरर्थवियुक्तैर्वा शब्दसन्दर्भैरभ्यसनीया-नीति ।।७।।

यादृशं बन्धचारुत्वं यया भवति तथा चाह—

पश्चाद्गुरुत्वं संयोगाद्विसर्गाणामलोपनम् ।
विसन्धिवर्जनं चेति बन्धचारुत्वहेतवः ।।८।।

अर्थपदश्रेण्या इति बन्धचारुत्वहेतवो भवन्ति । इतीति किम् ? संयोगात्पुरःस्थितसंयुक्ताक्षरबलात् । पश्चादिति दिग्देशकालार्थस्य सप्तमीपञ्चमीप्रथमां तस्यावरशब्दस्यातिः प्रत्यय, पश्चभावश्च सद्य आदित्वेन निपात्यते, अवरस्यां दिशि स्थितस्य पश्चाद्वर्णस्य गुरुत्वं विधीयते । तथा च सति बन्धस्य स्थैर्यं भवति । तथा विसर्गाणामलोपनं न लोपः कर्तव्यः । च पुनर्विसन्धिवर्जनं विसन्धीति विनाऽत्र विरुद्धभावाद्यल्लक्षणप्रकर्षो द्योत्यते । ततो "विस्वरोऽयं गायनो विमदो यतिरेष चे" तिवदिहापि विरुद्धो विरूपो वा सन्धिः विसन्धिः, यद्वा विगतः सन्धिर्विसन्धिरिति विरूपसन्धेरसन्धेस्त्वपोहः कर्तव्य । एतादृशाश्चापरेऽपि स्पष्टप्रमुखशब्दापोहनाद्यो रचनामनोरमताहेतवो भवन्तीति प्रकारार्थः सूचितः ।।८।।

इहान्वयोदाहरणं प्रदर्श्यते-रसैः कथा यस्य सुधावधोरणी नलः स भूजानिरभूद्गुणाद्भुतः । सुवर्णदण्डैकसितातपत्रितः ज्वलत्प्रतापावलिकीर्तिमण्डलः ।।१।। [नै. १.२]

8 नोद्यते–प्रा.

व्यतिरेकोदाहरणं तु ग्रन्थकृत्स्वयमेवोपदिशति —

शिते कृपाणे विधृते त्वया घोरे रणे कृते ।
त्रधीश, क्षितिपा भीत्या वन एव गता जवात् ।९॥

नृणामधीशो त्रधीशस्तस्य सम्बोधने हे त्रधीश. हे नरनायक; क्षितिं पृथ्वीं पान्ति रक्षन्ति इति क्षितिपाः, अर्थादरातिभूपाः । भीत्या भयेन भयाद्वा, जवात् वेगात् वन एव कानन एव गता । न क्षणमप्याहवे तिष्ठन्ति स्म इत्याकूतं । एतेन साध्वसातिरेकयं प्रख्यापितम् । क्व सति? त्वया सिते तीक्ष्णे; कृपाणे कल्पते कृपाणः, कृपीविषीत्याणक्, [ हे. ठ्या ७.२.२७ कृष्यादिभ्यो वलच् ] तस्मिन्नसौ । विधृते गृहीते सति । पुनः क्व सति? रणन्ति दुन्दुभयोऽत्र रणः, तस्मिन् रणे समरे; घुरत्यस्माद् घोरं, 'पुन्नाम्नीति' [ हे. ठ्या ५.३ १०३ ] बाहुलकाद् घ । तस्मिन् घोरे भैरवे, कृते विहिते सति । इह 'विधृते त्वये' तिप्रतिभूके संयोगबलादाद्यस्य गुरुत्वं न विद्यते, किन्तु नैसर्गिकं विभक्तिनिमितम् । 'त्रधीश' इति विरूपः सन्धिः, 'क्षितिपा भीत्या' इत्यत्र विसर्गाणां लोपो विद्यते । 'वन एव' इति विसन्धिरवसेयः । 'गता' इत्यत्र विसर्गाणां लोपनं विहितं. इह चेत्थं न क्रियते । एतस्मिन् वृत्ते एतादृशैर्दीर्घैर्बन्धशिथिलत्वाद्यासेदुषि ग्रन्थनरमणीयत्वं न विद्यते । अतो मनोज्ञकवित्वं चिकीर्षुभिः अभ्यासोऽपि रचनासुन्दरत्वान्वितयैव पदपंक्त्या विधेय इति व्यवस्थितम् ।

अनुल्लसन्त्यां नव्यार्थयुक्तावभिनवत्वतः ।
अर्थसंकलनातत्त्वमभ्यस्येत्संकथास्वपि ॥१०॥

शिष्यः अर्थस्याभिधेयस्य, संकलना योजना, तस्यास्तत्त्वं स्वरूपं रहस्यं वाः पद्यग्रन्थनविधानरूपं, संकथासु वार्तास्वप्यभ्यस्येत् । कस्यां सत्याम्? नूतनार्थयुक्तावनुल्लसन्त्यां अस्फुरन्त्यां सत्याम् । नवाभिधेययुक्तेरविकाशः (सः) कुतः । अभिनवत्वतः कवेर्नूतनत्वादित्यर्थः ॥१०॥
'यथा' इति दृष्टान्तोपन्यासार्थकः ।

आगम्यतां सखे, गाढमालिङ्ग्यात्र निषीद च ।
सन्दिष्टं यन्निजभ्रातृजायया तन्निवेदय ॥११॥

अस्यार्थः । सुनोति सनति वा सखा, 'सनेर्डाख' [ हे उ. ६२५ ] इति डखिः, तस्य सम्बोधने । हे सखे हे वयस्य, त्वया आगम्यताम् । तथा अवसरात् गाढं मामालिङ्ग्य आश्लिष्य, अत्र आसने, त्वं निषीद उपविश । 'आलिंगात्र' इति पाठान्तरे, हे सखे, आलिङ्ग मम आश्लेषं विधेहि, इत्यर्थः । तथा यन्निजभ्रातुर्मम जायया भार्यया, यद्वा निजया स्वकीयया भ्रातृकान्तया, सन्दिष्टं यद्वाचिकं मम आदिष्टं विद्यते, तत् त्वं निवेदय ज्ञापय । ननु 'भ्रातृजाया' इति कथं उपनीपद्यते? अत्र हि योनिसम्बन्धसत्वा (त्त्वा)त् कृतां "विद्यायोनिसम्बन्ध [ हे. ठ्या. ६.३.१५० ]" इति सूत्रेण षष्ठ्यलुबवाप्तेः । तथा च सति 'भ्रातृजाया' इति अलुप्(क्)समासः । सिध्यति इति अत्र समाधीयते । भ्रातेव भ्राता सवयाः । अत एव भ्रातृशब्दस्य वयस्यार्थत्वादिह योनिसम्बन्धो नास्तीत्यतोऽलुप्समासो नाभिप्रेतः । तथा च वदावदावदन्ति सदृक्षेण साकं भ्रातृत्वं वर्तते,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सख्यामित्यर्थः । अथवा —

तां चावश्यं दिवसगणनातत्परामेकपत्नीम्

अव्यापन्नामविहतगतिर्द्रक्ष्यसि भ्रातृजायाम् । [मे पूर्व. १०] इति मेघदूतोक्तिवद् भ्रातरि जाया इति विगृह्य सप्तमीसमासोऽभ्युपगत इति ॥११॥

ननु चेत्प्रत्ययार्थयुक्त्यनुत्पादे सम्यक् कवित्वकरणशक्तिर्न स्फुरति, तदाऽन्यवृत्तार्थमाहार्यं किमित्यभ्यस्तिर्न निर्मीयते इत्याशङ्काऽपनुत्तयेऽभिधत्ते ।

परार्थबन्धाद्यस्य स्यादभ्यासो वाच्यसङ्गतौ ।
स न श्रेयान्, यतोऽनेन कविर्भवति तस्करः ॥१२॥

च पुनर्वाच्यस्यार्थस्य संगती (तिः ?) रचना, तस्यां विषयसप्तमी इहावसेया; अर्थाऽभिनिवेशविषयो योऽभ्यासः, परेषां काव्यकर्तॄणां ग्रहार्थस्य ग्रन्थनात् स्यात्, स न श्रेयान् न श्रेष्ठः । यतो यस्मात्कारणादनेनाऽन्यार्थाभिनिवेशेन परार्थगुम्फाद्विधीयमानेनार्थविषयाभ्यासेन वा, कविः वृत्तविधाता तस्करः इव चौरसदृक्षो भवति । तदुक्तम् —

परस्य काव्यं स्वमिति ब्रुवाणो विज्ञायते ज्ञैरिह काव्यचौरः ।
विलोक्य माणिक्यमयोग्यहस्ते प्रत्येति को नाम यदेतदस्य ॥१॥ [जिनवर्धनसूरिवृत्तौ]

वाच्यसङ्गताविति प्रणयनाच्छब्दसङ्गतिविषयोऽभ्यासः परनिबद्धशब्दग्रहं विदधतोऽपि न चौर्यं ख्यापयतीति समस्यायां चान्यार्थादानं विरुद्ध्येत, सुतरां विपश्चित्ताधिक्यालोकनादिति ॥१२॥

तथैव ब्रूते —

परकाव्यग्रहोऽपि स्यात्समस्यायां गुणः कवेः ।
अर्थं तदर्थानुगतं नवं हि रचयत्यसौ ॥१३॥

समस्यायां समसन समस्या संक्षिप्तरूपो । सन्ध्यादय इति । यः संक्षेपणीयः पदार्थः समस्येत्यर्थः तस्याम् । परेषां काव्यं कवित्वं, तस्य ग्रहोऽपि । कवते कौति वा कविः, 'स्वरेभ्यः' [है व्या. १ ३ ३०], इर् इति इः, तस्य कवेः प्रधानप्रेक्षाविकाय स)रूपो गुणः स्यात् । इहान्यवृत्तादानेन परकवित्वस्यैक उभौ त्रयो वा चरणा आदातव्याः, न तु समग्रं वृत्तम् । हिर्यस्मात् कारणादसौ समस्यापूरकः कविः तस्यान्यवृत्तस्य योऽर्थो वाच्यः तस्यानुगतमनुकूलं प्रागश्रुतमर्थं, नवं स्वकीय मेधापाटवेन प्रत्यग्रं ग्रथ्नाति । एतेन च समस्यापूर्तौ परकवित्वार्थमप्यात्मीयामलधिषणावशोपार्जितनूतनाभिधेयेन रचयन् काव्यस्रष्टा चमत्कारविधायको भवति इति सूचितम् । समस्योदाहियते यथा केनचन एकोक्तिः अदायि 'ठंठंठठंठंठठठटंठठंठः' इत्येतदर्थसंगत्यभिधेयवाचि चरणत्रयं नूतनं कर्तव्यमिति श्रुत्वा विदुषोक्तम् —

रामाभिषेके मदविह्वलायाः हस्ताच्च्युतो हेमघटोऽबलायाः ।
सोपानमार्गे प्रकरोति शब्द ठंठंठठंठंठठठंठठंठः ॥ [स क.][9]

अन्यच्च 'समुद्राध्धूलिरुत्थिता' इत्यभिहितः पादः, तदनूदितं सुधिया —

अगस्तिहस्तविन्यस्तः निःपीतसकलाम्भसः ।
अधःफणीन्द्रफूत्कारैः समुद्राद् धूलिरुत्थिता ॥२॥ [ ]

9 सरस्वतीकण्ठाभरणे इद शब्दकृतायाः गुम्फनायाः उदाहरणरूपेण दत्तम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपरं च बुधेनोक्तम् 'शतचन्द्रं नभःस्थलं' इति श्रुत्वा—

जन्मस्नात्रे जिनेशस्य मेरौ देवाङ्गनामुखैः ।
परितः स्फुरितैः शङ्के शतचन्द्रं नभःस्थलम् ॥३॥ [ काव्यक. ४.७ ]

स्वयमिदं काश्यपीकान्तेनांह्रित्रयं वितीर्णं 'कुमारसम्भव' सत्कपृथक्सर्गसम्बद्धं—

चकार मेना विरहातुराङ्गी प्रवालशय्याशयनं शरीरम् ।
हिमालयो नाम नगाधिराजः तव प्रतापज्ज्वलनाज्जगाल ॥४॥ [ कुमार. ] इत्याद्यवसेयम् ॥१३॥

निखिलवृत्तबीजार्थोत्पादनाय सामग्रीं प्रतिपादयति—

**मनःप्रसत्तिः, प्रतिभा, प्रातःकालोऽभियोगिता ।**
**अनेकशास्त्रदर्शित्वमित्यर्थो लोकहेतवः ॥१४॥**

एतेऽर्था लोकस्यार्थप्रकाशहेतवो भवन्ति । समस्ताधिव्यपगमान्मनसोऽन्तःकरणस्य प्रसत्तिः शान्तिः, प्रतिभा अमलमेधा, प्रातःकालः प्रभातसमयः, तस्योपलक्षणत्वादपररात्रिसमयो मन्तव्यः । तत्र हि अल्पधियोऽपि बुद्धिः प्रसरीसर्ति । अभियोगिता उद्यमवत्ता; अनेकानि च तानि शास्त्राणि च तथा तानि पश्यन्तीत्येवंशीलोऽनेकशास्त्रदर्शी, तस्य भावः; तत्त्वं विविधग्रन्थालोकनशीलत्वं च विलोक्यते । इहानभिहितस्यापि समुच्चयार्थकचशब्दस्य लाभाद्यथा—

अहरहर्नीयमानो गामश्वं पुरुषं पशुम् ।
वैवस्वतो न तृप्येत सुराया इव दुर्मदः ॥१॥ [ ]

अथ च—

वर्ण्यवस्तुपरीवारं दृष्ट्वा बध्नन्विशेषणैः ।
वाक्यैर्वासु[शु]कविर्भूयाद्धुर्धरार्थोपमादिभिः ॥ इति । [ ] २ ॥१४॥

अथसंजा[ ज्ञा ? ] तार्थस्योपक्रमे शिक्षामाह—

**समाप्तमिव पूर्वार्धे कुर्यादर्थप्रकाशनम् ।**
**तत्पुरुषबहुव्रीही न मिथः प्रत्ययावहौ ॥१५॥**

कवित्वविधाता वृत्तस्य प्रथमार्धे अर्थस्य प्रकाशनं समाप्तप्रायं निर्मिमीते, न तु पर्याप्तमेव । अतो द्वितीयचरणान्ततृतीयचरणयोः समासः सन्धिश्च न वर्त[ र्ते ? ] ते । अन्यत्रोपमार्थान्तरन्यास-प्रभृतिप्रकारैरर्थपूरणं कुर्यात् । तत्पुरुषबहुव्रीहिश्च तत्पुरुषबहुव्रीही समासौ, मिथोऽन्योन्यं प्रत्ययमावहत इति मिथः प्रत्ययावहौ न विधेयौ । इह तत्पुरुषो बहुव्रीहिर्वा समास इति संशयस्थलं नानेतव्यम् । यथा-मुरस्य अरिः मुरारिः, मुरः अरिः यस्येति तत्पुरुषबहुव्रीह्योः निर्णयः कर्तुं न शक्यते । अतो न एतौ प्रतीतिविधायकौ निर्दिष्टौ । वृत्त्यन्तरे इतरथाऽपि भ्रान्तिर्यथा-पुरुषश्चासावुत्तमश्चेति कर्मधारयः; गमकत्वाद्विशेषणं परं; पुरुषेषु उत्तमः, सप्तमीतत्पुरुषसमासे वा पुरुषोत्तमः । "परमश्चासौ ईश्वरश्चेति कर्मधारयस्य च विद्यमानत्वात् तत्पुरुषभ्रान्तिरनुचिता भणिते" ति चेन्न, कर्मधारयसंज्ञाधिकृतौ तत्पुरुषसंज्ञाया अपि वैयाकरणैरधिकृतत्वात् । कर्मधारयस्य तु तत्पुरुषसाहचर्यादेव तत्पुरुषभ्रान्तिरुदितेति । श्लोकपादादौ भगणोऽ"नुष्टुभि सनौनाद्या"दित्युक्तेः [ का. क. वृ. १. ९]



Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपलक्षणाच्च निराकृतोऽपि "तत्पुरुषबहुव्रीही" इति इह न विरुद्ध्येत, एतस्य शिक्षाग्रन्थत्वात् ॥१५॥
पुनः शिक्षान्तरं प्रतिपादयति—

एकस्यैवाभिधेयस्य　समासं　व्यासमेव च ।
अभ्यस्येत्कर्तुमाधानं निःशेषालङ्क्रियासु च ॥१६॥

एकस्यैव वर्ण्यमानस्याभिधेयस्य अर्थस्य समसनं समासः संग्रहः तं; व्यस्यते व्यासः प्रपञ्चः, तमेव च कर्तुं निर्मातुं, शिक्षयेत् । च पुनः, निःशेषाः समस्ताः, अलङ्क्रियते याभिस्ताः अलङ्क्रियाः । 'कृञः श च' इति [जै. व्या. २.३.८२][10] करणे शप्रत्यये रिङ् शयग्लिङ् क्ङिति रिङादेशे इयङ् टापौ । तथा तासु निखिलोपमाद्यलङ्कृतिषु एकस्यैव वाच्यस्य वर्ण्यवस्तुनः आधानं आरोपणं, निर्मातुं शिक्षयेत् इति भावः । बृहदर्थस्य संक्षेपेण यथा—

ढक्काध्वानप्रतिध्वानमुखरास्त्वद्रिपून् भयात् ।
लीयमानान्निकुञ्जेषु वारयन्तीव पर्वताः ॥१॥ [सिंहदेवगणिवृत्तौ १. १६] । यद्वा—

ज्योत्स्नागङ्गा परं ब्रह्म दुग्धधारासुधाम्बुधिः ।
हारश्चापि न रोचन्ते रोचते यदि ते यशः ॥२॥ [सिंहदेवगणिवृत्तौ १-१६]

एतस्यैवार्थस्य व्यासेन यथा-

यात्रारम्भभयानकानकशतध्वानप्रतिध्वानिनः
स्वस्योच्छेदपराभवागममभी संभाव्य शंकाकुलाः ।
त्रासावेशवशाद्विशन्तमधुना त्वद्वैरिराजव्रजं
दूरादेव निराकरिष्णव इव स्वामिन्विभ्रान्त्यद्रयः ॥ (२) ३ ॥ [सिंहदेवगणिवृत्तौ १.१६]

तथा सकलालङ्कृतिषु अर्थारोपणविषये शिक्षा यथा—'वदनमेतस्याः सुन्दरं' इतीयत्तावच्छिन्नपरिमाणोऽर्थः 'आननाम्बुजं मनोज्ञं' इति रूपके आरोप्यते; 'पद्मवदनायाः वक्त्रेऽस्याः मधुव्रतराजी नलिनबुद्ध्या निपतति' इति भ्रान्तिमदलङ्कृतिः । 'विदग्धनितम्बिनीवदनेन्दौ निष्पादितेऽपि हिरण्यगर्भेणेन्दुः किं घटितः' इत्याक्षेपः, 'सुरूपप्रमदाया आननं कमलं वेति' संशीत्यलङ्क्रियायाम्, 'इदमेतस्याः वदनं न किन्तु नलिनं' इत्यपह्नुतौ; 'अनाभरणसुभगमङ्गनायाः मुखं' इति [वि]भावनायां; 'रूपवद्रामायाः अस्या आननकलाभृदर्चिभिः निरस्ते विलासवेश्मध्वान्तपटलेन विचिन्तयति गृहमणिं परिजन' इत्यतिशये, इत्थमपरास्वप्यलङ्क्रियासु तस्मिन्नेवैकाभिधेयेऽभ्यासो विधेयः ॥१६॥

कवित्वनिर्मातुर्विशेषं प्रख्यापयति—

स्यादनर्धान्तपादान्तेऽप्यशैथिल्ये लघुर्गुरुः ।
पादादौ न च वक्तव्याश्चादयः प्रायशो बुधैः ॥१७॥

लंध्यते लघुः, 'रयिलघीत्युर्नलुक् च लघुरपि'; [हे.उ.७४०][11]; गिरति गुरुः 'कृगॄग्तव्रीति'उः गुरुर्भवेत् । [हे.उ ४४१][12] कुत्र सति ? बन्धस्याशैथिल्ये स्थैर्ये सति । क्व ? अनर्धान्तपादान्तेऽपि

---

10 पा. अ. ३, ३. १०० जसः, ला. 'कृञः वा शश्च' म. कृ. ५. ८५

11. मूले तु—'रङ्घि लङ्घि लिङ्गेर्नलुक्च इति । 12. मूले तु—'कृगृशृतृवृग्-वरट्' इति ।

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

अर्धस्य पूर्वापरार्धलक्षणस्यान्तः पर्यन्तः; नार्धान्तो अनर्धान्तः, पद्यते पादस्तुरीयकोंऽशः, तस्यान्तः पादान्तः, अनर्धान्तश्चासौ पादान्तश्च, स तथा तस्मिन् । यत्तावत् द्वितीयतुर्यचरणरूपार्धान्तपादे सर्वच्छन्दःसु लघोर्गुरुत्वं, तदा आस्ताम् । प्रथमतृतीयांह्रिलक्षणानर्धान्तपादान्तेऽपि लघुर्वर्णो गुरुर्भवतीत्याशयः । यथा-

सम्पन्नसिद्धिपुरसङ्गममङ्गलाय मायोरुवारिरुहिणीवरकुञ्जराय ।
वीराय ते चरमकेवलिपुङ्गवाय कामं नमो समदयाद्भिसत्तमाय ॥ [ ]

इत्यादिष्ववसेयम् । तथा –"तज्ज्ञैः पादस्य चरणस्यादौ प्रायशो बाहुल्येन चादयोऽव्ययलक्षणा न प्रयोक्तव्याः ।" यथा च—

"स्तौमि नाभेयमिहाजितं जिनम्" इत्यादि । प्रायश इत्युपादानात् हे, अरेरे, हन्त, हाहो, अहो, आः, इव, हो, किं न, धिक् प्रभृतीनां न दुष्टता । यथा--

'अहो योगस्य माहात्म्यम्', इति योगशास्त्रे [हे.यो.शा.१. १०]

'अरे, त्वं साध्वसं मा गाः ।'

'किं किं सिंहः ? ततः किम् ?'

'नरसदृशवपुः देव चित्रं गृहीतो नैतादृक् क्वापि' इत्यादि ।

'धिगेतौ ग्रामगामिनौ ।'

'रे मातङ्गीपते, नूनम् ।'

'आः' सविसर्गः कोपे पीडायां च । 'आः किमेतदिहोच्यते ।'

'दुर्लभं प्राप्य मानुष्यं हा मुधा हारितं मया ।'

'हे देव, किंकरमिमं परिभावयेह ।'

'न पादादौ खल्वादयः' [का.सू.वृ.-५.१.५] इति वामनीयनिषेधेऽपि इव शब्दस्य पादादौ प्रयोगः, कवेः औद्धत्यात् । माघसप्तमसर्गस्थश्लयेत्यादिद्वाषष्टि[ष्ठि]तमवृत्तपादादौ इव प्रयोगः, इत्यादि स्वयमभ्यूह्यम् ॥१७॥

विचक्षणसमयशिक्षां प्रकटयिषुराह—

**भुवनानि निबध्नीयात् त्रीणि सप्त चतुर्दश ।**
**अप्यदृश्यां सितां कीर्तिमकीर्तिं च ततोऽन्यथा ॥१८॥**

कविर्भवति सर्वमेषु । भुवनानि 'सूधूभू' [हे.उ.२७४] इति किदनः । विष्टपानि त्रीणि स्वर्गमर्त्यपाताललक्षणानि निबध्नीयात् ग्रथ्नीयात् । यथा सप्त-तल १, वितल २, रसातल ३, सुतल ४, नितल ५, तलातल ६, पाताल ७ रूपाणि । चतुर्दश च प्रागुदितसप्तकान्वितभूर्लोक ८, भुवोलोक ९, स्वर्लोक १०, अहर्लोक ११, जनलोक १२, तपोलोक १३, सत्यलोक १४ आत्मकानि । मतान्तरे चैकविंशतिर्भुवनानि वेत्यध्याहारः । तथा अदृश्यामपि अमूर्तामपि; कीर्त्यते कीर्तिः, सा अतिहेतियूतिभूतिज्ञप्तिकीर्तीति साधुः, तां कीर्तिम् । सिनोति मन एषो सितो, तामवदातां निबध्नीयात् । च पुनः, अदृश्यामप्यकीर्तिम्, ततो धवलकीर्तेः, अन्यथा नैवंविधां श्यामां ग्रथ्नीयात् ॥१८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

वारणं शुभ्रमिन्द्रस्य चतुरः सप्त चाम्बुधीन् ।
चतस्रः कीर्तयेद्वाष्टौ दश वा ककुभः क्वचित् ॥१९॥

यद्यपि ईभानां हस्तीनां प्रायः श्यामो वर्णः, तथापि लब्धवर्णः; इन्दति इन्द्रः, "भीवृधीति रः"; [ हे. उ. ३८७ ] तस्य इन्द्रस्य बिडौजसः वारयत्यरीन् वारणः, तं वारणं ऐरावणद्विपं; शोभते शुभ्रः, 'शुच्यजोतिकित् रः' [ हे. उ. ४६३ ]; शुभ्रं धवलं, कीर्तयेत् वर्णयेत् । सूर्याश्वादीनां नीलप्रभृतिको वर्णः स्वयं मन्तव्यः । तथा-अम्बू निधीयन्ते एषु अम्बुधयः तान्, पूर्वाब्धादिभेदात् चतुरः समुद्रान् । वा अथवा, सप्त-लवण १, क्षीर २, दधि ३, आज्य ४, सुरा ५, इक्षु ६, स्वादुवारि ७ सागरलक्षणान् लोकव्याख्यातान् कीर्तयेत् । तथा चतस्रः- चतेग् याचने, चत्यत आभिरिति चतस्त्र । "चतेरुर" इत्युणादिसूत्रेण [हे. उ. ९४८] उर् प्रत्यये 'चतुर' शब्दसिद्धौ स्त्रियां द्वितीया बहुवचने, ताः चतुः-संख्याकाः । कं वायुं, कुभ्नन्ति विस्तारयन्ति ककुभः । ककुप्त्रिष्टुभनुष्टुभ् इति क्विबन्तानि पात्यन्ते, ताः ककुभो दिशः । पूर्वाद्याशाभेदात् कीर्तयेत् । वाऽथवा अष्टौ, प्रदिक्चतुष्टयमेलनात् । क्वचिद् ऊर्ध्वाधोदिक्क्षेपाद् दश वा वर्णयेत् । इहानुदितोऽपि कविसमयो यथा-मन्मथो मूर्तोऽमूर्तश्च कीर्त्यते, क्षीराब्धिरेक एव; सुरभौ न मालत्याः विकाशो[ सः ]; वनितानां कटाक्षः सितोऽसितो सितासितो वा । सितो यथा धनञ्जयस्य—

उज्जृम्भाननमुल्लसत्कुचतटं लोभभ्रमद् भूतलम्
स्वेदाम्भः स्नपिताङ्गयष्टिविगलद् व्रीडं सरोमाञ्चया ।
धन्यः कोऽपि युवा स यस्य वदने व्यापारिताः साम्प्रतम्
मुग्धे! दुग्धमहाब्धिफेनपटलप्रख्याः कटाक्षच्छटाः ॥१॥ [ अ. श. ? ]

असितो यथा-

गतः कालो यत्र प्रणयिनि मयि प्रेमकुटिलः कटाक्षः काल(लि)न्दोल्घुलहरिर्वृत्तिः प्रभवति ॥
इदानीमस्माकं जठर [जरठ]कमठीपृष्ठकठिना मनोवृत्तिस्तत्किं व्यसनिनि मुधैव क्षपयसि ॥२॥

सितासितो यथा—[ ]

अदृश्यन्त पुरस्तेन येषां खञ्जनपङ्क्तयः ।
असमर्थन्त विनिःश्वस्य प्रियानयनविभ्रमाः ॥३॥ ॥१९॥ [ रामचरित १.१९ ]

पुनः शिक्षामभिधत्ते —

यमकश्लेषचित्रेषु बवयोर्डलयोर्न भित् ।
नानुस्वारविसर्गौ तु चित्रभङ्गाय सम्मतौ ॥२०॥

यच्छति यमं तदेव यमकं, श्लेषणं श्लेषः । चीयते चित्रं, 'चिमिदी'ति [ हे. उ. ४५४ ] त्रक्'; चित्रयति वैचित्र्यं सम्पादयति इति वा चित्रम् । ततो द्वन्द्वः-यमकं च श्लेषश्च चित्रं च तानि, तथा तेषु यमकश्लेषचित्रेषु अलङ्कारेषु । बवयोः बकारवकारयोः, डलयोः डकारलकारयोः, न भित् न भेदो भवति । तथा, अनुस्वर्यते मुखनासिकाभ्यामुच्चार्यते इत्यनुस्वारः । घञि अनुस्वारणं वा [ हे. व्या. ३.२ ८६ ] । विसृज्यते विरम्यते विरतिरूपोऽर्थोऽनेन इति विसर्गः । ततो द्वन्द्वः-अनुस्वारश्च विसर्गश्च अनुस्वारविसर्गौ । चित्रस्य हारछत्रबन्धादिलक्षणस्य, भङ्गाय स्वयमेव लक्ष्यते

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति भङ्गः । यन्नि भङ्गोऽनेकार्थः, तस्मै विघाताय सम्मतौ उचितौ न भवतः । उदितं च—

> बवयोर्डलयोश्चैव सशयोरलयोस्तथा ।
> अभेदमिव वाञ्छन्ति येऽलङ्कारविदो जनाः ॥१॥ (२०)[13]

यथाक्रममुदाह्रियन्ते—

> शङ्कमानैर्महीपाल कारागारविडम्बनम् ।
> त्वद्वैरिभिः सपत्नीकैः श्रितं बहु विडम्बनम् ॥२१॥

हे महीपाल, हे काश्यपीपते; त्वद्वैरिभिः त्वदरातिभिः । वन्यते इति वनं, 'वर्षादित्वादल्' [शा. व्या वर्षादश्च ३.२.१०७?], काननं; श्रितं सेवितम् । किं विदधानैः ? तव कारा चासावगारं कारागारं, तत्र । विडम्बनं गुप्तिवेश्मकदर्थनम् । शङ्कन्ते इति शङ्कमानाः, तैः शङ्कमानैः विचिन्तयद्भिः । पुनः किं लक्षणैः ? सह पत्नीभिः स्त्रीभिर्वर्तन्ते इति सपत्नीकाः, तैः सपत्नीकैः । कथंभूतं वनम्? बहुबिलं बहूनि बिलानि नागकोलकप्रभृतिविहितविवराणि यत्र तद् बहुबिलम् । इह यमकालङ्कारे विडम्बनं बहुबिलं वनं इति बवयोर्डलयोरभेदः ॥२१॥

> त्वया दयार्द्रेण विभो ! रिपूणां न केवलं संयमिता न बालाः ।
> तत्कामिनीभिश्च वियोगिनीभिः मुहुर्महीपातविधूसराङ्गाः ॥२२॥

विभवति शत्रून् [उ]न्मूलने समर्थो भवति विभुः । शंसन् स्वयं विप्राद्भुवोडुरिति डुः, तस्य सम्बोधने, हे विभो, हे नायक । 'इर्यति रिपवः कस्यर्तिभ्यामिति पुक् [हे. व्या. ४.२.२१] । तेषां रिपूणां, बलन्ति प्राणन्ति स्तन्येन बालाः, ज्वालादित्याणः डिम्भा योषितो वा । अर्द्यत इति आर्द्रः, चिज्जीतिरे दीर्घत्वं च । दयया आर्द्रः दयार्द्रः, तेन । केवलं त्वया द्रयार्द्रेण सता, न संयमिताः न बद्धाः इति न, किन्तु तत्कामिनीभिः– तेषां शत्रूणां कामिन्यः, ताभिः, भर्तृवियोनीभिः । बल संवरणे, वल्यन्ते संक्रियन्ते एभिरिति कर्मणि घञि बालाः केशाः, न संयमिताः न बद्धाः । कीदृशाः बालाः, वनिताः केशाः च ? मुहुर्मही० धुनाति चेतः धूसरम् 'कृधूतनीतिकित्' [हे. उ. ४४०] सरः । विशेषेण धूसरं ईषत्पाण्डुविधूसरं, मुहुः वारंवारम्, मह्यां पातेन विधूसरं, अङ्गं शरीरं येषां यासां वा ते, ताः तथा । इह श्लेषालंकृतौ बालवालशब्दयोर्बवयोरैक्यम् ॥२२॥

श्लेष एव डलयोरभेदत्वं प्रतिपादयति—

> देव, युष्मद्यशोराशिं स्तोतुमेनं जडात्मकम् ।
> उत्कण्ठयति मां भक्तिरिन्दुलेखेव सागरम् ॥२३॥

हे देव त्वदीय[या] भक्तिः परिचर्या, एनं मां बाहुल्येन प्रीतस्मरणं उत्कण्ठा, तां करोति इति उत्कण्ठयति, उत्सुकीयति । किं कर्तुम् ? यशसां राशिः यशोराशि, युष्माकं यशोराशिः युष्मद्यशो-

---

13. सारस्वतव्याकरणे १.१८ प्रायः समाना, अतः नेपा मूलग्रन्थस्य कारिका, यथा प्राप्यते पा. मध्ये ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

राशिः, तं स्तोतुं ईडितुम् । किं लक्षणं माम्? जडः आत्मा स्वरूपं यस्य सः जडात्मकः, तं, जाल्मस्वभावम्-केवकम् । लिख्यतेऽनया लेखा, इन्दोः चन्द्रस्य लेखा इन्दुलेखा चन्द्रिका, सा इव । सगरपुत्राणामयं, तै खातत्वात् सागरः, तं सागरम् । यथा इन्दुलेखा रत्नाकरमुत्कण्ठयति, कण्ठात् उच्छ्रितं निर्मिमीते । कीदृशं सागरम्? जलात्मकं जलमयम् ॥२३॥

**चन्द्रेडितं चटुलितस्वरधीतसाररत्नासनं रभसकल्पितशोकजातम् ।**
**पश्यामि पापतिमिरक्षयकारकायमल्पेतरामलतपःकचलोपलोचम् ॥२४॥**

हारबन्धचित्रम् । अहं वीरं पश्यामीत्यन्वयः । कथंभूतं वीरम्? चन्द्रेडितं चन्द्रेण ग्रहगणोरुनायकेन, ईडितो वर्णितः, तम् । पुनः कीदृशम्? चटुलितेति० - स्वरति इति स्वः अन्येभ्योऽपि दृश्यत इति स्वरतेर्विचस्वरव्ययं, तेन । स्वः त्रिविष्टपं, तद्वासिसुरजनेनाधीतं भणितं, सारं बलं यस्य सः स्वरधीतसारः इन्द्रः । रत्नेन मण्डितमासनं रत्नासनम् तस्य रत्नासनं तथा । चटुलितम[मा]न्दोलितं स्वरधीतसाररत्नासनं येन स तथा, तम् । देवाधिदेवस्य कल्याणकेषु शक्रप्रभृतीनां पीठानि तरलितानि भवन्ति । यद्वा स्वः नाके, अधीतः प्रतीततया पठितः, मन्दराद्रिः तस्य सारम् । पाण्डुकम्बलशिलास्थं मणिमयासनम् । चटुलितं प्रेङ्खितं, स्वरधीतसारस्य स्वर्णाद्रेः सारं रत्नासनं येन स तथा तम् । ज्ञातनन्दनेन सुरगिरेः प्रेङ्खोलनादासनमपि प्रेङ्खोलितमिति भावः । पुनः कीदृशम्? रभसकल्पितेति-रभसेन रंहसा, कल्पितं खण्डितं, शोकजातं दुःखवृन्दं येन सः, तथा तम् । पुनः किंभूतं? पापेत्यादि-पान्त्येभ्यः पापानि, 'तिभूतामचिक्लेदे', [शा. व्या ३.४.१५ अचि ?] तिम्यन्ति इति तिमिराणि, 'तिमिरुची'त्यादिना तिमेः किरः, ततः पापान्येव तिमिराणि दुरिततमांसि, तेषां क्षयः, तं करोति इति पापतिमिरक्षयकारः । चीयतेऽसौ कायः, चिति देहे तिघञ्कत्वं च, तदनु पापतिमिरक्षयकारः कायो यस्य स तथा, तम् । पुनः कथं भूतम्? अल्पेतराणि भूयांसि, अमलानि विमलानि, तपांसि यस्य सः, तथा । कचन्ते कचाः चिकुराः, तेषां लोपः नाशः, तेन लोचनं लोचोऽदर्शनं यस्य सः, तथा । अल्पेतरामलतपाश्चासौ कचलोपलोचश्च, स तथा, तम् । यद्वा अल्पेतरामलतपसे केशोद्धरणलोचो यस्य सः तथा, तम् । अथ वैनस्तमिश्र[स्र?]क्षयकारकस्य, अर्थतोऽर्हतः कायोमूर्तिरुक्षगः, तं पश्यामि इति सम्बन्धः । इह चन्द्रेडितचटुलितपदद्वये डलयोरैक्यम् । हारबन्धचित्रस्य स्थापना ॥२४॥

**प्रचण्डबल! निष्काम! प्रकाशितमहागम! ।**
**भावतत्त्वनिधे! देव! भालमत्राद्भुतं तव ॥२५॥**

छत्रचित्रम् । हे देव, अत्र विष्टपत्रयेऽपि तव भा द्युतिः, अलं अत्यर्थं, अद्भुता विस्मयविधायिनी अस्ति । पाठान्तरे भालं अलिकं अद्भुतं वर्तते । इह कर्तृपदान्वयानुरोधेनानुदितमप्यस्ति इत्यादि क्रियापदं लभ्यते । तत उक्तम्, देवाधिदेवस्यामन्त्रणविशेषणान्याह - हे प्रचण्डबल, प्रकर्षेण चण्डं तीव्रं बलं यस्य सः प्रचण्डबलः, तस्य सम्बोधने तथा । परानाकलनीयानन्तसामर्थ्योपेतत्वात् प्रतीक्ष्णपराक्रमः । तथा, हे निष्काम, निर्गतः कामात् मन्मथात् निष्कामः, तस्य आमन्त्रणे । तथा "निर्दुर्बहिराविःप्रादुश्चतुरां" [हे. व्या. २.३.९] इत्येतेन कातन्त्रविस्तरसूत्रेण निरोरः षत्वसिद्धौ सत्यामपि बाहुलकादिह चित्रकृते षत्वं न निरमायि । एतेन निष्कामपदान्तःस्थो विसर्ग एवेति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

व्यवस्थितम् । तथा हे प्रकाशितमहागम ! महान् चासौ आगमश्च महागमः, प्रकाशितः महागमः येन सः, तथा तस्य आमन्त्रणे । अविसंवादिद्वादशाङ्गीप्रणेतृत्वात् प्रकटितोरुप्रवचन । तथा, हे भावतत्त्वनिधे, हे देव । भवत्यस्मिन्भावोऽभिप्रायः, तस्य तत्त्वानि भावतत्त्वानि अन्तरङ्गतत्त्वानि ज्ञानादीनि । नियतं धीयते निधिः, तेषां निधिरिव निधिर्यस्य तस्य सम्बोधने तथा । छत्रचित्रेऽत्र बवयोरभेदः । एतच्चित्रं छत्रमालेख्य वाचनीयम् ॥२५॥

भवकाननमत्तेभ ! भग्नमायातमःप्रभ ! ।
विनयात्वां स्तुवे वीर ! विनतत्रिदशेश्वर ! ॥२६॥

पद्यमप्येतत् क्षेपकम् । छत्रचित्रं टीकान्तरे । सुगमत्वात् अव्याख्यातस्यापि अस्य कश्चन अर्थो विव्रीयते । हे वीर, विशेषेण ईरयति प्रेरयति कर्माणि इति वीरः, तस्य आमन्त्रणे तथा । हे जातनन्दन, अर्हं, विनीयते कर्म अनेन इति विनयः, तस्मात् विनयात् , त्वां स्तुवे । परमेश्वरस्य सम्बोधनविशेषणानि ब्रूते । हे भवकाननमत्तेभ-भवः चातुर्वर्गिकः संसारः, कन्यते गम्यतेऽस्मिन् काननम् । चिदनेत्यने निपात्यते कमनित्यमस्मिन्निति, वास एव गहनरूपत्वात् । काननं वनं, भवकाननम् । एति इभः, 'इणः' [हे. व्या. २.१.५१] किदिति भः, मत्तश्चासाविभश्च मत्तेभस्तस्मिन्, मत्तेभ इव मत्तेभो यः स तथा, तस्य आमन्त्रणे । तथा हे भग्नमायातमःप्रभ-मात्यनया माया, 'स्थाछाभासेति' यः,[14] ताम्यन्ति अनेन तमः, 'असित्यस्' [हे. उ. ९५२]प्रभाणं प्रभा । ततोऽयमर्थः माया तृतीयकषायात्मिका, तमः मिथ्यात्वविषयतृष्णादिपापं, माया च तमश्च मायातमसी; यद्वा मायैव तमः, विवेकालोकतिरस्कारित्वादन्धकारं, तयोः तस्य वा प्रभा कृष्णत्विट्, ततश्च भग्ना मायातमःप्रभा येन यस्माद्वा तथा । तस्य सम्बोधने-हे भग्नमायातमःप्रभ । अथवा-भग्नं मायातमो येन सः, भग्नमायातमाः, तस्य सम्बोधने-हे भग्नमायातमः । समवसृतिसमागत त्रिदशदनुजमनुजतिर्यग्जं तु हृद्ववर्तितमसः सदुपदेशांशुभिः तिरस्करणात् । निरस्तशाठ्यध्वान्त-प्रकर्षेण भाति । क्वचित् इति ड प्रत्यये प्रभः, तस्य आमन्त्रणे हे प्रभ, विश्वत्रयस्पृहणीयाद्-भुतरूपकान्ते । भग्नमायातमाः चासौ प्रभश्च स तथा, तदामन्त्रणे इति वा । हे विनतत्रिदशेश्वर, विशेषेण नताः नम्रीभूताः त्रिदशेश्वराः देवेन्द्राः यस्य स तथा, तस्य सम्बोधने तथा ॥२६॥

अधीत्य शास्त्राण्यभियोगयोगादभ्यासवश्यार्थपदप्रपञ्चः ।
तं तं विदित्वा समयं कवीनां मनःप्रसत्तौ कवितां विदध्यात् ॥२७॥

कविः कवितां-कवेः कर्म कविता, तां कवितां कुर्यात् । इह अभिधास्यमानाभ्यासवश्यार्थपदप्रपञ्चः इत्यस्मात् प्रसिद्धविशेषणात् कविः इति विशेष्यपदं लभ्यते, 'विशेषणमात्रप्रयोगे सागराम्बरादिवत्तावतैव विशेष्यप्रतीतेः' इत्याह वामनः ।[15] किं च विशेषणप्रयोगो विशेष्यप्रतिपत्तौ हेतुरिति, कर्मक्रियान्वयसामर्थ्याद्वा । किंकृत्वा ? अभियोगः उद्यमः, तस्य योगः तस्मात् , शिष्यते शिष्येभ्य-स्तत्त्वं प्रतिपाद्यते एभि इति । शास्त्राणि शब्दालङ्कारशास्त्रादीनि । अध्ययनं पूर्वमधीत्य पठित्वा ।

14. मूले तु-'स्था-ईश-भास-पिस-कसः वरः' (हे. व्या. पू. २.८१)

15. विशेषणमात्रप्रयोगो विशेष्यप्रतिपत्तौ [पू. १.१०]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

किंलक्षणः ? अभ्यास० अर्थाश्च पदानि च अर्थपदानि, तेषां प्रपञ्चः व्यासः, स तथा; अभ्यासेन-वश्यः वश[शं]गतोऽर्थपदप्रपञ्चो यस्य सः तथा । पुनः किंकृत्वा ? तं तं पुरातनविपश्चित्प्रयुक्तम्—

असतोऽपि निबन्धेन निबन्धेन सतोऽपि च ।
नियमेन च जात्यादेः कवीनां समयस्त्रिधा ।। इति [का. क. १.५.९४] ।।१।।[16]

त्रिधा त्रिभिः प्रकारैः, कवीनां समयं लब्धवर्णसंकेतात्प्तोक्तिं ज्ञात्वा । क्व सत्याम् ? मनसः अन्तःकरणस्य, प्रसत्तौ निर्मलतायां सत्याम् ।।२७।।

इति श्री बृहत् खरतरगच्छे भट्टारकश्रीजिनराजसूरिविजयिराज्ये श्रीसागरचन्द्रसूरिसन्ताने पट्टानुक्रमसंजातश्रीमद्वाचनाचार्यरत्नधीरगणिप्रवरविनेयवाचनाचार्यज्ञानप्रमोदगणिविनिर्मितायां वाग्भटालङ्कारवृत्तौ प्रथमः परिच्छेदः ।।१।।

*

16. का. शा. १.१० कारिकास्य समाना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# द्वितीयः परिच्छेदः

अथ वृत्तस्याङ्गतां बिभ्रणिषुः आह—

**संस्कृतं प्राकृतं तस्यापभ्रंशो भूतभाषितम् ।**
**इति भाषाचतस्रोऽपि यान्ति काव्यस्य कायताम् ॥१॥**

इति चतस्रोऽपि भाषाः, तस्य प्रागुदितस्वरूपस्य काव्यस्य, कायतां शरीरतां, यान्ति प्राप्नुवन्ति । इति इति किम् ? संस्क्रियते स्म संस्कृतम् १, प्रकृतेः संस्कृतात् जातं प्राकृतं २, तस्य प्राकृतस्य लक्षणतः अपभ्रष्टः, अपभ्रंशः । अपशब्दः कुत्सायां, असंस्कृतत्वात्, कुत्सितशब्दो वा ३ । भाष्यते स्म भाषितं, भूतैः भाषितं भूतभाषितं, पैशाचिकमित्यर्थः ४ । रसोल्लासः मागधमित्यादि, *यन्मागधभाषालक्षणं, शौरसेनी च प्राकृते, इत्यतो भाषाभूयस्यो न विद्यन्ते, निखिलिनीवृद्भाषा* अपि । प्राकृतेऽपि समुच्चये वृत्तस्य स्वलक्षणमाप्नुवन्ति इत्यर्थः ॥१॥

**संस्कृतं स्वर्गिणां भाषा शब्दशास्त्रेषु निश्चिता ।**
**प्राकृतं तज्जतत्तुल्यदेश्यादिकमनेकधा ॥२॥**

स्वर्गोऽस्ति एषामिति स्वर्गिणः[1] देवाः, तेषाम्; भाष्यते भाषा, संस्कृतमिति भण्यते । कीदृशी ? शब्दशास्त्रेषु व्याकरणेषु; प्रकृतिप्रत्ययद्वारेण अर्थस्य वाचको यः साधुशब्दः सः संस्कृतो भण्यते । तत्स्वरूपत्वेन निश्चिता, सम्यक् व्युत्पत्त्या निर्धारीकृता । प्राकृतमनेकप्रकारं सम्भवति । तज्जेति- तज्जं च तत्तुल्यं च देश्यं च तज्जतत्तुल्यदेश्यानि, तानि आदौ यस्य तत्तथा, तस्मात् संस्कृतात् जायते स्म । तज्जं यथा—

सिरिसिद्धराय सच्चं साहसरसिओ त्ति कित्तणं तुज्झ ।
कहमन्नहा भण मह पडन्तमयणत्थमक्कमसि ॥

हे श्री सिद्धराजजयसिंहदेव, इति तव कीर्तनं सत्यं विद्यते । इति इति किम् ? साहसरसिकः । अन्यथा मम मनः अन्तःकरणं, कथं केन प्रकारेण, आक्रामसि ? किंभूतं मनः ? पतन्ति मदनास्त्राणि कामशरा यत्र तत्, पतन्मदनास्त्रम् । तेन संस्कृतेन तुल्यम् तत्तुल्यम्, समसंस्कृतम् । यथा—'परसमयतिमिर- तरणिमित्यादि' स्तुतयः । प्राकृतशब्दाश्चेह अन्यथाभावं नाप्नुवन्ति । देशेषु कर्णाटप्रभृतिषु भवं देश्यम् । यथा 'सत्ताबीससंजोयण' शब्दश्चेह देश्यः चन्द्रार्थकः, इत्याद्यनेकधा भवति । आदिशब्दात् शौरसेनीमागध्यौ आदीयेते, शौरसेन्याम् । 'इदानीं' शब्दे इलोपो यथा 'सो दाणि सिराय महाणुभागो' इत्यादि । 'तत्' शब्दस्य ता ता एहि तथा तस्य दः, 'विगददुहहेदुमोहारिकेदूदयं' इति । मागध्यां यथा रस्य लः, णस्य नः । यथा—'तरुण'स्थले 'तलुन' इति । तथा—

असुलसुलविसलनललायसे विदपदे रुक्षस्थाने लुक्खम् ।
एतत्प्रभृतिकमपि प्राकृतमवसेयम् ॥२॥

---

1. 'भाषा शब्दशास्त्रेषु...स्वर्गिणः' –कारिकाभागसहितमिदं व. पुस्तके नास्ति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपभ्रंशस्तु तच्छुद्धं तत्तद्देशेषु भाषितम् ।
यद्भूतैरुच्यते किंचित्तद्भौतिकमिति स्मृतम् ॥३॥

तु पुनः, सोऽपभ्रंशः स्यात् । यत्तज्जनपदेषु शुद्धं इतरभाषाभिरसंपृक्तं भाषितं भवति । यथा— निम्मल तुह मुहचंद जे पढु पेक्खहि पसरसि य० । यदिह सर्वधर व्याख्यातं दृश्यते-अपभ्रश्यति अपशब्दो भवति, अपभ्रंशः । अच् शब्दानुशासनेनाव्युत्पादितो योगान्तगा [ग ?] व्यादिशब्दोऽपशब्दः, स सर्वः शब्दानुशासनशास्त्रे अपभ्रंश उच्यते । काव्ये तु आभीरादिभाषाऽपभ्रंशः । क्वचन अत्र असंजातोऽपि रकारः स्यात् । यथा—

भ्रारड तुहुं अइप्राण्डियउ दीसह सच्च पढंतु ।
कहिमा कइअहं आविसइ अम्हकेरो कन्त ॥ [ ]

भूतैः प्रोक्तं भौतिकं, भूतैर्यत्किञ्चित्प्रोच्यते, बुधैरेतद्भौतिकं पैशाचिकं भणितम् । दकारस्येह तकारो यथा-मालुतेवं तेवं नमह । तथा 'हृदय'स्थो यः पत्वमापद्यते, यथा—'हितपं कम्पेइ' इत्याद्यूह्यम् ॥३॥

ग्रन्थस्योभयप्रकारतामभिधत्ते—

छन्दोनिबद्धमच्छन्दमिति तद्वाङ्मयं द्विधा ।
पद्यमाद्यं तदन्यच्च गद्यं मिश्रं च तद्द्वयम् ॥४॥

इत्यमुना प्रकारेण तज्जगत्प्रतीतं, वाचां विकारो वाङ्मयं शास्त्रं द्विधा, द्विप्रकारं भवति । एकं छन्दोनिबद्धं मात्रावर्णगणबन्धभेदात् छन्दसा निबद्ध, द्वितीयं अच्छन्दः छन्दोऽपेतं, आदौ भवं आद्यं, प्रथमं छन्दोनिबद्धं पद्यं प्रतिपाद्यते, तदन्यत् तस्मादन्यत् छन्दोविरहितम् गद्यं पठ्यते । च पुनः, तयोर्द्वयं तद्द्वयं छन्दोनिबद्धाऽच्छंदसोर्द्वयं मिश्रं भण्यते । उपलभ्यते च गद्यपद्यात्मकं चम्पूकथादिनाटकप्रभृतिकं च मिश्रम् ॥४॥

वृत्तदोषानपनिनीषुः आह—

अदुष्टमेव तत्कीर्त्यै स्वर्गसोपानपङ्क्तये ।
परिहार्यानतो दोषां[2]स्तानेवादौ प्रचक्ष्महे ॥५॥

तत् काव्यं, अदुष्टमेव अपगतदोषमेव, कीर्त्यै यशसे भवति । किंविशिष्टायै ? स्वर्गसोपानपङ्क्तये- स्वर्गस्य त्रिविष्टपस्य, सोपानपङ्क्तिरिव आरोहणपरम्परेव सोपानपङ्क्तिस्तस्यै । यथा कश्चित्पुमान् सोपानावल्ल्याऽतीवोच्चावासमारोहति, तथा तदभिज्ञः सम्यक्कवित्वलब्धिस्फूर्तिमत्ताकप्राज्यप्रताप- प्रसरणोद्भूतसितकरसितकीर्तिलक्षणारोहणश्रेण्या त्रिदिवसौधमध्यमध्यास्ते, कविकीर्तेस्तत्रापि व्याप्रिय- माणत्वात् । अतो अस्मात्कारणात्, तानेव दोषान् आदौ प्राक् प्रचक्ष्महे वयं ब्रूमहे । कीदृशान् ? परिहार्यान्, परिहर्तुमर्हाः परिहार्याः तान् ॥५॥

---

2. परिहार्याः ततो दोषा—पा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काव्ये दोषत्रैविध्यं पदवाक्यार्थदोष[3]भेदात् । तत्र प्रथमं पदविषयकं दोषाष्टकं उद्दिशति–

अनर्थकं श्रुतिकटु व्याहतार्थमलक्षणम् ।
स्वसंकेतप्रक्लृप्तार्थमप्रसिद्धमसम्मतम् ॥६॥
ग्राम्यं यच्च प्रजायेत पदं तन्न प्रयुज्यते ।
क्वचिदिष्टा च विद्वद्भिरेषामप्यपदोषता ॥७॥ (युग्मम्)

नास्ति अर्थः प्रयोजनं यस्य तदनर्थकम् १ । श्रूयतेऽनया श्रुतिः, चादित्वात् क्तिस्तत्र; श्रवणे कटु दुःसहं श्रुतिकटु २ । व्याहतो विरुद्धोऽर्थो यस्य तद् व्याहतार्थम् ३ । लक्ष्यतेऽनेनेतिलक्षणं, न विद्यते लक्षणं शब्दशास्त्रोक्तरूपं यत्र तदलक्षणम् ४ । स्वसंकेतेन स्वाभिप्रायेण, प्रक्लृप्तो रचितोऽर्थः यस्य तत् स्वसंकेतप्रक्लृप्तार्थम् ५ । क्वचन नये प्रणीतमपि यन्न तथा प्रसिद्धं तदप्रसिद्धम् ६ । यन्न कविसमयाभिमतं तदसंमतं ७ इत्यभिधीयते । ग्रामे भवं ग्राम्यं, ग्रामीणलोकवाक्सदृक्षमित्यर्थः ८ । यत्पदमनर्थकं प्रादुर्भवेत् बुधैः तत्पदं न प्रयुज्यते,[4] काव्ये हि तादृक्पदस्यानभ्यर्हितत्वात् । यच्चेत्यत्र वक्ष्यमाणसमुच्चयाद्यर्थाभिधायकचशब्दस्य सम्बन्धादयमर्थः । च पुनः, यत्पदं श्रुतिकटु भवति तत्पदं नानीयते । एवमितः आरभ्य ग्राम्यमित्येतत्पदावधि सर्वत्र सम्बन्धनीयम् । च पुनः, क्वचन अनुवादोपहासादौ विद्वद्भिः पुराणविचक्षणैः एषामनर्थकादीनामप्यदोषता निर्दोषता इष्टा कथिता । यथा–

"मुखं चन्द्राश्रयं धत्ते श्वेतश्मश्रुकराङ्कुरैः ।

अत्र हास्यरसोद्देशे—

ग्राम्यत्वं गुणतां गतः ॥' १.६–७॥ युग्मम् ॥ [सिंहदेवगणिवृत्तौ २.७]

यथोद्दिष्टानर्थकादिदोषस्वरूपं विवक्षुराह—

प्रस्तुतेऽनुपयुक्तं यत्तदनर्थकमुच्यते ।
यथा विनायकं वन्दे लम्बोदरमहं हि तु ॥८॥

प्रस्तुतेऽपक्रमभाविते पदसमूहात्मके वाक्ये, यन्नोपयुक्तं अनुपयुक्तं अनुपयोगि[गी?] भवति, तत्पदमनर्थकसंज्ञं दूषणमभिधीयते । अत्रोदाह्रियते । यथेति दृष्टान्तोपन्यासे 'अहं विनायकं वन्दे' इत्येतावत्यभिहिते अर्थसिद्धौ जातायां लम्बोदरमिति स्वरूपमात्रवाचकाभिधानमनर्थकम् । 'हि तु' इति च पादपूरणार्थं गृहीतमप्यनर्थकम् । यत्तु वक्ता आह्लादसाध्वसादिवलात् द्वित्रिः पदं प्रयुंक्ते, तत्र स्थलेऽयं दोषो न स्यात् । यदाह—वक्ता हर्षभयादिभिराक्षिप्तमनाः स्तुवन् तथा निन्दन् यत्पदमसकृद्ब्रूयात् तत्पुनरुक्तं न दोषाय १ । यथा—

जय जय बर्बराजष्णो विष्णोरवतार भूपजयसिंह ।
अरिकेशहस्त हस्तव्यावृत्तिदुर्वारवीर भुवनेऽस्मिन् ॥ [सिंहदेवगणिवृत्तौ २.८]

इत्येतत्प्रभृतिषु जयजयेतिशब्दमन्तरेण हर्षाद्यर्थप्रत्ययो न जायते । हस्तध्वन्योरर्थस्य पार्थक्यात् पुनरुक्ताभासत्वमेव । अहिरहिरित्यादौ दरेण पौनरुक्त्यम् । तस्याऽप्यनर्थकेऽन्तर्भावोऽवसेयः । यदुक्तेऽनर्थसंबद्धसमुदयार्थशून्यं दशदाडिमानि षडपूपादिवाक्यमनर्थकम् ॥८॥

---

3. 'दोष'–ल. पुस्तके नास्ति । 4. 'ग्रामे भवं...न प्रयुज्यते'—इदं ब. पुस्तके नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

निष्ठुराक्षरमत्यन्तं बुधैः श्रुतिकटु स्मृतम् ।
एकाग्रमनसा मन्ये स्रष्ट्रेऽयं निर्मिता, यथा ॥९॥

यत्पदमत्यन्तं, नियते तिष्ठन्तीति निष्ठुराणि, श्वसुरेत्युरे निपात्यते । न क्षरति न चलति आत्मा एभ्य इत्यक्षराणिः, निष्ठुराणि कर्कशानि, अक्षराणि वर्णाः, यत्र तन्निष्ठुराक्षरं परुषाक्षरं स्यात् । बुध्यन्ते बुधाः, तैः तत्पदं श्रुतिकटु कर्णकठोरं भणितम् । यथा निदर्शने- 'अहमेवं मन्ये ।' स्रष्ट्रा ब्रह्मणा, एकाग्रं सावधानं मनो यस्य सः एकाग्रमनाः, तेन तथा सता । एषा काचन सुन्दरी निर्मिता जगदेकस्पृहणीयसौन्दर्यसम्पत्त्यतिशया अत्यद्भुतलावण्यरूपरमणीयत्वात् स्रष्ट्रेति पदमिह श्रुतिकटु मन्तव्यम् ॥९॥

व्याहतार्थं यदिष्टार्थबाधकार्थान्तराश्रयम् ।
रतस्त्वमेव भूपाल भूतलोपकृतौ, यथा ॥१०॥

इष्टार्थः अभिधातुं कामितोऽर्थः, तस्य बाधकं यदर्थान्तरमाश्रयतीति इष्टार्थबाधकार्थान्तराश्रयम्, तत्पदं लब्धवर्णैः व्याहतार्थं निगद्यते । यत्पदमीहितार्थं तद्विपरीतमर्थान्तरं च ब्रूते, तद्व्याहतार्थमित्याकूतम् । यद्वा प्रकृतार्थमुत्सृज्य यत्पदमितरार्थं लक्ष[क्ष्य]ते, तद्व्याहतार्थम् । यथा—हे भूपाल, हे काश्यपोपते, भूतलस्य क्ष्मातलस्य, उपकृतिः उपकारिता, तत्र त्वमेव रतः परायणः इति इष्टार्थः, तस्य बाधकम् । -भूतानां प्राणिनां, लोपकृतौ वधकरणे त्वमेव रत इत्यनिष्टमर्थान्तरं आश्रयति भूतलोपकृतिपदम् ॥१०॥

शब्दशास्त्रविरुद्धं यत्तदलक्षणमुच्यते ।
मानिनीमानदलनो यथेन्दुर्विजयत्यसौ ॥११॥

प्रेक्षावद्भिः तत्पदमलक्षणं प्रतिपाद्यते यत्पदं शब्दशास्त्रेण विरुद्धं शब्दशास्त्रविरुद्धं, व्याकरणविरुद्धं भवति । यथेति निदर्शनार्थे । यथा—असौ इन्दुः विजयति विशेषेण जयति । कीदृगिन्दुः ? मानिनी० मानिनीनां मानं गर्वं, दलयति विध्वंसयति, इति मानिनीमानदलनः । एतेन कुमुदबान्धवेऽभ्युदिते कन्दर्पोन्मदातिरेक्येण विह्वलाः प्रमदाः भर्तृषु अहंकृतिमत्योऽपि मानं हरन्तीति सूचितम् । इह 'परावेर्जेः' [हे. व्या. ३.३.२८] इति शब्दशास्त्रसूत्रेण 'विजयते' इत्येतादृक्षे आत्मनेपदे [दि] आसादिते, विजयतीति । परस्मैपदविधानं व्याकरणविरुद्धम् ॥११॥

स्वसंकेतप्रक्लृप्तार्थं नेयार्थान्तरवाचकम् ।
यथा, विभाति शैलोऽयं पुष्पितैर्वानरध्वजैः ॥१२॥

विपश्चिद्भिः तत् स्वसंकेतप्रक्लृप्तार्थं दूषणं प्रोद्यते । नेयात् प्रतिपाद्यात्, अभिधेयाद्यर्थान्तरं विसदृशोऽर्थः, तस्याभिधायकं यत्पदं भवति । यथा—अयं, शिलानामयं शैलः, शिलाः सन्ति अत्र इति वा । "ज्योत्स्नादित्वादण्" [हे. व्या. ७.२.२४] शिखरी पुष्पितैर्वानरध्वजैः अर्जुनवृक्षैर्विराजते । अर्जुनतरुरिह नेयो गम्यः, तस्मादर्थान्तरं अर्जुनाह्वयः पाण्डवः, तदभिधायकम् । 'वानरध्वज' इति पदं न त्वर्जुनपादपस्य, यत एव कपिध्वजत्वं अर्जुनपाण्डवे भ्रमरे द्विरेफवत्, कविसंकेतितमदुष्टं भवति । अत एव स्वसंकेतितमदुष्टं भवति । अत एव स्वसंकेतप्रक्लृप्तार्थमिदं दुष्टमवसेयम् ॥१२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यस्य नास्ति प्रसिद्धिस्तदप्रसिद्धं विदुर्यथा ।
राजेन्द्र ! भवतः कीर्तिः चतुरो हन्ति वारिधीन् ॥१३॥

मनीषिणः तदप्रसिद्धं विदुः, यस्य पदस्य यस्मिन्नर्थे प्रसिद्धि[द्धिः] कविरूढिर्न विद्यते । यथा—'हे राजेन्द्र' इत्यत्र "लोपशि पुनर्न सन्धिः" इत्यनेन च आदेशसम्बन्धिनि लोपशिसन्धिनिषेधेऽपि[5] राज्ञामिन्द्रः राजेन्द्रः इत्यादौ नकारलोपश्यपि सन्धिः । न हि नकारः कस्यचिदादेशः तदामन्त्रणे । तथा पृथिवीशक्र ! भवतः तव, कीर्तिः अभिख्या, चतुरः चतुःसंख्याकान्, वारिधीन् सागरान्, हन्ति गच्छति । इह "हनक् हिंसागत्योः" इति धातुपाठेऽधीतसिद्धोऽपि [पा. धा. पा. २.२] गत्यर्थो हन्तिः गत्यर्थेऽप्रतीतत्वात्, कविभिरप्रयुक्तमानत्वाच्च गत्यर्थे न प्रयुज्यत इति भावः ॥१३॥

शक्तमप्यर्थमाख्यातुं यन्न सर्वत्र सम्मतम् ।
असम्मतं, तमोम्भोजं क्षालयत्यंशवो रवेः ॥१४॥

यत्पदं अर्थं वाच्यमाख्यातुं, शक्तं क्षममपि, सर्वत्र ग्रन्थेषु, न संमतं नोभिमतं, सुधीभिस्तदसम्मतं प्रोच्यते । अर्थयुक्तिबलादिह 'यथा'शब्दोऽध्याहार्यः । यथा रूयते स्तूयते रविः । 'स्वरेभ्यः' [हे. व्या. १.३.३०] इर् इति इः । तस्य रवेः आदित्यस्य अंशवः, अश्नुवते द्यामंशवः, 'अशेरान्तोऽन्तश्चेति' उन्, [हे. उ. ७१९] ऍतिश्च; मयूखाः । तम एवाम्भोजं, तत्तथा । ध्वान्तकर्दमं क्षालयन्ति । अम्भसो जायते स्म इति व्युत्पत्त्यांऽम्भोजं जम्बालं इत्यन्वर्थता विद्यते । तथापि प्रवीणानां अम्भोजरवः कमल एवाभिमतो न पङ्के, तत्रैव तस्य रूढत्वात् । प्रपूर्वः स्मृतिविस्मरणार्थे प्रख्यातो न तु प्रकर्षार्थे । तथा चाभाणि नैषधे—

नाक्षराणि पठता किमपाठि प्रस्मृतः किमथवा पठितोऽपि । इति [नै. ५. १२१]

आङ् आदिमो, वहतेर्विधानार्थे, न तु वहने सम्मतः चित्रावही स्फुरद्भिया चित्रकरीत्यर्थः । इत्थं लब्धवर्णाभिमतमेवपदं प्रयोक्तव्यं नान्यदित्यभिप्रायः ॥१४॥

यद्यत्रानुचितं तद्धि तत्र ग्राम्यं स्मृतं, यथा ।
छादयित्वा सुरान्पुष्पैः पुरो धान्यं क्षिपाम्यहम् ॥१५॥

यजते यद् 'तनित्यजियजीति उद्' । [हे. उ. ८३५] यत्पदं यत्र स्थानेऽनुचितं भणितुमनर्हं भवति, हि निश्चितं, तनोति, तत्तत्र स्थाने कोविदैः ग्राम्यं स्मृतम् । यथा इति उदाह्रियते-अहं सुरान्, सुरत् ऐश्वर्यदीप्त्योः, सुरन्तीति सुराः, 'नाम्युपान्त्येति कः' [हे. व्या. ५. १.५४] सुन्वन्तीति वा । 'रुज्य जि[जी ?]त्रन्ति इत्यादिना किन्, र. सुष्ठु, राजन्ते इति वा । क्वचिदिति डः, तान् सुरान् । पुष्पविकसने-पुष्यन्तीति पुष्पाणि, तैः प्रसूनैः, छादयित्वा । पुरः अग्रे, धान्यं, धन्यते धान्यं, धीयत इति वा, 'धाग्राजीत्यनः', [हे. उ. ३७९] धान्यत्वे सामान्येऽपीह धान्यमित्युक्ते कलमादिष्वेव संगतं, न तु मुद्गादौ । यथा-नीलोत्पलादिसंगतं उत्पलत्वं, स्वर्गसंगतं देवादि, व्योमसंगतं मेघादि, दिक्संगतं दिग्गजादि, वायुसंगतं वेगादि, धीसंगतं विचारणादि, शब्दसंगतं उदात्तादि, रूपादिसंगतं यशोनिन्दादि, नाट्यसंगतं भूकुंसादि, भोगिसंगतं कञ्चुकादि, वारिसंगतं च नौकादि ।

5. पा. पुस्तके अधिकमिदम्-'सारस्वत पाणिनीय-व्याकरणादि विरुद्धत्वादेतन्न युक्तियुक्तमिति चिन्तनीयमितिमि ।'

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तथा अत्रापि धान्यं कलमव्रीह्यादि क्षिपामि । छादयित्वा क्षिपामीति चैतदुभयमप्ययोग्यं, ग्रामीण वाक्सदृक्षं विलोक्यते । 'अहं देवान् पूजयित्वा बलिं ढौकयामि' इतीदं वक्तुमर्हं वचनम् । तथा ये केचन शब्दाः ह्रीक्षेपाऽमङ्गलप्रत्ययविधायकास्तेऽपि संसदनर्हत्वात् ग्राम्या एव । क्षेपवाचको यथा—वात प्रसरीसर्तिवातशब्दोपानमरुच्छङ्काभिधायी इत्यादयः । भगवतीभगिनीशिवलिङ्गप्रमुखास्तु जन प्रख्यातत्वान्न दुष्टाः । उक्तं च—

लोकव्यप्रतिपत्तव्यो लौकिकोऽर्थो बुधैरिह ।
प्रतिलोकव्यवहारं सदृशौ बालपण्डितौ ॥१॥ [ सिंहदेवगणिवृत्तौ २.१५ ]

क्वचन एतेषां च वयस्येऽस्मदादासोः, ते तवाहं, ससर्वदेतिप्रभृतिस्थले वकारदकारप्रमुखानर्थकादीनामप्यनुकरणार्थत्वान्निर्दोषता मन्तव्या । युगपदर्थवादजुगुप्सनयोरभिधेययोः व्याहतार्थमपि न दुष्टं—

'रतस्त्वमेव भूपाल भूतलोपकृतौ सदा' ।

अत एव यथा स्वैरं तव अपूर्वाश्च कीर्तयः अपूर्वाश्चित्राः कीर्तयः । यद्वा अकारप्रथमाश्च अकीर्तयः इत्यैदम्पर्यम् ॥१५॥

**पदात्मकत्वाद्वाक्यस्य तद्दोषाः सन्ति तत्र हि ।**
**अपदस्थास्तु ये वाक्यदोषास्तान् ब्रूमहेऽधुना ॥१६॥**

तस्य पदस्य दोषास्तद्दोषाः अनर्थकादिकाः, हि निश्चितं, तत्र वाक्ये सन्ति । कस्मात्? उच्यते विवक्षितमनेनेति, कृत्ययुटोऽन्यत्रापि चेति ण्यण् । तिङ्सुबन्तसङ्घातसम्बन्धार्थं वाक्यं उच्चैः पठति । तथा चाह भाष्यकारः—" आख्यातं साव्ययकारकविशेषणं वाक्यं, तिङ् ग्रहणं, क्रियाशब्दोपलक्षणम् ।"[6] 'देवदत्तः कटं कृतवान्' इत्याद्यपि वाक्यमेव । तस्य वाक्यस्य पदात्मकत्वात्, पदसमुदायरूपत्वात् सदोषपदाङ्कितं वाक्यमपि सदोषं, निर्दोषपदसंपृक्तं वाक्यं निर्दोषम् । यथा पुराऽभिहिते श्लोके—'चतुरो हन्ति वारिधीन्' इतीह 'हन्ति' दुष्टक्रियापदेन कृत्स्नमपि वाक्यं दुष्टं जातम् । ये तु दोषाः पदे तिष्ठन्ति इति पदस्थान्, अपदस्थाः पदेषु न विद्यन्ते वाक्ये च वर्तन्ते तान् वाक्यदोषान् अष्टौ । 'वाक्यार्थदोषाः' इति पाठे वाक्यार्थस्य दोषाः वाक्यार्थदोषाः, तानपि अस्मिन् कालेऽधुना, वयं ब्रूमहे स्फुटं वदामः ॥१६॥
ते के दोषा इत्यभिधित्सुराह—

**खण्डितं व्यस्तसम्बन्धमसम्मितमपक्रमम् ।**
**छन्दोरीतियतिभ्रष्टं दुष्टं वाक्यमसत्क्रियम् ॥१७॥**

एतादृशं वाक्यं दुष्टं सदोषं भवति—यत् खण्ड्यते खण्डितम् १; व्यस्यते स्म व्यस्त, सम्बन्धनं सम्बन्ध, व्यस्तः सम्बन्धो यत्र तद् व्यस्तसम्बन्धम् २; न सम्मितं असम्मितं, अतुल्यम् ३; क्रमणं क्रमः, अपगतः क्रमो यस्मात्तदपक्रमम् ४; यम्यते उपरम्यतेऽनया यतिः, भ्रश्यते स्म भ्रष्टम्; ततः छन्दश्च रीतिश्च यतिश्च छन्दोरीतियतयः, ताभ्यो भ्रष्टं छन्दोभ्रष्टं ५, रीतिभ्रष्टं ६, यतिभ्रष्टं ७, नास्ति सती विद्यमाना क्रिया यत्र वाक्ये तदसत्क्रियं ८ च प्रादुष्यात् ॥ [१७] ॥

---

6. अ. सूत्र २.१.१ इत्येतस्योपरि ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

क्रमेण वाक्यदोषाणां स्वरूपं निजगदीति—

**वाक्यान्तरप्रवेशेन विच्छिन्नं खण्डितं मतम् ।**
**यथा "पातु सदा स्वामी यमिन्द्रः स्तौति वो जिनः" ॥१८॥**

वाक्यं वचनं, अन्तरे परवाक्यस्य प्रवेशेन विच्छिन्नं त्रुटितं सत् खण्डितं जायेत । यथा—जिनो जयति रागद्वेषमोहानिति जिनः; 'जीण् शीदीबुद्ध्यविमीलयः किदि' [हे. उ. २६१] ति नः । स्वं अस्य अस्तीति स्वामी, स्वान् मिन्ति ईशे इति मिनि दीर्घश्च । वः युष्मान् पातु । वाक्यमिदं 'इन्द्रो यं जिनं सदा सर्वदा स्तौति' इत्येतेन वाक्यान्तरप्रवेशेन विच्छिन्नत्वात् खण्डितप्रायिकं अतः चोक्तम् । अन्यथाऽलङ्कारचूडामणौ 'क्वचित् गुणोऽपि' इति प्रतिपादनेन यमकपदभूयस्त्वे वाक्यान्तरप्रवेशेऽपि निर्दोषत्वमिति निर्दोषवचो विरुद्धयेत । अतो यथोक्तव्याख्यानमेव साधीयः ॥१८॥

**सम्बन्धिपददूरत्वे व्यस्तसम्बन्धमुच्यते ।**
**यथाऽऽद्यः सम्पदां ज्ञाता देयात् तत्त्वानि वोऽर्हताम् ॥१९॥**

अर्थात्, परस्परं सम्बन्धोऽस्त्येषां तानि सम्बन्धीनि, सम्बन्धीनि च तानि पदानि च, तथा तेषां दूरत्वम् । तस्मिन् सम्बन्धिपददूरत्वे सति तज्ज्ञैः व्यस्तसम्बन्धवाक्यदूषणं निगद्यते । यथा—अर्हतां चतुस्त्रिंशतं अतिशयान् [यां?] सुरेन्द्रादिकृतां पूजां चार्हन्तीति अर्हन्तः । सुग् द्विषार्हः सत्रि शत्रुस्तुत्यः, इत्यतृश् प्रत्यये, तेषां आदौ युगादौ, भव आद्यः युगादौ । घनजाड्यव्याप्ताखिलजीवोपकारविधायिनिखिलकलाकलापराज्यनीतिप्रभृतिप्रकाशनोपपन्नादस्मात्प्रसिद्धविशेषणात् वृषभ इति विशेष्यपदं लभ्यते । ततोऽर्हतामाद्यो वृषभप्रभुः, वः, युष्मभ्यमिति । युष्मच्छब्दस्य चतुर्थीबहुवचने, 'युष्मभ्यं' इत्येवंरूपस्य बहुवचनस्य 'वस् नसौ' इत्यनेन वसादेशे, सम्पदं सम्पदनं सम्पत् तां ऋद्धिं देयात् । किंलक्षणः? तत्त्वानि ज्ञाता । इह अर्हतामाद्यः तत्त्वानि ज्ञातेत्यर्हतां सम्बन्धिपदानां दूरीभूतत्वमवसेयम् । यत्र क्वचन यस्य पदस्य सम्बन्धि यत्पदं तत्तत्रैव सम्बद्धयतेऽत्र अर्थतो व्यस्तसम्बन्धं न स्यात् । एकस्मिन्नेव वाक्ये तद्दूरत्वे सति व्यस्तसम्बन्धं भवेदित्याशयः ॥१९॥

**शब्दार्थौ यत्र न तुलाविधृताविव सम्मितौ ।**
**तदसम्मतमित्याहुर्वाक्यंवाक्यविदो, यथा ॥२०॥**

यत्र प्रबन्धे, शब्दश्च अर्थश्च शब्दार्थौ, तुलाविधृताविव सम्मितौ तुल्यौ एव न स्तः । यथा—तोल्यते तुलाभिदादिन्वादिङ्साधुस्तत्र तुलायां विधृतौ पदार्थौ द्वयोः पार्श्वयोः सम्मितौ भवतः, तथा अत्र न शब्दभूयस्त्वेऽर्थाल्पीयस्त्वात् । वाक्यविदो विपश्चितः, तद्वाक्यमसम्मितमित्याचक्षते । यथा इति अभिधास्यमानदृष्टान्तार्थे ॥२०॥

**मानसौकः पतद्यानदेवासनविलोचनः ।**
**तमोरिपुविपक्षारिप्रियां दिशतु वो जिनः ॥२१॥**

यथा—जिनो देवाधिदेवो, वः युष्मभ्यं, तमसः ध्वान्तस्य, रिपुः अराती रविः, तस्य विपक्ष राहुः, तस्यारिः केशवः, तस्य प्रिया; प्रीणाति प्रिया । नाम्युपान्त्यप्रीकृ इति कः, [हे व्या ५. १. ५४] तां श्रियं दिशतु । कीदृशः? मानसौक० मानसे मनः एव मानसं, तस्मिन् सरसि; उच् समवाये, उच्यति

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समवैति ओकः । परुजेत्यादिना घञि । यद्वा उचेः असुन्न्यक्वादित्वात् कत्वे सान्तः । ओको वेश्म यस्य सः मानसौकाः, स चासौ पतन् विहंगश्च मानसौकः। पतन् राजमरालः, स एव यानं वाहनं यस्य सः । तथा स चासौ देवो हिरण्यगर्भश्च, तस्यासनं सरोरुहं, तत्तुल्ये । विशिष्टे लोचने यस्य असौ । तथा कमलविलोचन इत्येतावता एवार्थसिद्धौ स्तोक एवार्थे शब्देनातिभूयिष्ठत्वमसम्मितम् । अनल्पार्थमल्पाक्षरमपि गुणाय स्यादिति भावः ॥२१॥

**अपक्रमं भवेद्यत्र प्रसिद्धक्रमलङ्घनम् ।**
**यथा भुक्त्वा कृतस्नानो गुरून् देवाँश्च वन्दते ॥२२॥**

यत्र वाक्ये प्रसिद्धश्चासौ क्रमश्च तथा, तस्य लङ्घनमतिक्रमणं प्रसिद्धक्रमलङ्घनं विधीयते, प्रेक्षावद्भिः तदपक्रमं भण्यते । यथा—स्नात्वा, सुरानभ्यर्च्य, गुरून् नमस्कृत्य च भोजनं विधेयमिति क्रमः । विपरीतविधाने क्रमलङ्घनं यथा भुक्त्वाऽकृतस्नान, इत्यादि सुगमम् ॥२२॥

**छन्दःशास्त्रविरुद्धं यच्छन्दोभ्रष्टं हि तद्यथा ।**
**स जयति जिनपतिः परब्रह्ममहानिधिः ॥२३॥**

यद् वृत्तं छन्दःप्रतिपादकं शास्त्रं छन्दःशास्त्रं, वृत्तरत्नाकरप्रभृतिकम्, तस्माद्विरुद्धं भवति । हि निश्चितं, छन्दःशास्त्रविशारदैः तत् छन्दोभ्रष्टं अभिधीयते । यथा – स जिनपतिर्जयति । किंलक्षणः ? परब्रह्ममहानिधिः–परब्रह्मणः परब्रह्मस्वरूपस्य, महांश्चासौ निधिश्च, स तथा । तृतीयचरणे–'स जयति जिनपतिः' इत्यत्र 'पञ्चमं लघु सर्वत्र' [श्रुतबोध-११] इत्यादिश्लोकस्य लक्षणं नास्ति । तथा पादादौ नगणस्य पातादिदमसङ्गतम् । भणितं च वृत्तरत्नाकरादौ—

'वक्तुं नाद्यान्नसौ स्याताम्' इति [२. २१] नगणसगणौ, यद्वा 'नभौगणौ न पदादौ स्तः' इति [?] ततोऽवसेयम् ॥२३॥

**रीतिभ्रष्टमनिर्वाहो यत्र रीतेर्भवेत्, यथा ।**
**जिनो जयति सः श्रीमानिन्द्राद्यमरवन्दितः ॥२४॥**

प्रारब्धायाः रीतेः यत्र अनिर्वाहः निर्वाहो न स्यात्, तद् रीतिभ्रष्टं सुधीभिः प्रतिपाद्यते । यथा सः श्रयतीत्येवंशीला श्रीः । दि शु द्रि [द्री ?] त्यादिना [हे. व्या. ५. २. ८३] क्विपि दीर्घो निपात्यते । श्रीः नित्यमस्मिन्नस्तीति श्रीमान् । नित्ययोगेऽस्त्यर्थे मतुः । जिनो भगवान् जयति । कीदृक्षः ? इन्द्रादिसुरस्तुतः जिनो जयति । सः श्रीमानितीह चरणेऽसमस्तपदत्वाद्वैदर्भी रीतिः । पुरः स्थिते 'इन्द्राद्यमरवन्दितः' इत्यस्मिन्पादे भूरिसमासवत्वाद् गौडीया रीतिः । पाञ्चाली यथा—

द्वित्रिपदा पाञ्चाली लाटीया पञ्च सप्त वा यावत् ।
शब्दाः समासवन्तो भवति यथाशक्ति गौडीया ॥१॥ [रु. का. २-५] (२४)

**पदान्तर्विरतिप्रोक्तं यतिभ्रष्टं बुधैर्यथा ।**
**नमस्तस्मै जिनस्वामिने सदा नेमयेऽर्हते ॥२५॥**

पदं हि विभक्त्यन्तं, तस्यान्तर्मध्ये विरतिर्यतिः यत्र तत्तथा । यत्पदं पदान्तविरतिर्भवेत्, प्रज्ञावद्भिः तद्यतिभ्रष्टं प्रणी[भणि ?]तम् । यथा— तस्मै भुवनविख्याताय, नयत्यन्तं नेमिः, "नीदलिभ्यां

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मिरिति मिः"; कर्मवल्लीवनोच्छेदे । नेमिवत् चक्रधारावत् नेमिः, तस्मै नेमये नमः । कथंभूताय? अर्हन्ति इन्द्राद्यर्चामिति अर्हम्, तस्मै अर्हते । 'रूढिर्योगमपहरती'ति न्यायेन अर्हच्छब्दस्य तीर्थकृतिरूढत्वात् 'अर्हति पामरीं पूजां' इत्यर्हन् इत्यादियौगिकेनातिव्याप्तिः । तथापि 'न्यायाः स्थविरदृष्टिप्रायाः' इति मत्वा 'जिनस्वामिने' इति विशेषणमाह । जिनानां सामान्यकेवलिनां स्वामी, तथा तस्मै जिनार्याय । इह 'स्वामिने' इति पदे प्रागष्टाक्षरात्मकस्यां हेः पूर्णत्वात् 'स्वामी'त्यत्र पदान्तर्यतिः, विहितावशिष्टा 'ने' इति वर्गः । पुरःस्थं तुर्यपादमाश्लिष्टवान् च, इत्थं न विधेयम् ॥२५॥

सत्क्रियापदहीनं यत्तदसत्क्रियमुच्यते ।
यथा, "सरस्वतीं पुष्पैः श्रीखण्डैर्घुसृणैः स्तवैः" ॥२६॥

यत्काव्यं शुद्धक्रियापदविरहितं भवति, संख्यावद्भिः तदसत्क्रियं निगद्यते । यथा—सरस्वती-सरः प्रसरणमस्ति अस्याः सा सरस्वती । 'तां सरस्वतीं' इत्युक्त सरस्वत्यभिधानायां वनितायामतिव्याप्तिः । तदर्थं 'देवी' इति पदम् । एतावता उक्ते इन्द्रमहिष्यादावतिव्याप्तिः । तन्निवृत्त्यै 'सरस्वतीं' इति पदम् । ततः 'सरस्वतीं देवीं पुष्पैरभ्यर्चयामि' । श्रिया खण्डयन्ति श्रीखण्डान्, इ[ए]तैः चन्दनैः । घृस्यते घृष्यतेऽङ्गमेभिः, घुषन्ते कान्तिं कुर्वन्ति वा; 'घुसृणा निभृणतृणे तिणे' निपात्यते । तैः कश्मीरजन्मभिः विलिम्पामि । स्तवैः स्तोत्रैः नौमि इत्यादिक्रियाणां अनानयनादसत्क्रियावं; तथा न विद्यते सती मङ्गलार्थक्रिया यस्मिन्नित्यन्वर्थाश्रवणात् मङ्गलार्थक्रियाहीनत्वेऽपि कुत्रचन न दोषः यथा—

मा भुजङ्गास्तरङ्गिण्यो मृगेन्द्राः क्रूरदन्तिनः ।
भवन्तं वत्स सम्प्राप्तं पन्थानं, सन्तु ते शिवाः ॥१॥ [ सिंहदेवगणिवृत्तौ २.२६ ]

हे वत्स, पन्थानं सम्प्राप्तं भवन्तं त्वां, भुजङ्गाः सर्पाः, मा दाक्षुः इत्यादौ 'मा' शब्दः प्रत्येकं क्रियया सम्बध्यते । तरङ्गिण्यः तटिन्यः त्वांऽमानैषुः, मृगेन्द्राः भवन्त मा दाषुः। क्रूरदन्तिनो मा रौत्सुरिति क्रियाणामसत्वेऽपि दोषाभावः । 'हे वत्स, ते शिवाः कल्याणकारकाः भवन्तु' इति मङ्गलार्थक्रिया चेत्प्रयुक्ता स्यात् । क्रियागुप्तेषु पुनरसत्क्रियाभासत्वमेव, गुप्तक्रियायाः सत्वात् । यथा—

राजन् नवघनश्याम निस्त्रिंशाकर्षदुर्जय ।
आकल्पं वपुषामेतां विद्विषोऽद्य रणे बहून् ॥१॥ (२६)

अथ वाक्यार्थदोषान् व्याचष्टे—

देशकालागमावस्थाद्रव्यादिषु विरोधिनम् ।
वाक्येष्वर्थं न बध्नीयाद्विशिष्टं कारणं विना ॥२७॥

वाक्यार्थवेत्ता प्रवीण एतादृशान् अर्थान् वाक्येषु न बध्नीयात् । किंरूपान्? दिश्यते देशः, कलयति क्षपयति सर्वभावान्; कल्यतेऽसौ इति वा काल । आगम्यते आगमः, अवस्थानं अवस्था द्रुतुल्यं द्रव्यं द्रोर्भव्ये इति यतः ततो द्रन्द्वः । देशश्च, कालश्च, आगमश्च, अवस्था

7. 'लौकिकन्यायाञ्जल्यां' जेकब महोदयैरुद्धृतमिदम्, मूलं तु तत्र न दत्तम् । एवमेव 'लौकिकन्यायशास्त्रार्थकला'यामपि ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

च द्रव्यं च देशकालागमावस्थाद्रव्याणि; तानि आदौ येषां ते तथा। तेषु यथाक्रमं 'विरोधि' शब्दः प्रत्येकमभिसम्बध्यते। तदनु देशविरोधिनः, कालविरोधिनः, आगमविरोधिन अवस्थाविरोधिनः द्रव्यविरोधिनः। आदिशब्दाज्जातिगुणक्रियाप्रभृतयः आदीयन्ते विशिष्टं हेतुमन्तरेण ॥२७॥

देशाद्यखिलोदाहरणाभिधायकं काव्यं विवृणुते—

**प्रवेशे चैत्रस्य स्फुटकुटजराजीस्मितदिशि**
**प्रचण्डे मार्तण्डे हिमकणसमानोष्ममहसि।**
**जलक्रीडायातं मरुसरसि बालद्विपकुलं**
**मदेनान्धं विध्यन्त्यसमशरपातैः प्रशमिनः ॥२८॥**

प्रशमिनः प्रकृष्ट शमो येषां ते प्रशमिनः क्षान्तिपरायणाः मुनीश्वराः। असमा विषमाः, ये शरपाताः बाणप्रहाराः, तैः। बालाश्च ते द्विपाश्च बालद्विपः, तेषां कुलं कलभवृन्दम्। 'विध्यन्ति' इति आगमविरुद्धं १। चन्द्रान्वितया चित्रया युक्ता पूर्णमासी चैत्री, सा अस्यास्तीति चैत्रः, तस्य चैत्रस्य मासस्य प्रवेशनं प्रवेशः, तस्मिन्। प्रवेशेऽन्तर्विगाहने सति। कीदृशे? कुटजं स्फुटविकसने स्फुटन्ति इति स्फुटाः। नाम्युपधात् के। स्फुटाः विकसिताः, कुटजाह्वाः तरवः, तेषां राजी ततिः, तया स्मिताः ईषद् हसिताः दिशो यत्र स तथा, तस्मिन्। वर्षर्तौ हि कुटजाः स्फुटीभवन्ति, न वसन्तर्तौ इति कालविरुद्धम् २। पुनः अहर्मणौ प्रचण्डे सति। किंविशिष्टे? हिमकण० हिमस्य कणाः लेशाः, तैः सदृक्षं, उष्म तापः, महश्च प्रकाशो यस्य स तथा, तस्मिन्। द्रव्यविरुद्धमिदम् ३। किंलक्षणं द्विपकुलम्? म्रियन्ते उदन्ययैतेषु इति मरवः; 'भृमृश इत्युप्रत्यये' [हे. उ. ७१६] म्रियते पिपासुभिः अनुस्रियते सरः, 'असित्यस्,' तेषु [हे. उ. ९५२]; सरः मरुसरः, तस्मिन्। मरुस्थलीतडागे सलिलसुखोत्सवार्थं समागतमिति देशविरुद्धम् ४। पुनः किंविशिष्टम्? मदेनान्धम्। एतदवस्थाविरुद्धम् ५। यत्र विशिष्टं कारणं तत्र न दोषः। यथा—

तत्रारिरामाक्षिभवाश्रुशं[सं]वरैः महीश्वरोन्मूलितपत्रभङ्गिभिः।
द्रवीभवत्पङ्कजपङ्क्तिलाः किलाऽभवन् तडागा हि मरुस्थलीष्वपि ॥१॥ [ ]

तथा नैषधान्तःस्थं विरुद्धार्थनिबद्धं काव्यं दर्श्यते—

अस्य क्षोणिपतेः परार्ध्यपरया लक्ष्यीकृताः संख्यया
प्रज्ञाचक्षुरवेक्ष्यमाणतिमिरप्रख्याः किलाकीर्तयः।
गीयन्ते स्वरमष्टमं कलयता जातेन वन्ध्योदरा-
न्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधेः रोधसि ॥१[२]॥ [नै. १२.१०६].

इह मूकानां प्रकरस्य ज्ञानमनुचितं, कच्छप्याः क्षीरं न विद्यते, कुत्र तदुदधिः?[8] कुह च तत्तटम्? एतेनेत्युदितं यदमुष्य भूपतेरकीर्तयः वर्तन्त एव, न केचनाऽप्युद्गीयन्ते ॥२८॥

8. तदब्धिः–पु.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इति दोषविषनिषेकैरकलङ्कितमुज्ज्वलं सदा विबुधैः ।
कविहृदयसागरोत्थितममृतमिवास्वाद्यते काव्यम् ॥२९॥

विबुधैः प्राज्ञैः सदा सर्वदा, काव्यमास्वाद्यते । किमिव ? अमृतमिव । नास्ति मृतमत्रेत्यमृतं, तदिव । यथा-विबुधैः सुरैः, अमृतमास्वाद्यते । किंलक्षणं ? काव्यम् । इत्यमुना प्रकारेण, वेविषति देहमिति विषाणि । 'नाम्युपधात्के' [हे. व्या. ५.१.५४-नाम्युपान्त्य...कः ।] निषिच्यतेऽनेनेति निषेको निषेचनं वा । बहुवचने निषेकाः । ततोऽन्वये प्रागुक्ता दोषा एव विषाणि, तेषां निषेका मिश्रीभावाः, तैरकलङ्कितं अमलिनम् । तथा कवीनां हृदयं कविहृदयं, तदेव सागरोऽब्धिः, तस्मादुत्थितं उद्भूतम् । पुनः किंभूतम् ? उज्ज्वलं-उत् ऊर्ध्वं ज्वलतीत्युज्ज्वलम् । विशदतरत्वात् पीयूषमपि विषानांकितं सागरोत्पन्नं चोज्ज्वलं भवतीति भावः ॥२९॥

इति बृहत्खरतरगच्छे भट्टारकप्रभुश्रीजिनराजसूरिविजयिराज्ये,
श्रीसागरचन्द्रसूरिसंतानपट्टानुक्रमसंजात श्रीमद्वाचनाचार्यरत्नधीरगणिप्रवरविनेय[9]
वाचनाचार्यज्ञानप्रमोदगणिविनिर्मितायां वाग्भटालङ्कारवृत्तौ द्वितीयः परिच्छेदः ॥

*

9. बृहत्तर...प्रवरविनेय-इदं पा. पुस्तके नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# तृतीयः परिच्छेदः

अथौदार्यादीन् दशसंख्याकान् गुणान् व्याचिख्यासुरभिधत्ते—

**अदोषावपि शब्दार्थौ प्रशस्येते न यैर्विना ।**
**तानिदानीं यथाशक्ति[1] ब्रूमोऽभिव्यक्तये गुणान् ॥१॥**

वयं तान् गुणान् यथाशक्ति ब्रूमः व्यक्तं वदामः । कस्यै ? अभिव्यक्तये । अभि इति आभिमुख्येन, व्यज्यतेऽनयाऽभिव्यक्तिः, तस्यै प्रकटतायै । यैः गुणैः अन्तरेण निर्दोषावपि शब्दार्थौ मेधाविभिः न प्रशस्येते । अभिव्यक्तये इति तादर्थ्ये चतुर्थी । तेन यदि इह दोषाणामपोह एव गुणान् व्यञ्जयति, तथापि कतिपयाः ते, किंसंज्ञकाः, किंलक्षणा इत्यभिव्यक्तिर्न भवेत्, अतो 'भणामः' इति तात्पर्यार्थः ॥१॥

**औदार्यं समता कान्तिरर्थव्यक्तिः प्रसन्नता ।**
**समाधिः श्लेष ओजोऽथ माधुर्यं सुकुमारता ॥२॥**

काव्यस्य अभिधास्यमानस्वरूपाणामौदार्यादीनां गुणानां दशाभिधानानि क्रमेण मन्तव्यानि ॥२॥

अथैषां गुणानां लक्षणोदाहरणे प्रतिपिपादयिषुराह—

**पदानामर्थचारुत्वप्रत्यायकपदान्तरैः ।**
**मीलितानां यदाधानं तदौदार्यं स्मृतं, यथा ॥३॥**

विचक्षणैः तदौदार्यं-उत्कृष्टं आराति इत्युदारः, तस्य भावः, स[तद्] एव वा औदार्यं स्मृतम् । यदेतादृशानां पदानां आधानं आरोपणं, विधीयते । किंविशिष्टानाम् ? अर्थ० अर्थस्य उदितवस्तुनः, चारुत्वप्रत्यायकानि रमणीयत्वप्रख्यापकानि च तानि पदान्तराणि च तथा । तैर्मीलितानां संयोजितानाम् । यथा इति उदाह्रियते ॥३॥

**गन्धेभविभ्राजितधाम लक्ष्मीलीलाम्बुजच्छत्रमपास्य राज्यम् ।**
**क्रीडागिरौ रैवतके तपांसि श्रीनेमिनाथोऽत्र चिरं चकार ॥४॥**

अस्मिन् रैवतकाचले श्रीनेमिनाथः, श्रिया प्रभूतसमवसरणादिरमणीयं विभूत्योपलक्षितः नेमिः श्रीनेमिः, स चासौ नाथश्च तथा । चिरं भूरिकालं, तपांसि-तप्यन्ते तानि तपांसि, षष्ठाष्टमादीनि चक्रे निर्ममे । कीदृक्षे रैवतके ? क्रीडागिरौ-क्रीडया खेलया उपलक्षितः तदर्हो वा गिरिः, स तथा, तस्मिन् । किंकृत्वा ? राज्यमपास्य परित्यज्य । किंरूपम् ? गन्धेभविभ्राजितधाम-गन्धप्रधानाः इभाः हस्तिनः, तैः विभ्राजितं शोभितं, धाम सद्म, यस्मिन् तत्तथा । पुनः कथंभूतम् ? लक्ष्मी० छाद्यते अनेन छत्रम् । त्रडितित्रह । 'छदेरिस्मनि'ति [हे. व्या. ४.२.३३] ह्रस्वः । लक्ष्म्याः लीलया नर्मणा, उपलक्षितं यदम्बुजं कमलम्, तदिव छत्रं यस्मिन् तत्तथा । इह नेमि-इभ-अम्बुज-गिरि-शब्दानां श्रीगन्ध-लीला-क्रीडापदैः चारुत्वं यथासंख्यं प्रख्यापितम् । नेमि-इभ-प्रभृतिशब्दानां अर्थचारुत्वप्रज्ञापकैः श्री-गन्ध-लीलाप्रमुखपदैर्युक्तानां प्रत्ययकारणत्वेन काव्यस्य औदार्यगुणः ॥४॥

---

1 यथायुक्ति–ला. । वृत्तौ तु 'यथाशक्ति' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समताकान्त्याह्वयगुणद्वयमेकपद्येनैव ब्रूते—

**बन्धस्य यद्वैषम्यं समता सोच्यते बुधैः ।**
**यदु[ज्ज्व]लत्वं तस्यैव सा कान्तिरुदिता, यथा ॥५॥**

यद् बन्धस्य गुम्फनाप्रकारस्य अवैषम्यं अविषमता, सुकुमारता, अनूनोल्बणाऽखिलाक्षरपदोपादानं स्यात्, प्रेक्षावद्भिः सा समता मता कथिता । यत्तस्यैव बन्धस्यैव उज्ज्वलत्वं वैशद्यं, सा कान्तिः लब्धवर्णैः उदिता उक्ता । विरूपसन्ध्यादि[2]बन्धनिरासात्कान्तिनामा गुणो विवक्ष्यते इत्यर्थः ॥५॥

यथेति समतानिदर्शनं निरूपयति—

**कुचकलशविसारिस्फारलावण्यधारामनुवदति यदङ्गासङ्गिनी हारवल्ली[3] ।**
**असदृशमहिमानं तामनन्योपमेयां कथय, कथमहं ते चेतसि व्यञ्जयामि ॥६॥**

कश्चन सुहृत्कस्याश्चन अनिरीक्षितपूर्वायाः प्रमदायाः निभालनाय सखायं प्रेषितवान् । स च तां निरीक्ष्य प्रत्यायातः, तेन च पृष्टः "साङ्गना किंलक्षणा ?" इति । ततो वक्ति- "हे सखे, त्वं वद । अहं ते तव अन्तःकरणे तां सौन्दर्यविभ्रमसंपदतिशयशालिनीं केन प्रकारेण स्पष्टयामि ?" किंविशिष्टाम् ? असमानमहिमानं असाधारणमाहात्म्यां; नान्याभिः उपमीयते इत्यनन्योपमेया, तां तथा । यदङ्गा० यस्याः अङ्गं यदङ्गं, अवसराद्वक्षः, तस्यासङ्गिनी हारलता । कुचकलशाभ्यां धरण-निपाभ्यां, विसारिणी विसरणशीला, स्फारा वरिष्ठा, या "लवणा त्विट्," [हे. व्या. ६.४.६. लवणाद् अः] "लवणा त्विषि" इति वचनात् सैव लावण्यं, तस्य धारा लावण्यधारा, तामनुवदति अनुकरोति । समबन्धत्वात् समताख्यो गुणः । उक्तं च—

"बन्धवैषम्यराहित्यं समतापदगुम्फनैः ।" इति ॥६॥

कान्तेर्दृष्टान्तं प्रतिपादयति—

**फलैः क्लृप्ताहारः प्रथममपि निर्गत्य सदनादनासक्तः सौख्ये क्वचिदपि पुराजन्मनि कृती ।**
**तपस्यन्तः श्रान्तं ननु वनभुवि श्रीफलदलैरखण्डैः खण्डेन्दोश्चिरमकृत पादार्चनमसौ ॥७॥**

कस्यापि इत्यस्येयमोडा । असौ, कृतविद्यवत् कृतशब्दोऽभ्यस्तार्थः, तेन कृतं अभ्यस्तं, तपः पूजादि-पुण्यं, अस्य अस्ति इति कृती, इन् । कृतमभ्यस्तमनेनेति वा कृती, पुण्यवान् । पुराजन्मनि प्राग्जनने, श्रीप्रदानि फलानि यस्य सः श्रीफलो बिल्वः, तस्य दलानि पत्राणि, तैरखण्डैः, सम्पूर्णैः, खण्डेन्दोः ईशानस्य, चिरं प्रभूतकालं, पादार्चनमकृत चरणार्चां व्यधत्त । कथंभूतः ? प्रथते द्वितीया-द्यनेन प्रथमम् । "पृप्रथिपरिचालिकर्दिभ्योमः" प्रथममपि शैशवे एव; सदनात्-सीदन्ति अस्मिन् सदनं भवनं, तस्मात्; निर्गत्य निःसृत्य । फलैः क्लृप्तः रचित आहारः येन सः, तथा । क्वचनापि सौख्ये -सुखमेव सौख्यं, 'भेषजादित्वाद् ट्यण्' [हे. व्या. ७.२.१६४]; सुखस्य भावो वा, तस्मिन् । अनासक्तः -आसजति स्म आसक्तः, न आसक्तः नाध्युपपन्नः । ननु निश्चितं वनभुवि गहनवसुधायां, अश्रान्तं अखेदं यथा स्यात्तथा । तपस्यन् तपः कुर्वन् । विरुद्धसन्ध्याद्यपनयनेन समुज्ज्वलत्वादयं कान्तिगुणः ॥७॥

2. सन्धिबन्ध-ला. 3. हरिवल्लिः-व, पा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**यदनेयत्वमर्थस्य साऽर्थव्यक्तिः स्मृता, यथा ।**
**त्वत्सैन्यरजसा लुप्ते सूर्ये रात्रिरभूद्दिवा ॥८॥**

यदर्थस्याभिधेयस्य अनेयत्वं, न नेयत्वं अनेयत्वं, बलात्कारादर्थाप्राप्यत्वं, तत्तच्छब्दविद्यमानत्वेन स्फुटार्थोक्त्या सुखगम्यत्वं, तदर्थस्यानेयत्वम् । अल्पबन्धेनापि तादृशाः शब्दाः प्रयुज्यन्ते, यादृशैः साक्षादर्थो गम्यते । इयता यत्र वर्णैर्नियमतोऽर्थस्य भणनं स्यात्, विद्वद्भिः सा अर्थव्यक्तिः स्मृता कथिता । यथेत्युदाहरणे- हे काश्यपीपते, त्वच्चमूपांशु[सु]ना विवस्वति लुप्ते सती दिवा वासरे, विभावरी आसीत् । इह तम्याहेतुः सूर्यलोपः इत्यादि । हेतुहेतुमद्भावेनार्थस्य सुखलभ्यत्वादनेयत्वम् । यद्वा अनेयत्वं सुगमत्वम् । यस्मिन्नभिधेयस्य नेयत्वं तत्र दोषः । यथा—

चतुरङ्गे भवत्सैन्ये प्रसर्प्यति दिशः क्रमात् ।
नरेन्द्र, बहुलध्वान्ता दिवाऽप्याविरभून्निशा ॥१॥ [ ]

अत्र निशीथिन्या हेतुः रविलोपः, तद्हेतू रेणू रेणोः सैन्यं चेति प्रभृति हेतूनामभावादर्थस्य तत्साधकस्य रेण्वादेर्नेयत्वं । अयमनेयतायां गुणः ॥८॥

**झगित्यर्थापकत्वं यत्प्रसत्तिः सोच्यते, बुधैः ।**
**कल्पद्रुम इवाभाति वाञ्छितार्थप्रदो जिनः ॥९॥**

सुधीभिः सा प्रसत्तिर्निगद्यते । अर्थं करोति, तमाचष्टे वा । अर्थापयतीत्यर्थापकः, तस्य भावः तत्त्वम् । यत्तूर्णमर्थापकत्वं सुतरामर्थबोधकम् । यथा दृष्टान्ते[4]—
"कल्पद्रुम इव राजते समीहितार्थप्रदायकोऽर्हन् ।" यतः एव कल्पद्रुमप्रभृतिशब्दानां पाठतः एव झटित्यर्थापकत्वं, अत एव अस्य प्रसत्तिगुणत्वम् ॥९॥ ५

**स समाधिर्यदन्यस्य गुणोऽन्यत्र निवेश्यते ।**
**यथाऽश्रुभिररिस्त्रीणां राज्ञः पल्लवितं यशः ।१०॥**

सः समाधिः सम्यगाधीयते समाधिः । 'उपसर्गादातः' [हे. व्या. ५. ३.११० ], किः । षष्ठो गुणः । यत्रान्यस्य अपरस्य पदार्थस्य, गुणः धर्मः, अन्यस्मिन्पदार्थे स्थाप्यते । यथा- शत्रुवनितानामश्रुभिः अश्नुवते आकण्ठमश्रूणि, क्लीबलिङ्गः विनिनीस्यशिल्पोरुरिति रुः । तैः अश्रुभिः बाष्पैः, राजतेऽमात्यादिभिः इति राजा; 'उक्षितक्षीत्यन्' [हे.उ. ९००][5] । तस्य राज्ञः भूपतेः यश; अश्नुते व्याप्नोति दिशः; 'अशेर्यशश्चादिरित्यम् [हे.उ. ९५८] । पल्लवः जातः यत्र तत् पल्लवितम; पल्लवितमित्यत्र पल्लवनं, वल्लितरुप्रभृतीनां धर्मः, सः यशसि आरोपितः ॥१०॥ ॥घृ॥

श्लेषौजालक्षणगुणद्वितयमेकपद्येनैव स्पष्टयति—

**श्लेषो यत्र पदानि स्युः स्यूतानीव परस्परम् ।**
**ओजः समासभूयस्त्वं तद्गद्येष्वतिसुन्दरम् ॥११॥**

यत्र यस्मिन्वृत्तादौ, पदानि पार्थक्येन स्थितान्यपि, परस्परं अन्योन्यं, स्यूतानि-सीव्यन्ते स्म स्यूतानि, 'अनुनासिके चच्छ्वोः शूडित्यूत्वम' [हे. व्या. ४.१.१०८] । तानीवोतानोत्र समस्तप्रायिकाणि भवेयुः सः श्लेषो गुणः । यत्समासप्रचुरत्वं जायते स ओजोगुणो मन्तव्यः । तत्समासभूयस्त्वं गद्यरचनास्वतीव[6] शोभावहं भवति ॥११॥

4. यथा-च.  5. सूत्रं तु-उक्षितक्षाक्षी-रन् ॥९००॥ इति ।  6. स्वतीवतरां-पा., पू.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्लेषमुदाहरति—

मुदा यस्योद्गीतं सह सहचरीभिर्वनचरैः
मुहुः श्रुत्वा हेलोद्धृतधरणिभारं भुजबलम् ।
दरोद्गच्छद्दर्भाङ्कुरनिकरदम्भात्पुलकिता-
श्चमत्कारोद्रेकं कुलशिखरिणस्तेऽपि दधिरे ॥१२॥

तेऽपि ग्रावमया अपि, कुलगिरयो यस्य वसुधाधिपतेः भुजबलं दोः पराक्रमं; सहचरीभिः – सह धर्मं चरन्ति सहचर्यः, ताभिः पाणिगृहीतीभिः, सह सार्धं, वनचरैः किरातैः, मुहुः वारंवारं, 'मोहनं मुन्नया मुदा' सम्मदेन, उद्गीतमाकर्ण्य, चमत्कारोद्रेकं अद्भुतानल्पीयस्त्वोल्लासं बभ्रिरे । किंलक्षणम्? हिलहावकरणे हिल्यतेऽनया हेलनं, वा अचि हेला, तया लीलया । उद्धृतः उत्पाटितो धरण्याः भारो येन, तत्तथा । कीदृशाः ? पुलकिताः । पुलकः रोमाञ्चः जातः येषां ते पुलकिताः, कण्टकिताः । कस्मात् ? दरान्मनाक् उद्गच्छन्तः निर्गच्छन्तः ये, दृणन्ति दीर्यन्ते वा, "दृभोर्द्भोर्भः" इति भप्रत्यये । अंक्यन्ते एभि इत्यङ्कुराः तेषां, अङ्कुराः कुशाङ्कुराः, तेषां निकरः वृन्दं, तस्य दम्भो व्याजः, तस्मात् ॥१२॥

गद्यतः ओजोगुणं प्रकटयति—

समराजिरस्फुरदरिनरेशकरिनिकरशिरः सरससिन्दूरपूरपरिचयेनेवारुणितकरतलो देवः ।

इति गद्यम् ॥१३॥

समराजिरे समियति सङ्कटन्तेऽत्र समराः; अज क्षेपणे, अजन्त्यस्मिन् अजिरं; अजिरादय इति किरः वीभावप्रतिषेधश्च, तदुपलक्षितं अजिरं समराजिरं, तस्मिन् आहवाङ्गणे । स्फुरन्तः ये अरिनरेशाः अरातिमनुजेश्वराः तेषाम् । करिनिकराः स्तम्बेरमगणाः, तेषां शिरःसु कुम्भस्थलेषु, यः सरसः प्रत्यग्र सिन्दूरपूरः, तस्य परिचयः सम्पर्कः, तेनेव[7] शोभितपाणितलो देवः विजयतामिति ॥१३॥

माधुर्यसुकुमाराह्वगुणद्वितयाभिधायकं श्लोकं निजगदीति—

सरसार्थपदत्वं यत्तन्माधुर्यमुदाहृतम् ।
अनिष्ठुराक्षरत्वं यत् सौकुमार्यमिदं, यथा ॥१४॥

विपश्चिद्भिः[8] तन्माधुर्य-मधुरो रसज्येष्ठः, तस्य भावो माधुर्यमाख्यातम् । सह रसैः शृङ्गारादिभिः वर्तन्त इति सरसानि, तानि चार्थपदानि च तथा, तेषां भावः सरसार्थपदत्वम्; यदभिधेयस्य तदभिधायकानां पदानां सरसत्वं स्यात् । यच्चानिष्ठुराक्षरत्वं सोमालवर्णत्वं सौकुमार्यमिति । कामयत इति कुमारः 'कमेरारोत उच्चे'त्यारे [हे. उ. ४०९] । कातन्त्रसूत्रेण कुमारशब्दसिद्धौ शोभनं कुमारं कान्तिः अस्य सः सुकुमारः, तस्य भावः सौकुमार्यमभिहितम् । यथा इत्यग्रे माधुर्यमुदाहरिष्यते ॥१४॥

फणमणिकिरणालीस्यूतचञ्चन्निचोलः कुचकलशनिधानस्येव रक्षाधिकारी ।
उरसि विशदहारस्फारतामुज्जिहानः किमिति करसरोजे कुण्डली कुण्डलिन्याः ॥१५॥

---

7. तेनैव–पा. 8. यत्–पु. च–ला, वृत्तौ तु यत् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कुण्डलिन्याः - कुण्डलमस्त्यस्याः कुण्डलिनी, तस्याः; सूर्यपाणिपङ्कजेयं कुण्डलमिव वपुर्यस्य आसीनस्य स्यादिति, तद्योगात् कुण्डलीनागः । किमिति केन हेतुना, इत्यहं वितर्कयामि । उरःस्थले विलोक्यते शयकुशेशये किमेष इति संशयानः चेत्, यक्षसि उज्ज्वलहार इव विशालतामुज्जिहानः प्राप्नुवन् हारसादृश्यं बिभ्रत स्यात्; तर्हि तस्याः देव्याः कुचकलशनिधानस्य इव-निधीयते इति[9] निधानं: भुज्यादित्वात्कर्मण्यनट् [ हे. व्या. २.२.४० कर्मणि ] । कुचौ कलशौ इव कुचकलशौ, तावेव निधानम् । तथा तस्य उरोजनिपनिधेः रक्षायै नियुक्त इव भवेत् । इतरोऽप्युरगो निधानरक्षाधिकर्ता जायेत । किंविशिष्टः? फण० फणमाणिक्यार्चिराज्या स्यूतः प्रोतः, लक्षणया निचितः, चञ्चन् राजमानः, निचोलः कञ्चुकः यस्य सः, तथा । इह वाच्यस्य तद्वाचकानां पदानां च माधुर्यं इयत् शृङ्गारादिरसवत्यादिष्वनुभूयमानसदृक् स्वनितेकण्ठकूणिकाप्रक्वाणेष्विव सरसत्वमवसातव्यम् ॥१५॥

सौकुमार्यमुदाहरति—

**प्रतापदीपाञ्जनराजिरेव देवत्वदीपः करवाल एषः ।**
**नोचेदनेन द्विषतां मुखानि श्यामायमानानि कथं कृतानि ॥१६॥**

हे देव नृप, अयं भवदीयः असिः, प्रतापदीपाञ्जनराजिः एवेति निश्चितं विद्यते । प्रतापः दीपः इव, यद्वा प्रताप एव दीपः, जाज्वल्यमानत्वात् । तस्याञ्जनराजिः कज्जलततिः इति, श्यामत्वात् असेः चेत् यदि एवं न भवेत्, तदा अनेन कृपाणेन, द्विषतां अरातीनां, मुखानि-महयन्त एतानि मुखानि । 'महेरुच्चास्यवे' ति [ हे. उ. ८९ ] रवे साधुः, मुदितानि खान्यत्रेति वा; पृषोदरादित्वात । श्याममिवाचरन्ति श्यामायमानानि । कथं केन प्रकारेण, कृतानि विहितानि । सुकुमारता चास्य मृदुपदसमानसत्वात् ॥१६॥

**गुणैरमीभिः परितोऽनुविद्धं मुक्ताफलानामिव दामरम्यम् ।**
**देवी सरस्वत्यपि कण्ठपीठे करोत्यलङ्कारतया कवित्वम् ॥१७॥**

देवी सरस्वती सरः आश्रयत्वेन विद्यते अस्याः इति वतुः । साऽपि अलङ्कारहेतोः । कवित्वं कण्ठपीठे । कवण ते शब्दायते कण्ठः, कण्ठते वा । तस्य पीठं-पीयते उपवेशनेन ग्रस्यते पीठम्. "पीवीशीति कित् ठः" [ हे उ १६३ ] तस्मिन् । कण्ठपीठे, करोति निगरणेनोच्चरतीत्यर्थः । अमीभिः प्रागुदितौदार्यादिभिः गुणैः, परितः समन्तात्, अनुविद्धं व्याप्तम् । किमिव? मुक्ताफलानां दामेव । तथा इतरापि प्रमदा अलङ्कारतया मुक्ताफलानां दाम कण्ठस्थले विदधाति, तदपि गुणैर्ग्रथितं भवेत् । कीदृशम्? रम्यं रसैरुपेतम् ॥१७॥

इतिश्री बृहत्खरतरगच्छे भट्टारकप्रभुश्रीजिनराजसूरिविजयिराज्ये, श्रीसागरचन्द्रसूरिसन्ताने,
पट्टानुक्रमसंजातश्रीमद्वाचनाचार्यरत्नधीरगणिप्रवरविनेय-[10]
वाचनाचार्यज्ञानप्रमोदगणिविनिर्मितायां वाग्भटालङ्कारवृत्तौ तृतीयः परिच्छेदः ।

*

9. यत्तदिति-पु. 10. 'श्री...प्रवरविनेय'-इदं पा. ग्रन्थे न प्राप्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# चतुर्थः परिच्छेदः

अथ चित्रप्रमुखध्वनिजातिप्रमुखार्थालङ्कारान् प्रारिप्सुराह—

**दोषैर्मुक्तं गुणैर्युक्तमपि येनोज्झितं वचः ।**
**स्त्रीरूपमिव नो भाति तं ब्रुवेऽलङ्क्रियोच्चयम् ॥१॥**[1]

अहं तमलङ्क्रियोच्चयं अलंकारनिचयं, व्यक्तं अभिदधामि, येनापेतं वचनं न विभ्राजते । दोषैरनर्थकादिभिः त्यक्तमपि गुणैरौदार्यप्रभृतिकैः उपेतमपि । किमिव ? वनितारूपमिव । यथा[2] वनितारूपं दोषैः अधोदृष्टतावैवर्ण्यादिभिर्वर्जितं, गुणैः सद्वर्णप्रभृतिभिः सहितमपि कटककेयूर-वलयतिलकहाराद्यलङ्कारैः अन्तरेण नो भाति । ननु गुणा अपि वृत्तरीढाहेतवः, तत्कथं 'काव्य-शोभाकरान् मार्गानलङ्कारान्प्रचक्षते'[3] इत्यलङ्कारसामान्यलक्षणं समानासमानजातीयव्यावर्तकं भवेत् ? प्रोच्यते-गुणा हि हारवलयतिलकादिवदलङ्कारतया नालङ्कुर्वन्ति, किन्तु गाम्भीर्ये धैर्यवत्कर्षणमा-दधते । प्रोदितं च नन्दवर्हिणसूरिणा(?)

उपकुर्वन्ति ते सत्यं[4] येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः ॥१॥१॥ [का. प्र. ८.६७]

ध्वन्यर्थालङ्कृतिभेदेन द्विविधानलङ्कारानुद्दिशति—

**चित्रं वक्रोक्त्यनुप्रासौ यमकं ध्वन्यलङ्क्रियाः ।**
**अर्थालङ्कृतयो जातिरुपमारूपकं तथा ॥२॥**

इमाश्चित्रवक्रोक्त्यादयश्चतस्रो ध्वन्यलङ्क्रियाः शब्दालङ्काराः, अपराः जात्युपमाप्रभृतिकाः अर्था-लङ्कृतयो अर्थालङ्काराः निगद्यन्ते ॥२॥

**प्रतिवस्तूपमा भ्रान्तिमानाक्षेपोऽथ संशयः ।**
**दृष्टान्तव्यतिरेकौ चापह्नुतिस्तुल्ययोगिता ॥३॥**
**उत्प्रेक्षार्थान्तरन्यासः समासोक्तिर्विभावना ।**
**दीपकातिशयौ हेतुः पर्यायोक्तिः समाहितम् ॥४॥**

---

1. पु. पुस्तके प्रथमाश्चत्वारः कारिकाः दत्तास्तदनन्तरमेव तासां वृत्तिर्लिखिता ।
2. 'वनितारूपमिव । यथा-' इदं पु. पुस्तके नास्ति ।
3. मूले तु काव्यप्रकाशे- 'धर्मान्' इति ।
4. मूले 'तं सन्तं' इति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

परिवृत्तिर्यथासंख्यं विषमः ससहोक्तिकः ।
विरोधोऽवसरः सारं सश्लेषश्च समुच्चयः ॥५॥
अप्रस्तुतप्रशंसा स्यादेकावल्यनुमापि च ।
परिसंख्या तथा प्रश्नोत्तारं सङ्कर एव च ॥६॥

पञ्चभिरेभिः पद्यैरलङ्काराणां यथापरिपाट्यभिधानानि मन्तव्यानि ॥६॥

चित्रलक्षणे वावदीति—

यत्राङ्गसन्धितद्रूपैरक्षरैर्वस्तुकल्पना ।
सत्यां प्रसत्तौ तच्चित्रं चित्रकृत्, यथा[5] ॥७॥

यत्र यस्मिन्नलङ्कारे, अक्षरैः वर्णैः कृत्वा, वस्तुनः कमलच्छत्रादेः पदार्थस्य, कल्पना घटना, विधीयते । अङ्गैः तदङ्गैः दलदण्डपट्टकादिभिरवयवैः । सन्धिभिः – सन्धीयन्तेऽर्थाः परस्परकथा संघटनाद्याः एभिरिति सन्धयः, तैः । सन्धानैस्तद्रूपैर्वस्तुरूपैश्चः । यद्वा वस्तुनोऽङ्गानां ये सन्धयः, तत्र तद्रूपाणि तान्येव तुल्याक्षराणि कर्तव्यानि । तच्चित्रं चित्राभिधानालङ्कारो भण्यते । च पुनः, यच्चित्रकृत् विस्मयविधायकं, दौर्गम्येण मनीषिशेमुष्यधिकत्वज्ञापकं एकस्वरैकव्यञ्जनादिकं, तदपि चित्रं निपुणैः पठ्यते । कस्यां सत्याम्? प्रसत्तावर्थविशदतायां सत्याम् । चित्रस्य हि चतुष्टयी प्रवृत्तिः – आकृतिगतिस्वरव्यञ्जनप्रभेदात् । पद्मछत्रचामरस्वस्तिकाद्याकारचित्रम् । गोमूत्रिकाहयमतंगजप्रभृतिकं गतिचित्रम् । एकद्वित्रिप्रमुखैः स्वरैः स्वरचित्रम् । मात्राबिन्दुच्युतकाद्यपि स्वरचित्रेऽन्तर्भूतम् । एकादिचतुर्व्यञ्जनबन्धपर्यन्तं व्यञ्जनचित्रम् । ततः परं सुगमम् । अक्षरच्युतकमपि तदन्तर्भेदः ॥७॥

आकारचित्रमुदाह्रियते—

जनस्य नयनस्थानध्वान एनच्छिनत्त्विनः ।
पुनः पुनर्जिनः पीनज्ञानध्यानधनः स नः ॥८॥

षोडशदलकमलं गोमूत्रिकाचित्रं च । स जिनः नः अस्माकं, पुनः पुनः पुनाति[तु ?] 'पुनः पूसन्यमिभ्य.' [हे. उ. ९४७] इत्यर, पुनादेशश्च । आभीक्ष्ण्ये द्वित्वं, पुनः पुनः मुहुर्मुहुः, एनः इत्यनेनः क्लीबलिङ्गः । 'अर्तीभ्यामिति नस्', [हे. उ. ९७९][6] दुरितं छिनत्तु । किंभूतं इनः? एति स्वामित्वमिनः । 'जीणूशीति नक्' [हे. उ. २६१] ईशिताः; जनस्य लोकस्य; नयनस्थाने–नीयते एभिः नयनानि, तानि तिष्ठन्त्यस्मिन् नयनस्थानं, तस्मिन् चक्षुः । स्थले प्रवचनरूपे, ध्वानो निःस्वनो यस्य सः, तथा । एतेन जिनः, निर्ह्रादेन समयलक्षणेन नयनेन एव जन परलोकमालोकयत इत्यर्थः । किंलक्षणः? ज्ञायतेऽनेन ज्ञानं, ध्यायते ध्यानं, ज्ञानं च ध्यानं च ज्ञानध्यानं प्राप्यते । पीनं स्थूलं ज्ञानध्यानमेव धनं यस्य सः, तथा । इयता ज्ञानस्य लोकालोकप्रकाशकत्वेन पीनत्वं वर्णितम् । ध्यानस्य पीनत्वं प्रौढ्यात् च । षोडशदलकमलमदः । गोमूत्रिकात्वाद्गतिचित्रमप्येतत् ॥८॥

5. 'तच्चित्रं......यथा'—इदं पु. पुस्तके नास्ति ।
6. मूले तु– 'अर्तीणूभ्यां नस्' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वयोः स्थापना यथा । एकस्वरचित्रं विवक्षुराह—

**गणनरगणवरकरतरचरण परपद शरणगजनपथकथक ।**
**अमदन गतमद गजकरयमल शममय जय भयघनवनदहन ॥९॥**

शमः शान्तिः, स्वरूपं यस्य सः तथा, तदामन्त्रणे, हे शममय, हे अर्हन्, त्वं जय सर्वोत्कर्षेण वर्तस्व। प्रभोः आमन्त्रणविशेषणान्याह- हे गणनरगणवरकरतरचरण! गणः संख्याने, गण्यते एभिः इति गणाः गच्छाः, तदन्तर्वर्तिनो यतयः। नृणन्ति इति नराः, चक्रवर्तिप्रमुखाः, तेषां गणाः निकराः, तेषां वरं ईप्सितं कुरुत इति वरकरौ। अतिशयेन वरकरौ वरकरतरौ, तादृशौ समीहितोत्कृष्टविधायकौ चरणौ यस्य सः, तदामन्त्रणे। तथा हे परपद-पद्यते अस्मिन् पदं, परं परमं वा ब्रह्मपदं यस्य, तत्सम्बुद्धौ। तथा हे शरणगजनपथकथक-शीर्यते शीतायनेन शरणं आश्रयं गतवन्तः शरणगाः, ते च ते जनाश्च; तथा तेषां पन्थाः शरणगजनपथः, तं कथयतीति शरणगजनपथकथकः, तस्य सम्बोधने[7]। यद्वा परपदस्य महोदयस्य शरणगाः इत्यादि पूर्ववत् समुदितं विशेषणं मन्तव्यम्। हे अमदन! नास्ति मदनो यस्य सः, तस्य सम्बुद्धौ; तथा निरस्तमकरध्वज। हे गतमद! गतः मदः यस्य सः, तदामन्त्रणे। परास्तजात्याद्यष्टविधाऽहंकृते! हे गजकरयमल-गजस्य इव करिणः इव, यद्वा गजकर इव करयमलं बाहुयुगं यस्य सः। एककरशब्देऽत्र मध्यलोपीसमासः, तदामन्त्रणे। तथा शमल इत्येतादृशे पाठे गजकरः शुण्डादण्डः, सः इव शमलः श्यामलवर्णः। हे भवघनवनदहन-भयमैहिक-प्रभृति सप्तविधं, तदेव घनं हन्यते घनम्; मूर्तिनिचिताभ्रे घन इत्यलि साधुः, निबिडं वनं, तस्मिन्। दहति दहनः इव अग्निरिव, दहनं यस्य सः[8], तस्य सम्बोधने ॥९॥

एकस्वरचित्रम्—

**मूलस्थितिमधःकुर्वन् पात्रैर्जुष्टो गताक्षरैः ।**
**विटः सेव्यः कुलीनस्य तिष्ठतः पथिकस्य सः ॥१०॥**

विटपदात् इकारमात्राच्युतके, विटः इति वटः। सः विटः 'विट् आक्रोशस्वने,' वेटति शब्दायते विटः पल्लवकः। तथोक्तमभिधानचिन्तामणौ हेमसूरिपादैः- 'षिङ्ग पल्लवको विटः' [२२४५] इति। एतादृक्ष पल्लवक। कस्य? कुलीनस्य-कुलस्य अपत्यं, तत्र भवः वा, कुलात् ईन इति कुलीन, तस्य। कस्य महाकुलस्य सेव्यो भवेत्? अपि तु न कस्यापि इत्यर्थः। किंविशिष्टस्य कुलीनस्य? पथि न्यायवर्त्मनि तिष्ठतः। विटः किंकुर्वन्? मूल त मूल. तत्र। स्थीयतेऽनया स्थितिः मर्यादा। तां मूलकुलमर्यादामधःकुर्वन्। पुनः किंलक्षणः? गतमक्षरं येभ्यः ते गताक्षरा देवानां प्रियाः, तैः पात्रैः जुष्टः। 'जुषीप्रीतिसेवनयोः' इत्यस्य क्ते जुष्टः सेवितः। अथ प्रच्युतेकारे विटशब्देऽर्थादवशिष्टः विटः विद्यते, सः। ईदृशेऽध्वनि सर्वदा पथिकस्य छायादिसातविधायकत्व-विख्यातो वटः सेव्यो भवेत्। यत्तु पन्थानं याति पथिकः 'पथ इकट्,' [हे व्या. ६.४.८८] तस्य पथिकस्येत्यन्वर्थाश्रयणेन व्रजतः पान्थस्य कथं वटः सेव्यः स्यात्, तच्छङ्कापनोदनार्थं विशेषण-द्वयं सफलयति। कीदृक्षस्य पथिकस्य? कुलीनस्य कौ भुवि लीन कुलीनः, तस्य। तदधस्तात् धरण्यामासीनस्य, तथा तिष्ठतः प्रयाणं वितीर्य तस्थुषः। कीदृक्? मूलानां जटानां स्थितिमधः कुर्वन्।

7. सम्बुद्धौ-ला. 8. दहनो यः सः -पु.

पुनः किंभूतः? गतं आ समन्तात्, क्षरणं क्षरं च्यवनं येभ्यः तैः गताक्षरैः; पात्रैः पत्रसमूहैः; यद्वा गतं अआवा इत्यक्षरं येभ्यः तैः पात्रैः पर्णैः जुष्टः इत्यर्थः। विटादिकारमात्राच्युतकम्। वट इति इदमपि स्वरचित्रं निर्गदिकारस्वरत्वेनाद्भुतं भवति ॥१०॥

धर्माधर्मविदः साधुपक्षपातसमुद्यताः।
गुरूणां वञ्चने निष्ठाः नरके यान्ति दुःखिताम् ॥११॥

वञ्चनपदात् बिन्दुच्युतकं वचनमिति। गुरूणां, वंच्यते वंचनं तस्मिन् वञ्चने निष्ठाः परायणाः मनुजाः। नरके, नृणाति शिक्षयति पापिनः नरकः; 'दृकृन्न इत्यक' [हे. उ. २७] नराः। कायन्ति अस्मिन् वा, तस्मिन्। श्वभ्रे दुःखितां प्राप्नुवन्ति। किंलक्षणाः? धर्ममधर्ममिव धर्मविरुद्धमिव विदन्ति इति धर्माधर्मविदः। पुनः कीदृशाः? साधयन्ति कार्याणीति साधवः 'कृवापाजीत्युण्' [हे. उ. १] सज्जनाः, तेषां पक्षः पच्यते कालेन पक्षः। मावावद्यीति सः, तस्य पतनं पातो नाशः, तत्र समुद्यताः विहितोत्साहाः। अथ वञ्चनपदात् बिन्दुच्युतके वचनं भवति। हे नरमनुष्योत्तमगुरूणां वक्तृ-प्रमुखाणां, वचने आज्ञावचसि, आसक्ताः। के मानवाः दुःखितां यान्ति? अपि तु न केऽपि इत्यर्थः। किंविशिष्टाः? धर्मा० वृषा एनः व्यक्तिमन्तारः। पुनः कीदृशाः? साधूनां पक्षपातः पक्षाभ्युपगमः सहायीभावः, तत्र समुद्यताः प्रवणाः, उपकर्तारः इति अर्थः। वचनं पदात् विदि अवयवे। विद्यते अनेनेति अपष्ट्वादय इति क्तु प्रत्यये बिन्दुः। च्यवते स्म च्युतं, 'स्वार्थे के' [हे. व्या. ४.४.६०] च्युतकं तस्य, च्युतकं बिन्दुच्युतकं वचनमिति ॥११॥

एकव्यञ्जनचित्रं निरूपयति। श्रीमदरिष्टनेमिनिर्वाणमहाकाव्ये राजीमतीपरिहाराधिकृतौ सागरेडायाम्—

ककाकुकं ककेकाङ्क केकिकोकैककुः ककः।
अकुकौकः काककाक्व कुक्वाकुकुककाङ्ककुः ॥१२॥

एकव्यञ्जनचित्रम्। ककाकु इतीदं पद्यमस्ति। ककः नीरनिधिर्विद्यते। केन? सलिलोपलक्षितः। कः पवनः यत्र। अथवा केन? समीरेणेरितं, कं उदकं यत्र। कमेव? [कमिव]?। कः आत्मा यस्य सः वा ककः। किंविशिष्टः? ककाकुकङ्ककेकाङ्ककेकिकोकैककुः। कः सातकृत् काकुः शब्दविशेषो येषां ते ककाकवः। यद्वा कक लौल्ये, ककयत एभिरिति काकवः। 'उणादयो' [हे. व्या. ५.२.९३] बहुलं इति बहुलवचनादुण्। शोकादिविकृतध्वनयः केन कामेन तोयेन वा काक्वः, निह्रदविशेषा येषां ते, तथा। कङ्कन्ते गच्छन्ति कङ्काः जलपक्षिणः, ककाकवश्च ते कङ्काश्च। तथा कायत्यनया केकाः, के मूर्ध्नि कायतीति वा। अङ्कलक्ष्मणि अङ्क्यन्ते अनेनेति अङ्कः। ततः केका शिखण्डिरवोङ्कः चिह्नं येषां ते, केकाङ्काः, ते च ते केकिनः चित्रपिङ्गलाश्च तथा। कोकाः- कुर्वन्ति शब्दायन्ते कोकाः, 'भीणशलीति कः' [हे. उ. २१] चक्रवाकाः। ततो द्वन्द्वे ककाकुकङ्काश्च केकाङ्कके-किनश्च कोकाश्च तथा, तेषामेकमद्वितीयं कुः उत्पत्तिस्थानं यः सः। पुनः कीदृक्। अकुकौकः काककाक्वः। कवः कुत्सिता न कवो कवः सुन्दराः। कौकसः के ओकः सदनं येषां ते। तथा ते च कौकसः वारिवासिनश्च। काकाः कायन्ति काकाः, 'भीण् शलीति कः' [हे. उ. २१]।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

काशब्दं कायन्ति वा काकाः, घूकारयः । ते एव काककाः; स्वार्थे कः, तदनु कर्मधारये । अकुकौक-सश्च ते काककाश्च, तथा । तेषां अक्का इव जननी इव, पालनत्वात् । यद्वा अक्का माता यस्मिन् [यस्याम् ?] वासः, तथा । पुनः किंभूतः ? ऋक्वा कुकुककाङ्ककुः ऋच्यते स्तूयते आभिरिति ऋचः वेदवाण्यः, तासां काकवः वक्रोक्तयः । कुकिवृकि आदानेताः । कुकति वक्ति इति कुक्वाकुकुकः एतादृशो यः को विधाता, सः के उत्सङ्गे यस्य स विष्णुः तस्य, कुः स्थानमिव यः सः, हरेरर्णवशायित्वात् ॥१२॥ इत्येकव्यञ्जनचित्रम् ।

**कुर्वन्दिवाकराश्लेषं दधच्चरणडम्बरम् ।**
**देव यौष्माकसेनायाः करेणुः प्रसरत्यसौ ॥१३॥**

करेणुपदात्ककारच्युतकम् कुर्वन् । हे देव, यौष्माकसेनायाः – युष्यन्त इति यूयं, 'युष्यसिभ्यां मदिक्' [हे उ. ८९९], तेषामियं यौष्माकी, सा चासौ सेना च यौष्माकसेना, तस्याः, युष्मदीयचम्वा ।[9] असौ करेणुः करोति प्रमोदं करेणुः; कृद्रुभ्यामेणुः । 'करेणुर्गजहस्तिन्योः' इत्युणादिवृत्तौ । गजः प्रसरति किं कुर्वन् ? दिवा व्योम्ना साकं कराश्लेषं शुण्डादण्डाश्लेषं निर्मिमाणः । पुनः चरणानामाडम्बरं दधदिति । शतरिनाभ्यस्ताच्छतुरिति नुम् प्रतिषेधे । दधत् बिभ्रत्, स्थवीयस्त्वात् । यद्वा चमुना रणस्य आहवस्य, आडम्बरं दधत् । अथ ककारच्युतके रेणुः प्रसरति । दिवाकरस्य रवेः आश्लेषं कुर्वन् । चरणडम्बरं दधत् । इत्थं व्यञ्जनच्युतकम् ॥१३॥

वक्रोक्तेः स्वरूपं विभाव्यते—

**प्रस्तुतादपरं वाच्यमुपादायोत्तरप्रदः ।**
**भङ्गश्लेषपदेनाह यत्र[10] वक्रोक्तिरेव सा ॥१४॥**

यत्र उत्तरप्रवृत्तौ प्रस्तुतात् अवसरलब्धादर्थात्, अपरं वाच्यं गृहीत्वा, उत्तरप्रदायकः खण्डेन शब्दखण्डेन, श्लेषपदेन च द्वितयार्थवाचकेन एकेनारवेण निरूपयति, सा वक्रोक्तिरुच्यते । 'एव' पदेनास्याः श्लेषालङ्कृतित्वं प्रतिषिद्धमित्युक्तम् ॥१४॥

अथ भङ्गदृष्टान्तमभिधत्ते—

**नाथ ! मयूरो नृत्यति तुरगाननवक्षसो कुतो नृत्यम् ।**
**ननु कथयामि कलापिनमिह सुखलापी प्रिये ! कोऽस्ति ॥१५॥**

काचन वनिता केकिनं नृत्यन्तं निरीक्ष्य वक्ति । हे नाथ । नाथति ईष्टे नाथः, तस्य आमन्त्रणे तथा प्राणेश । मयूरः मीनात्यहीन् मयूरः, मीमसीत्यूरः, मह्यां रौति इति वा; पृषोदरादित्वात् मयूरः, नृत्यति सधवो भङ्गेन व्याचष्टे । हे मृगाक्षि, "किन्नरस्तु किंपुरुषस्तुरङ्गवदनो मयुः" [२.१०८] इत्युक्तमभिधानचिन्तामणौ हेमसूरिपादैः । अतः तुरगाननो मयुः किन्नरः, तस्य उरो वक्षः, तस्य नर्तनमेव कुतः ? कान्ता जल्पति- "नन्वहं कलापिनं निवेदयामि" । कलापो मयूरपिच्छं अस्य अस्ति इति कलापी, तं कलापिनम् । रमणः ब्रूते- हे नितम्बिनि, इह स्थले कं सातं लपति भाषते इति कलापी । को विद्यते ? भङ्गपदैः उत्तरं प्रादायि ॥१५॥

9. अत्र पा. पु. पुस्तकयोः विशेषं—'युष् इति सौत्रोतो मदिक् प्रत्ययः' । 10. मुखे-वु.

वक्रोक्तिश्लेषः उदाह्रियते—

'भर्तुः पार्वति ! नाम कीर्तय नचेत्त्वां ताडयिष्याम्यहं
क्रीडाब्जेन' 'शिवे'ति 'सत्यमनघे किं ते शृगालः पतिः' ।
'नो स्थाणुः' 'किमु कीलको ?' 'न हि, पशुस्वामी' नु 'गोप्ता गवां ?'
दोलाखेलनकर्मणीति विजयागौर्योः गिरिः पान्तु वः ॥१६॥

अन्दोलनलीलाक्षणे विजयागौर्यो – विजयते विजयाह्वा, सखी, गौरवर्णत्वाद् गौरी भवानी, तयोः गिरः वाचः, वः युष्मान् इति, पान्तु । इतीति किम् ? विजयाऽभिधत्ते– हे पार्वति पर्वतस्य अपत्यं स्त्री पार्वती, तस्याः आमन्त्रणे सर्वमङ्गले । भर्तुः प्रियतमस्य, नाम अभिधानं कीर्तय निरूपय । चेत् यदि न कीर्तयिष्यसि, तर्हि निजेति । अप्सु जातं अब्जं, क्रीडयोपलक्षितं अब्जं क्रीडाब्जं, निजं च तत् क्रीडाब्जं च तथा, तेन त्वां ताडयिष्यामि । कात्यायनी इति आह– "शिव" इति । शिव इतीह विसर्गलोपः श्यपि छान्दससन्धौ शिवेति । तदुक्तं प्रभासपुराणे—

पद्मासनसमासीनः श्याममूर्तिर्दिगम्बरः ।
नेमिनाथः शिवेत्याख्यां नाम चक्रेऽस्य वामनः ॥१॥ [ ]

अथवा अन्यथाश्रुतस्य शब्दस्य अन्यथालिङ्गवचनादिभेदेन परिणाममूहः । तथा च सति शक्तिशक्तिमतोरभेदोपचारादिह शिवः ईशानः । विजया अभिधत्ते– हे अनघे निष्पापे सखि, सत्यमिदं; शिवः शृगालो भण्यते । "स्त्रियां शिवेति शृगाल्यां शृगाले च शिवाशब्दः स्त्रियाम्" इति सर्वधरः । तथा च शाश्वतः – "शिवः कीलः शिवा क्रोष्टे" इत्याद्युदाहृतवान् । "फेरण्डः फेरव शिव' [ अ. चि. ४.३५५ ] इति हेमसूरिः । सरति भयेन शृगालः सरतेर्गो[ऽ ?]न्तःश्चेत्यालस्तालव्यादिरपि । सः शृगालः किं ते तव पतिः भर्ता ? गौरी समन्यु वदति– इत्थं भवतीभणितं न किंतु स्थाणुः । तिष्ठति शाश्वतं स्थाणुः; "अजिस्थावृरीभ्योणुः" इत्युणादिवृत्तौ [ हे. उ. ७६३ ]; स्थाणु ईशः । तदनु सखी वक्ति– 'स्थाणुः कीलकशूलिनो' इति तद्वचनात् स्थाणुः कीलको निगद्यते, सः भवत्याः किमु धवः ? उमा प्राह–न हि । किन्तु स्पशिः सौत्रः, स्पशन्ति बाधन्ते पशवः 'स्पशि भ्रस्जेः सलुक च' [ हे. उ. ७३१ ] इति उ प्रत्यये शकारलोपे च । ग्रन्थान्तरे – 'पशेः सौत्रात् । अपष्ट्वादय इति कुप्रत्यये वा,' तत् सिद्धौ । तेषां पशूनां तिरश्चां स्वामी प्रभुः पशुस्वामी । सखी निवेदयति – नु इति विमर्शने, गवां गोप्ता गोपालः, सः किमु भवत्याः भोक्ता ? इति गिरः इह प्रागुदितध्वानस्यैव अर्थान्तराश्लेषात् श्लेषवक्रोक्तिः ॥१६॥

अनुप्रासलक्षणतद्भेदौ प्रतिपिपादयिषुराह—

तुल्यश्रुत्यक्षरावृत्तिरनुप्रासः स्फुरद्गुणः ।
अतत्पदः स्याच्छेकानां लाटानां तत्पदश्च सः ॥१७॥

तुल्या श्रुतिः श्रवणं येषां तानि तुल्यश्रुतीनि; न क्षरन्ति न चलन्ति आत्मा एभ्यः इत्यक्षराणि । तुल्यश्रुतीनि च तान्यक्षराणि वर्णाश्च तथा; तेषां आवर्तनं आवृत्तिः मुहुर्मुहुः आगमनं उच्चारणम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सोऽनुप्रास नाम शब्दालङ्कारो विवक्ष्यते । यथाह भट्टिबाणः—

एकद्वित्र्यन्तरितं व्यञ्जनमविवक्षितस्वरम् ।

बहुशः आवर्त्य तन्निरन्तरमथवा यदसावनुप्रासः ॥१॥ [ रु. का. २.१८ ? ][11]

किंविशिष्टोऽनुप्रासः? स्फुरन्तः स्फूर्त्या द्योतमानाः गुणाः औदार्यप्रमुखाः यस्मात् स स्फुरद्गुणः । अनुप्रासेन हि गुणाः द्योत्यन्ते । स चानुप्रासो द्विविधः छेकानुप्रासो लाटानुप्रासश्च । छेकाश्छेकिलादेश्यां छइल्लालद परिभाषणे । लटन्ति भूरितरं भाषन्ते लाटाः, लाटजनपदोद्भवाः जनाः, तेषामनुप्रासो । तयोर्मध्ये यश्छेकानुप्रासः सोऽतत्पदो भवेत् । तान्येव प्रथमोदितानि पदानि यस्मिन् सः तथा । न तत्पदः, अतत्पदः, भिन्नपदः इत्यर्थः । च पुनः, लाटानुप्रासः तत्पदः स्यात् ॥१७॥

छेकानुप्रासमुदाहरति—

**अलं कलङ्कशृङ्गार करप्रसरहेलया ।**

**चन्द्र चण्डीशनिर्माल्यमसि न स्पर्शमर्हसि ॥१८॥**

काचिद्वियोगिनीतमी रमणमभिधत्ते । हे चन्द्र, कीर्यन्ते कराः पादाः, तेषां प्रसरः विस्तरणं, तस्य हेला लीला, तया इति अलं पूर्यताम् । वारणार्थयोगे तृतीया । किरति सन्देहं कलङ्कः, रसेषु शृङ्गं उत्कर्षं इयर्ति इति शृङ्गारः, कलङ्क एव शृङ्गारो यस्य सः, तथा तदामन्त्रणे 'हे कलङ्कशृङ्गार' । यत एव त्वं चण्डीशनिर्माल्यम् । चण्डी अत्यन्तकोपनत्वात् दुर्गा, तस्याः ईशः नाथः चण्डीशः गिरिशः । तस्य निर्माल्यं वर्तसे, अत एव स्पर्शं नार्हसि, स्प्रष्टुमुचितो न भवसि । इतरदपि महेशमाल्यं न स्पृश्यते । अपरस्य कलङ्कः दोषः, भवतः अतीव निकृष्टस्य एव भूषणम् ॥१८॥

अथ लाटानुप्रासः पदैरुदाह्रियते—

**रणे रणविदो हत्वा दानवान्दानवद्विषा ।**

**नीतिनिष्ठेन भूपाल भूरियं भूस्त्वया कृता ॥१९॥**

कश्चन जनार्दननुतिं व्यनक्ति । हे भूपाल क्षोणिपते, इयं भूः वसुन्धरा; त्वया सत्या, भूः—भवत्यस्यां सर्वमिति भूः धनधान्यादीनामुत्पत्तिस्थानं व्यधायि । किं कृत्वा? रणे सङ्गरे समर रसिकान् दानवान् । दनोरपत्यानि दानवाः, तान् कंसादीन् हत्वा विध्वस्य । किंविशिष्टेन त्वया? दानवद्विषा । दानवान् द्वेष्टीति दानवद्विट्, तेन दैत्यारातिना । पुनः कीदृशेन? नीतौ राजदण्डादिनीतिशास्त्रे निष्ठः तत्परः, तेन ॥१९॥

अथ लाटानुप्रासं पादेन निदर्शयति—

**त्वं प्रिया चेच्चकोराक्षि स्वर्गलोकसुखेन किम् ? ।**

**त्वं प्रिया यदि मे न स्याः स्वर्गलोकसुखेन किम् ? ॥२०॥**

हे चकोराक्षि, चकोराक्षिणी इव अक्षिणी यस्याः सा चकोराक्षी । उष्ट्रमुखादित्वात् उपमानवाच्यक्षिशब्दस्य बहुव्रीहौ लोपे, तदामन्त्रणे च । त्वं प्रिया भार्या चेत् यदि, मे मम भवेः, तर्हि स्वर्गलोकस्य सुखं सातं, तेन किं विदधाति? चेत् त्वं प्रिया संभोगविदग्धा मे न स्याः तदापि तेन किम्? न किंचिदिवेत्यर्थः ॥२०॥

11. रु.का. २.१८—कारिकैषा श्लोकस्यास्य प्रायः समाना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एषु प्रागुदितेषु सर्वथा सदृशानामेवाक्षराणामावृत्तिः कथिता । अधुना किञ्चिद्भेदेऽप्यक्षराणां सदृक्श्रुतित्वादनुप्रासो भवेदिति स्पष्टयति—

एकत्रपात्रो स्वकलत्रवक्त्रे नेत्रामृतं बिम्बितमीक्षमाणः ।
पश्चात्पपौ सीधुरसं पुरस्तान्ममाद कश्चिद्यदुभूमिपालः ॥२१॥

कश्चन यदुपतिः सीधुरसं, शेरतेऽनेन 'शीङ्गोधुक् [हे उ. ७८४] शी[सी]धुरासवः, तस्य रसः, तम् । पश्चादिति दिग्देशकालार्थस्य सप्तमीपञ्चमीप्रथमां तस्यावरशब्दस्यातिः पश्चभावश्च सद्य आद्यत्वान्निपात्यते । पश्चादुन्मादकालानन्तरं, अवरस्मिन् काले पपौ पीतवान् । पुरस्तादिति दिग्देशकालार्थात्सप्तमीपञ्चमीप्रथमां तादऽस्तातिः पूर्वशब्दस्य पुर्भावश्चेति पुरस्तादेव ममाद । सीधुपानकालात्पूर्वमेवोन्मादमासादितवान् । तत्र हेतुगर्भितं विशेषणं ब्रूते । कीदृक्ष ? एकत्र एकस्मिन्, पिबत्यनेन पात्रं, तस्मिन् नमत्रे कडति माद्यति कडत्रम् । 'वृग्नक्षीत्यत्र' [हे. उ. ४५६] लत्वे कलत्रम् । स्वं स्वकीयं च तत् कलत्रं च तथा उच्यते । अनेन वक्त्रं 'हुयामेति त्रः', [हे. उ. ४५१] तस्य वक्त्रं आननम् । स्वकलत्रवक्त्रे प्रतिबिम्बितं लोचनपीयूषप्रायं विलोकमानः । एतेन स्वसीमन्तिनीवदननिरीक्षणादेव प्रागुन्मादमाप । पश्चात् मैरेयमपादिति सूचितम् । यस्तु स्फुरद्गुणो न स्यात् सोऽनुप्रासो न । यथा एकत्रपात्रे भूयस्तराक्षरावृत्तौ सौकुमार्यबाधः एव, इत्थमपरेषां गुणानां बाधोऽनुप्रासप्रवणेन विबुधेन रक्षणीयः । तथा चाभाणि माघाद्यस्वर्गस्थनिवर्त्येत्याद्येकादशवृत्तसर्वंकषावृत्तौ । अत्र नतोनतीपद[ःपाद]मिति द्वयोर्व्यञ्जनयुग्मयोरसकृदावृत्त्या छेकानुप्रासः, अन्यत्र वृत्त्यानुप्रासः । [शिशु १.११. टीका] तथा एकादशसर्गस्थ 'विकच' इति प्रभृतिकवृत्तवृत्तौ अनुप्रासोऽलङ्कारः ।[13] [शिशु. ११.१९-टीका]

श्लेषः प्रसादः समता माधुर्यं सुकुमारता ।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥१॥ [का द. १.४१]

इति वैदर्भमार्गस्य दण्डिनाऽऽचार्येणोक्ताः दशप्राणा गुणाः प्रायेणात्र सम्भवन्ति । ते च शृङ्गाररसोचितास्तज्ज्ञैरुन्नेयाः । एतदुदाहरणं अमरूशतकाद्यकाव्यमाह—

ज्याकृष्टिबद्धखटिकामुखपाणिपृष्ठप्रेङ्खन्नखांशुचयसंवलितोऽम्बिकायाः ।
त्वां पातु मञ्जरितपल्लवकर्णपूरलोभभ्रमद्भ्रमरविभ्रमभृत्कटाक्षः ॥२॥ [अ. श. १]

लोभभ्रमदित्यादिनाऽनुप्रासो नाम शब्दालङ्कारः । भावार्थस्त्वेतद्वृत्तितोऽवसेयः ॥२१॥

इदानीं यमकलक्षणभेदान् प्रकटयति—

स्यात्पादपदवर्णानामावृत्तिः संयुताऽयुता ।
यमकं भिन्नवाच्यानामादिमध्यान्तगोचरम् ॥२२॥

पादपदवर्णानां आवृत्तिः भूयोभूयः कथनं, द्विरुक्तत्वं यमकं भवेत् । वृत्तस्य तुर्यो वंटः पादः, 'सुप्तिङन्तं पदं', वर्णाः अक्षराणि -एतेषां त्रयाणामप्यावृत्तिः द्विविधा भवति । एका संयुता मिलिता ।[14]

12. न स्यान्मे-पु. पा. 13. शिशु. ११.१९

14. 'संपृक्ता संलग्ना । इतरा '—पु.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतरा असंयुताऽमिलिता ! षोढा यमकं स्यात् । षड्विधमपि तत् त्रिविधं- एकमादिविषयं चरणस्यादिमाक्षरगोचरं, द्वितीयीकं[15] मध्यविषयं चरणस्यान्तरावर्त्यक्षरगोचरं, तृतीयं अन्तविषयं चरणस्यावसानाक्षरगोचरम् । एतावता स्पष्टाः यमकस्य अष्टादशप्रकाराः स्युः । वर्णप्रभृतीनां संपृक्तासंपृक्तत्वेनापरेऽपि भूयांसो भेदाः भवन्ति । किंलक्षणानां पादपदवर्णानाम् ? भिन्नवाच्यानाम् । भिन्नं पृथक्, वाच्यं अर्थः येषां ते भिन्नवाच्याः, तेषां तथा । एतद्विशेषणार्थानुपात्यधिकारोऽस्ति काव्यप्रकाशे—

अर्थे सत्यर्थभिन्नानां वर्णानां सा पुनःश्रुतिः ।
यमकं पादतद्भागवृत्ति तद्यात्यनेकताम् ॥१॥ [९.८३]

इति इयता लाटानुप्रासस्य यमकत्वं निराकृतम्, तस्मिन्नर्थस्य च एकत्वात् । अतो निदर्शनाधिकत्वं तथा यमकभेदलक्षणं आचार्यदण्डिनोक्तम्—

अव्यपेतव्यपेतात्मा या वृत्तिर्वर्णसंहितेः ।
यमकं तच्च पादानामादिमध्यान्तगोचरम् ॥१॥ [का.द. ३.१]

एकद्वित्रिचतुःपादयमकानां प्रकल्पना ।
आदिमध्यान्तमध्यान्तमध्यपादाद्यसर्वतः ॥२॥ [का.द. ३ २]

अत्यन्तं बहवस्तेषां भेदाः सम्भेदयोनयः ।
सुकरा दुष्कराश्चैव दृश्यन्तेऽत्र केचन इति ॥३॥ ॥२२॥ [का.द. ३.३]

अथ यमकानि दिदर्शयिषुः प्रथमं संयुतादिविषयकपादयमकमुदाहरति—

**दयां चक्रे दयां चक्रे**

**सतां तस्माद्भवान्वित्तम् ॥२३॥**

भं भाग्यमस्त्यस्य भवान्, त्वं यस्माद्दयांचक्रे करुणां विदधे, तस्मात्कारणात् सतां सज्जनानां, वित्तं विद्यते लभ्यते; वित्तं धनं, प्रतीतमिनिक्तस्य नत्वाभावः । स्वापतेयं दयां चक्रे ददावित्यर्थः । चतुरक्षरमेतच्छन्दः ॥२३॥

संवृता[त]मध्यपादयमकं व्याचष्टे ।

**यशस्ते समुद्रान् सदारोरगारेः ।**

**सदा रोरगारेः समानाङ्गकान्तेः ॥२४॥**

हे पृथिवीश, ऋते तव यशः, सत्श्रेष्ठभूतं; समुद्रान्—समुदन्ति उत्क्लिद्यन्ति चन्द्रोदये आपः एभ्यः इत्यपादाने, स्फायितं 'चिवंचीत्यादिना रक्,' समुद्राः, तान् मितद्रून् । आरेति गतौ प्रापणे च, इत्यस्य धातोः लिटि रूपं जलनिधिपारं प्राप । किंलक्षणस्य ते ? उरगारेः तार्क्ष्यस्य, समाना सदृक्, अङ्गकान्तिः तनुरुचिर्यस्य सः तथा, तस्य काञ्चनगौरस्य इत्यर्थः । पुनः किंविशिष्टस्य ? सदा सर्वदा, रोरं दारिद्र्यं, गच्छन्ति प्राप्नुवन्ति इति सदारोरगाः, अरयो द्विषो यस्य सः, तथा तस्य । षडक्षरमिदं छन्दः । यथौ सोमराजीति लक्षणात् ॥२४॥

15. 'द्वितीयकं'–पा.पु.

६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संयुतान्त्यपादयमकं निरूपयति—

द्विषामुद्धतानां निहंसि त्वमिन्द्रः ।
मुदं भो धराणामुदम्भोधराणाम् ॥२५॥

भोः काश्यपीपाल पुरन्दर । उद्धतानां उद्धन्यन्ते स्म उद्धताः प्रखराः, यद्वा हन्तेर्गत्यर्थोक्तेः उत्तरा दुत्प्लुत्य हताः गताः उद्धताः । तेषां द्विषां रिपूणां त्वं मुदं संमर्दं, निहंसि प्रोज्जासयसि । केषां कः इव ? धराणां इन्द्रः इव । ध्रियन्ते धराः क्षितिधराः, तेषाम् । यथा 'इन्द्रो धराणां सानुमतां मुदं निहन्ति' । कथंभूतानाम् ? उत् ऊर्ध्वं अम्भोधरो येषां ते, तथा तेषाम् उदम्भोधराणां उन्नतविद्युत्वताम् । छन्दोऽप्येतत् षडक्षरम् ॥२५॥

आद्यमध्यमगोचरमन्तरालावसानगोचरं च दर्शयति—

विभाऽतिरामा परमारणस्य विभाति रामा परमा रणस्य ।
सद्दैव तेऽजोर्जित राजमान सदैवतेजोर्जितराजमान ॥२६॥

हे पार्थिवेश ! ते तव, रणस्य संग्रामस्य, विभानं विभा, प्रकाशः । सदैव विभाति द्योतते । कीदृशस्य रणस्य ? परमारणस्य । परशब्दस्य रिपुवचनार्थत्वात्, परेषां शत्रूणां, मारणं प्रमाथनं यस्मिन् सः, तथा तस्य । किंलक्षणा विभा ? अतिरामारामं श्रीरामचन्द्रं अतिक्रान्ता अतिरामा; अतिक्रान्तो रामो यया वा । पुनः कीदृशी ? परमापरैः मीयते या सा परमा; परा प्रकृष्टा, मा लक्ष्मीः, शक्तिः, शोभा वा यस्याः सा इति वा । पुनः किंभूता ? रामा-रमते मनोऽत्र रामा रमणीया । हे अजोर्जितराजमान अजवत् गोविन्दवत्, ऊर्जितेन शौर्येण, राजमानो विभ्राजमानः, तदामन्त्रणे तथा । हे सदैव तेजोर्जितराजमान ! देवस्य आत्मनः, इदं पूर्वकार्मदैवतं दैवमेव प्रबलमिति वचनात् तद्देव प्रबलं भागधेयं, तेन सह वर्तमानम् । सदैवं तेजयतीति तेजः, उत्कटत्वं प्रभुत्वशक्तिजं, ततः सदैवं च तत्तेजः च तथा; तेनार्जितं उपार्जितं, राजसु मध्यलोकेशेषु, मानं पूजा, लक्षणं सन्मानं येन सः, तथा तस्य सम्बोधने ॥२६॥

अधुना संयुतावृत्तौ प्रथमान्तरालचरणयमकं रैवतशैलेडाप्रारम्भपूर्वकमाचष्टे—

सारं गवयसान्निध्यराजिकाननमग्रतः ।
सारङ्गवयसां निध्यादारुणं शिखरे गिरेः ॥२७॥

गिरेः गीर्यते गिरिः, 'नाम्युपान्त्येतिकिदिः, [हे. व्या. ५.१.५४], तस्योज्जयन्तस्य शिखरे । शाखति व्याप्नोति गगनं शिखरम् । "शाखेरिदेतौ चातः"[हे. उ. ४२०] इत्यपरः, तस्मिन् शृङ्गे । केन जलेन, आननं प्राणनं अस्य तत् काननं वनम् । अग्रतः पुरस्तात्, भातीत्यध्याहार्यम् । कीदृक् काननम् ? सारं सरति कालान्तरं, सारं श्रेष्ठम् । पुनः किंभूतम् ? गवन्ते गवयाः, 'कुगुवलीत्यय.' [हे. उ. ३६५] गवाकृतयो वनगवाः, तेषां सन्निधिरेव सान्निध्यम् । तेन सामीप्येन राजते इत्येवंशीलं गवयसान्निध्यराजि । पुनः किंलक्षणम् ? सरन्ति सारङ्गाः, 'सृवृनृभ्यो णित्' इत्यङ्गः [हे. उ. ९९],' सारं गच्छन्तीति वा । वयन्ते वयसः, 'असित्यस्,' [हे. उ. ९५२]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सारङ्गाश्च वयश्च, तथा तेषां सारङ्गवयसां मृगविहङ्गमानां, स्थानमिति शेषः । तथा निधिभिः सेवधिभि; अदारुणं-दारयति चित्तमिति दारुणं, न दारुणमदारुणं, रमणीयमित्यर्थः । यद्वा सारङ्गवयसां निधिभूतमास्पदीभूतं, अदारुणं सौम्यं च ॥२७॥

प्रथमचरमचरणयमकमभिधत्ते—

**आसन्नदेवा न रराज राजिरुच्चैस्तटानामियमत्र नाद्रौ ।**
**क्रीडाकृतो यत्र दिगन्तनागा आसन्नदे वानरराजराजि ॥२८॥**

अस्मिन् अद्रौ-अद्यते वज्रेण अद्रिः तः 'किवंक्रोतीरिः', तस्मिन् गिरौ । इयं इदं, एतदस्मच्छब्दा अव्यवहिताऽर्थनिर्देशे, अतः अध्यक्षगम्या एषा । तटानां राजिः ततिः, उच्चैस्तरां न रराज, किन्तु रराज एव । किंभूता? आसन्नाः निकटवर्तिनः, देवाः अमर्त्याः, यस्यां सा आसन्नदेवा । अतीवोच्चतरत्वात् । तथेह सानुमति आशाकरिणो, नदे सलिलालये लीलाकारकाः अभवन् । किंलक्षणे अद्रौ? वानरराजराजि-वानराणां राजा वानरराजः, राजाहः । 'सखिभ्यष्टजिति टच्' तेन राजते वानरराट्, तस्मिन् कपीशविभ्राजमाने ॥२८॥

अन्तरान्त्यगोचरं यमकमावेदयति—

**अमरनगरस्मेराक्षीणां प्रपञ्चयति स्फुरत् सुरतरुचये कुर्वाणानां बलक्षम रंहसम् ।**
**इह सह सुरैरायान्तीनां नरेश नगेऽन्वहं सुरतरुचये कुर्वाणानां बलक्षम रंहसम् ॥२९॥**[16]

हे नरेश, मनुष्यश्रेष्ठ हे बलक्षम पराक्रमशक्त, इह अस्मिन्, नगे रैवताभिधशैले, बाणानां बाणपादपानाम् । कुः कायति भूपं, कुर्वसुमतो, स्मेरे स्मनयनशीले अक्षिणी यासां ताः स्मेराक्ष्यः । अमरनगरस्य स्वर्गस्य स्मेराक्ष्यः, तथा तासां त्रिदिवप्रमदानां, रंहसं[17] संवेगं, प्रपञ्चयति विस्तारयति, भृशं अन्तःकरणाह्लादकत्वात् । कीदृशे नगे? स्फुरन्तः विराजमानाः सुरतरूणां देवद्रुमाणां चयाः समुदाया यस्मिन् स तथा, तस्मिन् । किंभूतानां सुरो[रा]णां? सुरैः त्रिदशैः, सत्रा सुरतरुचये सुरतस्य रुचिरा आकांक्षा, तस्यै सम्भोगेच्छायै । अहङ्गतो, अहंते गच्छति अहः अहरहः अनु अन्वहं, अहः अनुक्रम्य वा । अहनि अहनि अन्वहम् । अव्ययं विभक्त्या दना यथार्थेऽव्ययीभावे अन्वहं अनुदिनं, आगच्छन्तीनाम् । बाणानां कुद्दालिकामनोहरत्वात् अध्वानं जवं जनयति । पुनः किंभूतानाम्? अरं इयर्ति अरं बाहुलकारं, द्राग् अत्यर्थं, बलक्षं बलते अवलक्ष्यते वा, 'पृषादरादित्वात्' । बलक्षं शुक्लं, हसं हास्यं, कुर्वाणानां विदधानानाम् । एतेनेहाद्रौ गीर्वाणरिमा निधुवनलीलां निर्मातुं समायान्ति । विबुधवध्वः इति ख्यापितम् ॥२९॥

अखण्डवृत्तपर्यन्तावृत्तिर्यथा—

**रम्भा रामा कुरबककमला ।**
**रम्भारामा**[18]

अवतीत्यवकः, तस्य आमन्त्रणे । हे अवक, त्रैलोक्यान्तर्वर्ति । निखिलजन्तुरक्षकश्रीमदरिष्टनेमे !

---

16. ने. नि. ७.१६ 17. 'रंहः' पु. 18. ने. नि. ७.५०

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतादृशी कुःवसुधा विद्यते । किंविशिष्टा ? रंभारामा-रमन्ते आसु ताः रंभाः, 'गृधुरमीतिभः' [हे. उ. ३२७], रम्भन्ते इति वा । आरमंत्येष्वित्यारामाः, तासां रम्भाणां कदलीनां आरामाः उपवनानि[19] यस्यां सा, तथा । पुनः किंलक्षणा ? कमलारम्भाः-काम्यन्ते श्रिया तानि कमलानि; कमं लोलन्ति भूषयन्ति वा, केन मलयन्त इति वा । तेषां आरम्भः उत्पादो [20]यस्यां सा, तथा । रामा रम्या । पुनः कीदृशी ? कुरबकाः अम्लानलोहितप्रसवाः तरुविशेषाः । तमेवार्थमुदाहृतवान् । शोणाम्लानः कुरबकः, अरुणा प्रीता च किंटिकेतिः उद्धृस्तैः कमलशोभा यत्र सा । पुनः किंविधा ? रंभा वेधसः वदनात् विनिर्गताः स्वर्गिवध्वः । रमन्ते रामाः, या गीतकलाभिः रमयन्ति वा, ताः एव रामाः सीमन्तिन्यः यस्यां सा । पुनः किंभूताः ? नकुरकुरकुत्सितेत्यैदंपर्यम् । पुनः कथंभूता ? न विद्यन्ते बकाः यस्मिन् तत् अबकं बकरवगापेतं, कं उदकं; 'मलमल्लि धारणे' इत्यतः मलति धारयति इति अबककमला । पुनः किंविशिष्टा ? अरमत्यर्थम् । भेरुदुभिरा ईषद्वामा, किंचिच्छ्यामा किंचित् श्वेताः कर्बुरा इत्यर्थः । रम्भारामा;[21] पुनः किंभूताः ? कुः कुत्सितः खकः ध्वनिर्येषां ते कुरबकाः, न तथा अकुरबकाः कमलाः । कं पवनम् । जवतः मलन्ति कमलाः, वाच्यबलात् तादृशाः कृष्णसारमृगाः यस्यां सा । इत्थमितरदपि यमकमवमातव्यम् ॥३०॥

अधुनोदितेनैव प्रकारेण पदयमकातिदेशनानि संयुतावृत्ताविह चरणचतुष्केष्वादिपदयमकं यथा—

**हारीतहारी ततमेष धत्ते शेवालसेवालसहंसमम्भः ।**
**जम्बालजं बालमलं दधानं मन्दारमन्दारववायुरद्रिः ॥३१॥**

एषः एतीत्येषः, "इण् गतौ" [हे. व्या. २.१.५१-इणः] इति अस्माद्धातोः 'एतेस्तुट्' चेत्यनेनौणादिकोऽदिः प्रत्ययः, तस्य तु डागमश्च । ततः एतत्शब्दनिष्पत्तौ प्रथमैकवचने सौत्यदाद्यत्वसत्वेषत्वे च रूपसिद्धौ अभ्यर्हितार्थनिर्देशकः । एषोऽत्यासन्नवर्ती अद्रिः गिरिनारिनामा सानुमान् । अम्भः - अं अतिनिम्नं प्रदेशं अम्भः धत्ते । किंविशिष्टोऽद्रिः ? हारीतहारी - हरन्ति जीवान् हारीताः, दुर्गईतणहारिणं वर्त्म, मिताः वा मृदङ्कुराः शकुनविशेषाः, तैः हारी चेतोहारी । कीदृगम्भः ? ततं विस्तीर्णम् । पुनः किंलक्षणम् ? शेवालसेवालहंसं- शेरते अम्भसि शेवालानि जलशूकाः, निदनन्ति अध्वानं गच्छन्ति इति हंसाः; मात्रावदीति सः; तेषां सेवायै अलसाः मन्थराः, हंसाः यस्मिन् तत्तथा । किंकुर्वाणम् ? जम्बाले चिकिले जायते स्म जम्बालजं पङ्कजम् । अलमत्यर्थं, दधानं बिभ्राणम् ।[22] कीदृशोऽद्रिः ? मन्दारेति० मन्यन्ते स्तूयन्ते देवैः मन्दाराः, मन्दं इयरति वा पारिजातकाः, तैः तरुविशेषैः, मन्दारवः तनुनिःस्वनः, वायुर्यस्मिन् सः । मन्दारमन्दारववायुः इत्यनेनानिलस्य शीतादित्रैविध्यं दर्शितम् ॥३१॥

19. उपमानानि-पा.

20. यस्यां सा...यत्र सा. इदं पा. ग्रन्थे नास्ति ।

21. 'पुनः किंविशिष्टा...रम्भारामाः'-इदं व. पुस्तके नास्ति ।

22. 'किं ? जंबालां नूतनां' पा. पुस्तके व. पुस्तके च विशेषम् ।
'किं विशिष्टं ? जम्बालं नूतनं' पु. पुस्तके विशेषम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरणान्तवर्ति यमकं यथा —

नेमिर्विशालनयनो नयनोदितश्रीरभ्रान्तबुद्धिविभवो विभवोऽथ भूयः ।
प्राप्तस्तदेति नगरान्नगराजि तत्र सूतेन चारु जगदे जगदेकनाथः ॥३२॥[23]

अथेत्यनंतरं भूयो मुहुर्मुहुः श्रीमदरिष्टनेमिः । सूतेन-सुनोति इति सूतः, सुवति इति वा, सारथिः; तेन चारु सुन्दरं यथा स्यात्तथा, जगदेऽभाणि । किंभूतः? विशाले नयने यस्य सः विशालनयनः । पुनः किंलक्षण ? नयेन सदाचारवर्त्मना, नोदिता उदीरिता श्रीः यत्र, स तथा । पुनः किंभूतः? अभ्रान्तेति- बुद्धयतेऽनया बुद्धिः ।

बुद्धिः सर्वत्र सम्पन्ना बुद्धिः संसारतारिणी ।
बुद्धेरगोचरं नास्ति तस्माद्बुद्धिर्गरीयसी ॥इति १ ॥

अभ्रान्ता तुर्या पुमर्था, अव्यभिचारिणी सत्या, सा चासौ बुद्धिश्च अभ्रान्तबुद्धिः; सा एव विभवो द्रव्यं यस्य सः, अभ्रान्तबुद्धिविभवः । पुनः कोदृग्? विगतो भवः संसृतिरूप; यस्मात् सः विभवः । नगरात् द्वारावत्या द्रुयात्, तत्र नगैः राजते नगराट्, तत्र रैवतकशिखरिणि तदा प्राप्तः । कथंभूतः ? जगतः त्रैलोक्यस्य एकोऽद्वितीयो नाथो योगक्षेमकारित्वात् स्वामो ॥३२॥

पादावसानयमकं यथा —

यदुपान्तेषु सरलाः सरला यदनूच्चलन्ति हरिणा हरिणाः ।
तदिदं विभाति कमलं कमलं मदमेत्य यत्र परमाप रमा ॥३३॥[24]

तदिदं प्रत्यक्षगतं कायतिकं तोयं, अलं अतीवतरां, विभाति विभ्राजते । उप समीपः, अन्तोऽस्य उपान्तं, तत्रभवानि उपान्तिकानि, यस्याम्भसः उपान्तिकानि यदुपान्तिकानि, तेषु स्थानेषु सरलाः अकुटिलाः, सरलाः देवदारवः तरवः सन्ति तथा । यदुदकमनुलक्षी[क्ष्यी]कृत्य हरिणा गन्धवहेन, सत्रा हरिणा, गीतेन ह्रियन्ते हरिणाः सारङ्गाः; उच्चलन्ति उत् प्राबल्येन पर्यटन्ति । यत्राम्बु[म्ब्रू?]नि रमा श्रीः, एत्य, परं प्रकृष्टं कमलं पद्माप । मदमिति पाठे, यस्मिन् कुशेशये पद्मा आगत्य परं पदं लेभे ॥३३॥

असंयुतावृत्तौ यथा —

कान्तारभूमौ पिककामिनीनां कां तारवाचं क्षमते स्म सोढुम् ।
कान्ता रतेशेऽध्वनि वर्तमाने कान्तारविन्दस्य मधोः प्रवेशे ॥३४॥[25]

काम्यते इति कान्ता नितम्बिनी । रतेशे-रतं रतागं, तत्रेशः प्रभू[भुः] रतेशः तस्मिन्, धवे । अध्वनि वर्त्मनि, वर्तमाने सति; मन्यते । मधुः मौहनिकः, तस्य प्रारम्भे । कान्तारभूमौ-काम्यते कान्तारं गहनं, भवत्यस्यां सर्वं भूमिः । 'कृभूभ्या'मितिकितिमि प्रत्यये भूमिः, तस्य भूमिः कान्तारभूमिः, तस्या विपिनक्षोणौ । पिककामिनीनां-पिबन्ति चूतरसं पिकाः, अपिहिताः कायन्ति । 'उपसर्गेत्वा तो डः' इति कलकंठाः । प्रतिशब्दितकामाः कामिन्यः, कामः शृङ्गाररूपो मन्मथोऽस्यामिति वा,

23. ने. नि ६.५१ 24. ने. नि. १.२५ 25. ने.नि. ६.४६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तेषां कामिन्यः पिककामिन्यः, तासां कोकिलानां । तारवाचं-तारयति स्वरं स्थानेभ्यः स्थानान्तरं नयति; तारति वा तारः । स्त्रीत्वे तारा सा चासौ वाक् च तारवाक्, तां अतीवोच्चैः निःस्वनवाणीं सोढुं कां क्षमते स्म, अपि तु न कामपीत्यर्थः । कीदृशस्य? मधोः । अरान् विन्दन्ति इति अरविन्दानि, कान्तानि चेतोहराणि अरविन्दानि नलिनानि यत्र तथा तस्य ॥३४॥

अं[अ]भ्यन्तर्यमकं यथा—

**चकार साहसं युद्धे धृतोल्लासा हसं च या ।**
**दैन्यं त्वां साह सम्प्राप्ता द्विषां सोत्साह सन्ततिः ॥३५॥**

हे सोत्साह असाध्यसाधन, इयद्दूशेन उद्यमः उत्साहः, उद्यम्य सहनं उत्साहो वा शक्तिविशेषः, तेन सह वर्तमान सोत्साहः, तस्य सम्बोधने तथा सोद्यमा । सा द्विषां सन्ततिः- संतन्यतेऽनया संततिः; परं परात्वां भवं, तं प्राप्ता आसादिता[26] सती दैन्यमाह भणति । या युद्धे-युद्ध्यन्तेऽत्र युद्धं, तस्मिन् आयोधने । साहसं-सहसि बले भवः साहसः, तं चकार निर्ममे । च पुनः, धृतोल्लासा सती इह हास्यं विदधे ॥३५॥

चरणचतुष्टयपर्यन्तयमकमभिधित्सुराह—

**गिरां श्रूयते कोकिला कोविदाऽरं यतस्तद्वनं विस्फुरत्कोविदारम् ।**
**मुनीनां वसत्यत्र लोको विदारं न च व्याधचक्रं कृतौको विदारम् ॥३६॥**

अत्र अस्मिन् वने । को कला कोके चितं गृह्णाति कोकिलः, स्त्रियामजातित्वादापि कोकिला मधुघोषा श्रूयते । किंभूता? गिरां वाचां विषये अत्यर्थम् । कोविदा-को वेत्ति अभिप्रायमस्य कोविदः, स्त्रीत्वे कोविदा विशारदा । यतः यस्मात् कारणात्, तद्वनं विस्फुरत्कोविदारम् । विद्यते कन्ति दीप्यन्ते कोविदाराः; कुं भूमिं, विदारयन्ति वा, विस्फुरन्तः विकाशि[सि]तं स्पष्टयन्तः[27] कोविदाराः कर्णिकाराः तरुविशेषाः यस्मिन् तत्, तथात्र विपिने । मुनीनां यतीनां लोकः यतिवर्गः । विगताः दाराः कलत्राणि यस्मिन् तद्विदारं, निर्वनिताकं यथा स्यात्तथा वसति । च पुनः, अस्मिन् कानने व्याधानां आखेटकानां, चक्रं वृन्दं, व्याधचक्रम् । कृतं ओकः येन तत् कृतौकः विहितालयं नास्ति । किंविशिष्टं? वयः खगाः, तान् दारयतीति विदारम् ॥३६॥

अथाद्वित्रितयेऽपि प्रथमान्तरावसानयमकानि निदर्श्यन्ते । चरणद्वयादियमकं यथा—

**सिन्धुरोचितलताग्रसल्लकीसिन्धुरोचितमुपेत्य किन्नरैः ।**
**कन्दराजितमदस्तटं गिरेः कन्दराजितगृहश्रि गीयते ॥३७॥**

अदः शिखरिणः तटं सानुं उपेत्य समेत्य । किन्नरैः- कुत्सिताः नराः[28] अश्वमुखत्वात् किन्नराः तैर्मिथुनैर्गीयते । कीदृशम्? सिन्धुरोचितलताग्रसल्लकी सिन्धुरो चितंस्यन्दन्ते, मदेन सिन्धुराः,

26. आप्रसादिता-पु. 27. स्पष्टयन्ति-पा.

28. अदः...नराः—इदं पा. पुस्तके नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सिन्धुर्मदोऽस्त्येषामिति वा मतङ्गजाः, तेषां उचिता अर्हा; 'लतिः सौत्रोधातुरुद्दिष्टः': लतन्ति इति एचाद्यच्; लताः शाखाः वा वल्लयः, ताः अग्राः श्रेष्ठाः सल्लक्यश्च; सत्कृत्य लक्यन्ते स्वाद्यन्ते गजैः मल्लक्यः गजप्रियाः, ताभिः उपलक्षिता। सिन्धुः स्यन्दतेः, सिन्धुः स्यदेः सम्प्रसारणं, धश्चेत्यु। सम्प्रसारणं धातोर्धश्चान्तादेशः, तत्सिद्धौ तटिनी, तया रोचितं विभ्राजितम। पुनः कीदृशम्? कंद्यन्ते इष्यन्ते कन्दाः मूलविशेषाः, तैः राजितं शोभितम। पुनः कथंभूतम्? कन्दराजित-गृहश्रि० कन्दन्ते विक्लुवन्ते आसु कन्दराः। कं हणन्ति कन्दाः सन्त्यत्र वा। ताभिः दरीभिः जिता गृहश्रीः सदनाभिख्या येन तत्तथा ॥३७॥

प्रत्येकमंहिद्वितयान्तर्यमकं यथा—

वसन्सरोगोऽत्र जनो न कश्चित्परं सरोगो यदि राजहंसः।
गीतं कलं को न करोति सिद्धः शैले कलङ्कोज्झितकाननेऽस्मिन् ॥३८॥

अत्रास्मिन्नद्रौ कः सिद्धः? त्रिदशविशेषः। कलं कलते कलः, कं सुखं लाति वा, तम्। मधुरं गीतं न करोति, अपि तु समस्तोऽपि करोत्येव। कीदृशैः? किरन्ति सन्देहं कलङ्काः विषतरवः, तैरुज्झितमपनोतं काननं यस्मिन् स तथा, तस्मिन् सकलोत्तमेऽत्र गिरौ वसन्। सरोगः – रुजति रोगः, तेन सह वर्तमानः। सपाटवः कश्चन जनो न विद्यते। यदि परं केवलं, सरोगः। राजहंसः – हंसानां राजा राजहंसः, अतिलोहितचञ्चुचरणः पक्षिविशेषोऽस्ति। सरसि कासारे, गच्छति स्म सरोगः।

क्रमद्वयावसानयमकं यथा—

जहुर्वसन्ते सरसीं न वारणाः बभुः पिकानां मधुराः नवा रणाः।
रसं न का मोहनकोविदारकं विलोकयन्ती बकुलान् विदारकम् ॥३९॥[29]

अत्रास्मिन् गिरौ, वारणाः स्तम्बेरमाः, वसन्ते वसत्यस्मिन् सुखं, वस्ते भुवं वा वसन्तः तस्मिन्। पिकबान्धवे सरसीं सरति जलमत्र 'असित्यसि' [हे. उ. ९५२] गौरादित्वात् ङ्यां सरसी। वाचस्पतिस्तूक्तवान्—
'सरसी तु महासर इति।, तां न जहुर्नापनिन्युः। पिकानां परपुष्टानां, मधुराः श्रवणसातकराः, नवाः नूतनाः, रवाः ध्वनयः, बभुः विरेजिरे। काः? नायिकाः। मोहने निधुवने, कोविदाः चतुराः, चतुरामोहनकोविदाः। सुरतविचक्षणा गतधवा काचन नितम्बिनी। बकुलान् वं[बं]कन्ते पुष्पैः बकुलाः, तान् केसरान् विलोकयन्ती, पश्यन्ती सती। कं रसं, आर प्राप। अपि तु न कमपि रसं प्राप्तवती। किं च प्रियसन्निधानमेव सर्वं साफल्यकारणमिति भावः। व्याख्यानान्तरे- कं रसं न आर न आसादयामास। अपि तु आसादयामास एव। कथम्? विगताः दारकाः सुताः यस्मिन् तद्विदारकं निस्तनूजं यथा भवति तथा। अजातापत्यायाः सम्भोगशक्तत्वात् ॥३९॥

---

29. ने. नि. ६.४७

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चरणेषु प्रत्येकमाद्यावसानयमकं यथा—

वरणाः प्रसूननिकरावरणा मलिनां वहन्ति पटलीमलिनाम् ।
तरवः सदात्र शिखिजातरवः सरसश्च भाति निकटे सरसः ॥४०॥[30]

अस्मिन् शिखरिणि वरणाः पादपविशेषाः सन्ति । कथंभूताः? प्रसूयन्ते स्म प्रसूनानि, 'सुयत्यादीति' [ हे व्या. ४.२.७० ] क्तस्य नत्वम् । तेषां कुसुमानां निकरः गणः, स एव आवरणं आव्रियते आवरणं आच्छादनं, येषां ते तथा, तरवः । तरन्त्यापदमेभिस्तरव , 'लभृत्रु इत्युः'; महीरुहाः । अलिनां– अलं वृश्चिकलाङ्गूलं विद्यते येषां ते अलिनः भ्रमराः । अपिः प्रणीतवाँश्च भृङ्गवृश्चिकयोः अलीति रभसः, तेषां भृङ्गानां, पटति पटलं, स्त्रीत्वे पटली, तां राजीं वहन्ति । किंलक्षणां? मलिनां श्यामलाम् । अत्र अस्मिन्, शैले, सरसः तडागस्य, निकटे अन्तिके, शिखिभ्यः जातः यः रवः मयूरसंभूतः शब्दः भाति । किंविशिष्टः? शिखिजातरवः सरसः कोमलः ॥४०॥

क्रमद्वितयावसानयमकं निदर्शयति—

यथा यथा द्विजिह्वस्य विभवः स्यान्महत्तमः ।
तथा तथास्य जायेत स्पर्धयेव महत्तमः ॥४१॥

यथा यथा द्विजिह्वस्य दुर्जनस्य, विभवः अर्थः, अतिशयेन महान् महत्तमः अतीवोत्कृष्टः भवेत्, तथा तथाऽस्यापि शुनस्य विभवस्य स्पर्धयेव संघर्षणेव; महद्यते महत् विपुलं, तमः अज्ञानं, क्रोधो वा उत्पद्येत । एतेन पृष्टमां[मा]सादनक्रोधोद्भुत[भूत ?] नितान्तकुटिलस्वभावत्वात् खलस्य, पन्नगस्येव द्विजिह्वत्वमिति ख्यापितम् । इत्थमितरदप्युदाहर्तव्यम् ॥४१॥

संवृतावृत्तिर्यथा—

दास्यति दास्यति कोपादास्यति सति कर्कराञ्शापम् ।
भवति भवति ह्यनर्थो भव तिमितस्तेन बटुक त्वम् ॥४२॥

दासो चेटी, अतिकोपात् अतीवरोषात्, भवति त्वयि, शपनं शापः, तमाक्रोशं दास्यति । ततस्तस्माच्छापादनर्थो भवति । हि निश्चितम् । तेन हेतुना हे बटुक, त्वं तिम्यति स्म तिमितो निष्कम्पो भव, चपलत्वं मा कार्षीरित्यर्थः । किं कुर्वती? आ समन्तात्, कर्करान् आस्यति क्षिपति सति ॥४२॥

मध्यान्तयमकं निरूपयति—

कुलं तिमिभयादत्र करेणूनां न दीव्यति ।
न दीव्यति करेणूनां प्राणिनां गणनाऽपि का ॥४३॥

अस्मिन् दीव्यति करे तटिन्याः, आस्थाने, करेणूनां कुञ्जराणां, कोलति संस्त्यायति कुलम् । ताम्यन्ति स्थले तिमयः, स्तिम्यन्ति वा, तेषां भयं भीः, तिमिभयम् । तस्माज्जुष्टसाध्वसान् न

---

30. ने. नि. ७.२६

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दीव्यति न खेलति । अणन्ति इति अणवः लघिष्ठाः, तेषां अणूनां, प्राणिति एभिः प्राणाः असवः विद्यन्ते येषां ते प्राणिनः । तेषां सूक्ष्माणां जन्तूनां गणनाऽपि का? अपि तु न कापीत्यर्थः ॥४३॥[31]

**गाङ्गाम्बुधवलाङ्गाभो मुमुक्षुध्यानगोचरः ।**
**पापार्तिहरणायास्तु सः सज्ञानो जिनः सताम् ॥४४॥**

गङ्गायाः इदं गाङ्गं, गाङ्गं च तदम्बु च गाङ्गाम्बुः । घृनात्यशोभां स धवलः; श्वेतत्वे धवला । अभतिवृद्धिमंगभंगतीति वा । आभानं आभा, तदिव धवला अवदाता । तस्यांगङ्गस्याभा । तदाभा-राढा यस्य स तथा । इयता श्रीचन्द्रप्रभः जिनः । यद्वा सामान्यवृत्तिमाश्रित्योक्तमिदम् विशेषणम् । यत एवाष्टदलाम्बुजे परमेष्ठिपञ्चकस्मरणाधिकृतौ जिनेश्वराः धवलाः स्मर्यन्ते । अत एव अभाणि-मुमुक्षूणां योगीश्वराणां, ध्यानगोचरः परमात्मदशान्वेषणरूपध्यानगम्यः । कीदृक्? सज्ञानः । सत् सम्यक् ज्ञानं यस्य यस्माद्वाऽन्येषामिति । एतादृशः सः जिनः त्रिकालवित्, सतां सज्जनानां, पापमघमर्दनमतिस्तदेवार्तिः व्यथा, पापार्तिः । ह्रियतेऽनेन हरणं, तस्याः हरणं पापार्तिहरणं, तस्मै । एनः व्यथास्फेटनाय भवति । इत्थं संयुतावृत्तौ पूर्ववदपरेऽपि भेदाः अवसेयाः ॥४४॥

संयुतासंयुताक्षरावृत्तिं वक्ति—

**जगदात्मकीर्तिशुभ्रं जनयन्नुद्दामधामदोः परिघः ।**
**जनयति प्रतापपूषा जयसिंहः क्ष्माभृदधिनाथः ॥४५॥**

जयसिंहः, क्ष्माभृत्सु अधिनाथः क्ष्माभृदधिनाथः राजाधिराजः, जयति सर्वोत्कर्षेण वर्तताम् । किंकुर्वन्? गच्छति इत्येवंशीलं जगत् भुवनं, आत्मकीर्त्या निजश्लोकेन, शुभ्रं अवदातं, जनयन् उत्पादयन् । पुनः किंभूतः? धीयते धाम मनितिमन्, दामायाः उत्क्रान्तं उद्दामं उच्छृङ्खलं, धाम ज्योतिः यस्य सः तथा । परिहन्यते अनेन परिघः । दारुमयः लोहादिमयो वा अर्गलारूपः दोरेव-दोर्दण्डः एव परिघो यस्य सः, तथा । उद्दामदामा चासौ दोः परिघश्च तथा । प्रतापः दुरन्तारित-मस्तिरस्कारितया पूषेव रविरिव । प्रज्वलत्तेजस्त्वातिशयात् प्रतापेन पूषेवेति वृत्त्यन्तरव्याख्याने । प्रतापपूषा सहस्रकरसमानप्रताप इत्यर्थः ॥४५॥

संयुतासंयुताक्षरावृत्तिं प्रकटयति—

**मामाकारयते रामा सा सा मुदितमानसा ।**
**या या मदारुणच्छाया नानाहेलामयानना ॥४६॥**

सा सा रामा प्रमुदितमानसा तुष्टचित्ता सती मां आकारयते शब्दयति । या या मदेन सुरापानेन, अरुणा ताम्रीभूता, तनुच्छाया कान्तिर्वा यस्याः सा । "छाया त्वनातपे कान्तौ प्रतिबिम्बार्कजाययोः" इति वैजयन्ती [६.२.१३] । यद्वा मदेनाहङ्कारेण, अरुणच्छाया नयनादिषु लोहिती-भूतत्वात् । यदुक्तं—

ह[हि?]त्वा लज्जां समाकृष्टा मदनेन मदेन वा ।
अभिसारयते कान्तं सा भवेदभिसारिका ॥इति॥[32]

31. अधुना... निर्दिश्यते-इदं पा. पुस्तके अधिकम् ।
32. श्लोक एषः शृ. ति १.८० इत्यनेन प्रायः समानः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

नानाप्रकारा या हेला लीला । तन्मयत्वमिति मयटः । समवायपरत्वे तत्समवेतमाननं वक्त्रं यस्याः सा, तथा । स्त्रीणां सुरतेतरकाले ह्रीरेव भूषणमिति भावः ॥४६॥

इति यमकोद्देशः ।

इत्थं ध्वन्यलङ्कृतिं प्रोच्य साम्प्रतमर्थालङ्काराणां परिपाट्या लक्षणमुदाह्रियते कविना । तत्र प्रथमालङ्कारविवक्षयेदं वृत्तं निगदिति—

स्वभावोक्तिः पदार्थस्य सत्क्रियस्याक्रियस्य च ।
जातिर्विशेषतो रम्या हीनत्रस्तार्भकादिषु ॥४७॥

सह क्रियया चलनादिकया चेतनया वा वर्तमानः संवर्तमानः सक्रियः तस्य, जङ्गमस्य मानवप्रमुखस्य, अक्रियस्य क्रियारहितस्य अव्यक्तचेतनस्य; स्थावरस्य शिलोच्चयप्रभृतिकस्य पदार्थस्य च, स्वभावोक्तिः सहजकथनम् । स्वरूपेडाजात्यभिधानालङ्कारो भवेत् । सा च जातिः हीने पुलिन्द्रादौ, त्रस्ते भीते, वातसम्पादौ । अर्भकादिषु शिशुप्रभृतिषु, ईड्यमाना सुतरां रुचिरा भवति ॥४७॥

निदर्शयति—

बर्हावली बहलकान्तिरुचो विचित्रभूर्जत्वचा रचितचारुदुकूललीलाः ।
गुञ्जाफलग्रथितहारलताः सहेलं खेलन्ति खेलगतयोऽत्र वने शबर्यः ॥४८॥

अत्र अस्मिन् वने । शबर्यः – शवृ विकारे व्रजे शवन्ति शबराः । ऋच्छिवटीत्यरः । स्त्रीत्वे शबर्यः पुलिन्द्र्यः । सलीलं यथा स्यात्तथा खेलन्ति रमन्ते । कीदृश्यः शबर्यः ? व[ब]र्हन्ते नृत्येनोर्ध्वीभवन्ति बर्हाणि । आवलति आवलिः । वहति दार्ढ्यं या बहला । कञ्चते दीप्यते काञ्चिः, कच्यते बध्यते वा, तेषामावली बर्हावली नीलकण्ठशिखण्डराजी, सैव बहला[33] घना या काञ्चिः कटिमेखला । तया रोचन्ते बिभ्राजन्ते याः तास्तथा । पुनः कथंभूता ? विचित्रा विविधवर्णा, या भूर्जत्वक् तया । दुनोति शत्रुमनांसि दुकूलम् । ललनं लीला, तस्य लीला दुकूललीला । रचिता निर्मिता, चार्वी मनोहरा, दुकूललीला प्रवराम्बरक्रीडा याभिः ताः । पुनः किंभूताः ? ह्रियतेऽनेन चित्तमिति हारः । तस्य लताः, ततो गुञ्जाफलैः ग्रथिताः हारलताः याभिः यासां वा, ताः । खेला सविलासा, गतिः यासां ताः खेलगतयः । पुलीन्द्रीणां हीनत्वेन हीनजात्युदाहरणम् ॥४८॥

अधुनात्रस्तेजातिनिदर्शनम्—

आरत्तनि[ने]त्तधोरणिभीसणवयणुक्करो कुरंगच्छि ।
उल्लसियवीसभुयवणविणिवेसो दहमुहो एसो ॥४९॥

हे कुरङ्गाक्षि, हे जनकतनये । एषः दशमुखो रावणः । किंलक्षणः ? आरक्तनेत्रधोरण्या लोहितेक्षणाल्या, भीषणवदनानां उत्करः गणः यस्य सः भैरवाननिकरः । भुज्यते एभिः भुजाः, विंशतिसंख्याकाः भुजाः विंशतिभुजाः । उल्लसिताश्च ते विंशतिभुजाश्च, ते एव वनं, तस्य विनिवेशः स्थानं यः सः, अस्तीत्यध्याहार्यम् । अधिकारोऽयं अमरूशतके ४२ प्रणीतः ।

33. कञ्चते...बहला–इदं पा. पुस्तके नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

पटालग्ने पत्यौ नमयति मुखं जातविनया
हठाश्लेषं वाञ्छत्यपहरति गात्राणि निभृतम् ।
न शक्नोत्याख्यातुं स्मितमुखसखीदत्तनयना
ह्रिया ताम्यत्यन्तः प्रथमपरिहासे नववधूः । [अ. श. ४१]

सख्यः न शीघ्रमेव सन्निधिं त्यजन्ति । जातिरलङ्कारः । संस्थानावस्थाने क्रियेते यद्यस्य यादृशं भवति । लोके चिरप्रसिद्धं तत्कथनमन्यथा जातिः । इति । १ ॥४९॥

इदानीमुपमायाः लक्षणं व्याचष्टे—

**उपमानेन सादृश्यं उपमेयस्य यत्र सा ।**
**प्रत्ययाव्ययतुल्यार्थसमासैरुपमा मता ॥५०॥**

यत्र यस्यामलङ्कृतौ, उपमाने । दृष्टान्तेन सदृशवस्तुना साकं उपमेयस्य पदार्थस्य सादृश्यं समानत्वं भवेत्, सा उपमा मता प्रोक्ता । कैः कृत्वा ? प्रत्ययेत्यादिभिः । प्रत्ययाश्च अव्ययानि च तुल्यार्थाश्च समासाश्च प्रत्ययाव्ययतुल्यार्थसमासाः, तैः प्रत्ययैः आयवत्प्रभृतिभिः, अव्ययैः इवादिभिः, तुल्यार्थैः अनुकरोतीतिप्रमुखैः, समासैः बहुव्रीह्याद्यैः ॥५०॥

उपमोदाह्रियते—

**गत्या विभ्रममन्दया प्रतिपदं या राजहंसायते**
**यस्याः पूर्णशशाङ्कमण्डलमिव श्रीमत्सदैवाननम् ।**
**यस्याश्चानुकरोति नेत्रयुगलं नीलोत्पलानि श्रिया**
**तां कुन्दाग्रदतीं त्यजन् जिनपती[तिः] राजीमतीं पातु वः ॥५१॥**

जिनपतिः श्रीमदरिष्टनेमिः, वः युष्मान्, पातु रक्षतु । किंकुर्वन् ? तां राजीमतीं त्यजन् परिहरन् । किंलक्षणाम् ? कुन्दाग्रदतीम् । कुन्दानि मचकुन्दानि, तद्वदग्राः रमणीयाः दन्ता यस्याः सा । विशेषव्याख्याने तु कुरन्ति शब्दायन्ते इति कुन्दानि, कुन्दादय इति । कुरेर्दोरस्य मावेचेति द प्रत्यये धातोरकारस्य मत्वे च । कुन्दानि स्वनामप्रसिद्धानि माघ्यपुष्पविशेषतानि, तेषामग्राणि शिखराणि कुन्दाग्राणि, तानीव दन्ताः यस्याः सा । इह 'अग्रान्त शुद्धशुभ्रवृषवराहेभ्यश्च' इत्यनेन पूर्वपदबहुव्रीहिसमासान्तो वैभाषिकोदन्तस्य दत्रादेशः । तत्सिद्धौ कुन्दाग्रदता ताम् । या राजीमती, विभ्रमणं विभ्रमः, सौभाग्यगर्वाद्वचनादीनां अन्यथानिवेशः । तेन मन्दालसा, तया लीलामन्थरया गत्या, प्रतिपदं राजहंसी इव आचरतीति राजहंसायते; इति प्रत्ययोपमा १। यस्याः आननं वक्त्रं, सर्वदैव श्रीमत् सश्रीकम् । निःप्रतिमरूपादिश्रीगुणाद्यतिशयोपेतत्वात् । पूर्णशशाङ्कमण्डलमिव । मण्डलयतीति मण्डलम्; पूर्णः शशाङ्कः शारदपार्वणः शर्वरीश्वरः, तस्य मण्डलं बिम्बं, तदिव, भातीति शेषः इत्यव्ययोपमा २ । च पुनः, यस्याः सुन्दर्याः ईक्षणयुगं उत्पलानि, उत्पलन्ति इति वा । नीलानि च तानि उत्पलानि कमलानि च नीलोत्पलानि, तानि श्रिया अनुकरोति इति तुल्यार्थोपमा ३ । कुन्दाग्रदतीमिति समासोपमा ४ ॥५१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चन्द्रवद्वदनं तस्याः नेत्रे नीलोत्पले इव ।
पक्वबिम्बं हसत्योष्ठः पुष्पधन्वधनुर्भ्रुवः ॥५२॥

उद्यते अनेनेति वदनम्, तस्याः नितम्बिन्याः आस्यम् । चन्द्रेण तुल्यमस्ति चन्द्रवत्, 'तेन तुल्यं क्रियाचेद्वतिः ।' इति वतिः [ पा. अ. ५.१.११५ ]। राका कुमुदबान्धववद् वर्तत इति प्रत्ययोपिमा १ । यथा— वदनमिति । कर्तृपदान्वयसामर्थ्यात् वर्तत इति क्रियापदमाक्षिप्यते, तथा इहानुदितस्यापि समुच्चयार्थाभिधायकचकारपदस्यार्थबलेनाक्षेपो युक्तः । ततः च पुनः, तस्याः प्रमदायाः, नीयते दृश्यमाभ्यामिति नेत्रे अम्बके, नीलोत्पले इन्दीवरे इव शोभते इत्यव्ययोपमा २ । च पुनः, तस्याः उष्यते तीक्ष्णाहारेण ओष्ठ, 'उषिकुषिगार्तिभ्यः स्थल्' इति थल् प्रत्यये । उपरितनो अधश्च ओष्ठः । बिम्ब्या फलं बिम्बं, पक्वं च तद् बिम्बं च तथा पक्वबिम्बिफलं: हसति अनुकुरुते, तस्मादप्यतीवोत्कृष्टत्वात इति तुल्यार्थोपमा ३ । किंविशिष्टायास्तस्याः? पुष्पाणि धनुर्यस्य सः पुष्पधन्वा । वा संज्ञायामिति विकल्पेनानङ्वादेशे । तथात्रवाचि धनु । समानार्थोऽयं 'धन्वन्' शब्दः प्रकृत्यन्तरमस्ति । ततः पुष्पं धन्वाऽस्य पुष्पधन्वेति । सर्वधरेण धनति शब्दायते ज्याघातेन, धनुः कार्मुकं, तस्य मदनस्य, धनुः । तद्वद् भ्रुवौ–भ्राम्यत इति भ्रुवौ, भ्रमेर्डुः इति डु प्रत्यये; भ्रूकुटी यस्याः सा, तथा तस्याः । पुष्पधन्वधनुर्भ्रुवः इति समासोपमा ४ ॥५२॥

मयभरियमाणसस्स वि निच्चं दोसायरस्स ससिणो व्व ।
तुह विरहे तीय मुहं संकुइयं सुहय कुमुयं व्व ॥५३॥

हे सुभग, तव विरहे तस्याः प्रमदायाः मुखं संकुचितं, त्यक्तविभूषाकं विगतमण्डनं जातम् । भर्तुर्हि सङ्गमे वनितानां सम्भोग एव मण्डनं, तदभावे मण्डनान्यतरस्याप्यमण्डनत्वादित्यभिप्रायः । किंविधस्य तव? मदभृतमानसस्यापि । मदनं मदः, आनन्दसम्मोहयोः सङ्गमः, तेन भृतं संपूर्णं, मानसं चित्तं, यस्य सः तथा तस्य । पुनः किंभूतस्य? नित्यं दोषाणां रागद्वेषादिदोषाणामाकरः । आकीर्यन्तेऽस्मिन्नित्याकरः खनिर्यः सः दोषाकरः, तस्य । कस्मिन् किमिव ? शशिनो विरहे कुमुदमिव । यथा शशधरस्य विप्रयोगे कुमुदं संकुचितं भवेत् । किंलक्षणस्य शशिनः? मृगः लाञ्छनं, तेन भृतं आश्रितं मानसं यस्य सः तथा, तथा मृगभृतमानसस्य । पुनः किंभूतस्य? दुष्यत्यस्यां दृष्टिः दोषा, अव्ययमपि तस्यां विभावर्यां, अर्थात् भासमानाः कराः पादाः, यस्य सः दोषाकरः, तस्य दोषाकरस्य इति अव्ययाद्युपमाविशेषः ॥५३॥

तं नमह वीयरायं जिणं दमुद्दलिय दिढयर कसायं ।
जस्स मणं व सरीरं, मणं सरीरं व सुपसन्नम् ॥५४॥

भो भव्यलोकाः । वीतः गतः, रागः यस्मात् सः वीतरागः । तथा वीतद्वेषोऽपि । तं वीतरागं जगत्प्रभुं यूयं नमत, प्रह्वीभवत । कीदृशम्? जिनाः सामान्यकेवलिनः, तेषामिन्द्रो जिनेन्द्रः, तं जिनेश्वरम् । पुनः किंभूतम्? उद्दलिय० उत् प्राबल्येन, दलन्ति स्म उद्दलिता खण्डीकृताः, दृढतराः निबिडतमाः; कषः संसारः, तस्या यो लोभो येभ्यः ते, कषायाः क्रोधादयो येन सः उद्दलितदृढतरकषायः तम् । यस्य देवाधिदेवस्य शरीरं वपुः, अविक्रियाभेदेन शारदाम्बुः स्वच्छतान्तः प्रीतस्फीतत्वेन वा मनोऽतःकरणमिव सुप्रसन्नम् । वदननयनादिप्रसन्नत्वेन सौम्याकारं विद्यते यस्य च । मनः चित्तम् । तीव्रतरशुभध्यानातपाश्रयत्वेन शरीरमिव सुप्रसन्नं प्रशान्ताकृतिवि[र्वि]द्यते । उपमेयोपमेयं यद्वाऽन्योन्योपमा ॥५४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हे देव भवतः पादौ भवत्पादाविवाश्रिताः ।
ते लभन्तेऽद्भुतां भव्याः श्रियं त इव शाश्वतीम् ॥५५॥

हे देव, ये नराः; भातीति भवान्, तस्य भवतः तव; पादाविव चरणाविव, भवत्पादौ त्वत्क्रमौ आश्रिताः, ते नराः, ते इव भवतः पादावाश्रिता इव । अदित्यव्ययं विस्मये, अद्भवतीत्यद्भुतः, स्त्रीत्वे अद्भुता, तां चित्रां श्रियं सिद्धिलक्ष्मीं, लभन्ते प्राप्नुवन्ति । किंभूताम्? शश्वन् निरन्तरे भवा शाश्वती, तां शाश्वतीं यथा पूर्वस्मिन्काले । भवतः पादौ आश्रिताः भक्तिपरायणाः नराः, अद्भुतां शाश्वतीं श्रियं लभन्ते स्म । तथा आधुनिका अपि इत्याकूतम् । इह पादयोः पादयोरेवोपमानं, तेषां नराणां तेषामेवोपमानम् । तस्माद्धेतोरेषामन्योन्योपमा । उपमानस्यैकस्यैवोपमेयत्वेऽन्वयत्वम-समानोपमेयत्वम् ॥५५॥

आलोकनं च वचनं च निगूहनं च
यासां स्मरन्नमृतवत्सरसं कृशत्वम् ।
तासां किमङ्ग पिशितास्रपुरीषपात्रं
गात्रं विचिन्त्य सुदृशां न निराकुलोऽसि ॥५६॥

हे सखे, यासां सुष्ठु पश्यन्तीति सुदृशः, तासां सुलोचनाङ्गनानां, अमृतं पीयूषं, तस्य इव अमृतवत् । तत्र तस्य इवेत्यनेन 'षष्ठ्यन्तादिवार्थे वतिः,' सरसम् । आलोक्यतेऽनेन आलोकनं दर्शनमुच्यते । वचनं भाषितं, निगूहनमाश्लेषणं, स्मरन् अनुध्यायन् । कृशः दुर्बलोऽसि । अङ्गेऽत्यामन्त्रणे । तासां सीमन्तिनीनां । पिशि अवयवे, पिशति पिशितं पललम् । अस्यते अस्त्रं रुधिरं, पृणात्यन्त्रं पुरीषं गूथम् । ततो द्वन्द्वः -- पिशितं च अस्रं च पुरीषं च पिशितास्रपुरीषाणि, तेषां पात्रममत्रं यत्तथाविधम् । गच्छति गात्रं वपुः, तदसारतया विचिन्त्य किं न निराकुलः स्वस्थचित्तो वर्तसे, किं न सातवान् भवसि । एषा उपमेयोपमानामालोकनादीनां समुच्चयाद् गुणक्रियायौगपद्यादुपमेय-समुच्चयोपमा ॥५६॥

कलेव चन्द्रस्य कलङ्कमुक्ता मुक्तावलीवोरुगुणप्रपन्ना ।
जगत्त्रयस्याभिमतं ददाना जैनेश्वरी कल्पलतेव मूर्तिः ॥५७॥

जिनेश्वरस्येयं जैनेश्वरी, मूर्च्छेत्यनया मूर्तिः, मूर्च्छाधातोः 'आदनुबन्धाच्च [का. व्या. २ ७०६] इति इभावोराल्लोप्यार्विति स्थलोपः, तत्सिद्धौ, मूर्तिरार्हती; तनुः प्रतिमा वा विराजते । कीदृशी? कलङ्केन कलङ्काद्वा मुक्ताऽपेता कलङ्कमुक्ता । केव? चन्द्रस्य कलेव, कलयति संख्या कला षोडशोंऽशः । सम्पूर्णमण्डले रोहिणीशे कलङ्को नैकस्यां कलायाम् । अतः साऽपि कलङ्कमुक्ता । पुनः किंभूता? मूर्तिः । इयरति उरवो महान्तः, ते च ते गुणाश्च मार्दवोपशमादयो धैर्यादयश्च । वा तथा, तान् प्रपन्ना आश्रिता, उरुगुणप्रपन्ना । केव? मुक्तावलीव । साऽप्युरुगुणप्रपन्ना, नूतनवृहद्वरकप्रोता भवति । पुनः किं कुर्वाणा? जगत्त्रयस्य लोकत्रितयस्य, कामितं ददाना । केव? कल्पलतेव, साऽपि मनोऽभीष्टं प्रयच्छति । एकस्याः मूर्तेरुपमानगितययोगादुपमानसमुच्चयोपमेयम् ॥५७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उपमायां दोषानभिधित्सुराह—

विभिन्नलिङ्गवचनां नातिहीनाधिकां च ताम् ।
निबध्नन्ति बुधाः क्वापि लिङ्गभेदं तु मेनिरे ॥५८॥

बुधाः विचक्षणाः, तां उपमामुपमेयात्, लिङ्ग्यते स्त्रियामादादिभिः व्याज्यते स्त्र्यादयो वा । लिङ्ग्यन्ते व्यज्यन्तेऽनेनेति लिङ्गम्, स्त्रीपुंनपुंसकवचनमेकद्विबहुवचनरूपम् । ततो लिङ्गं च वचनं च लिङ्गवचने । विभिन्ने लिङ्गवचने यस्याः सा, तथा ताम् । पृथग्लिङ्गवचनान् न निबध्नन्ति न रचयन्ति । च पुनः, अतिहीनां अतीवाधिकां च न ग्रथ्नन्ति । तु पुनः, विपश्चितः क्वापि स्थाने लिङ्गभेदं मन्यते स्म ॥५८॥

पद्यत्रिकेण दोषदृष्टान्तानाह—

हिममिव कीर्तिर्धवला चन्द्रकलेवातिनिर्मला वाचः ।
ध्वांक्षस्येव च दाक्ष्यं नभ इव वक्षश्च ते विपुलम् ॥५९॥

हे काश्यपीपाल, ते तव कीर्तिः । हिममिव हिनोति वर्धते जलमनेन हिमं तुहिनं, तदिव धवला, शुभ्रा विद्यते कीर्तिः । स्त्रीलिङ्गे हिम क्लीबे । लिङ्गस्येह पार्थक्यम् । हे नृपति[ति]शक्र, तव वाचो गिरः, चन्द्रकलेव अतीवोज्ज्वलाः सन्ति । वाचःनिशानाथकलेत्यनयोः बहुवचनैकवचनयोः वैषम्यम् । विलोक्यते हि दृष्टान्तदार्ष्टान्तिकयोरवैषम्यमिति भावः । हे धराधीश्वर, च पुनः, तव दाक्ष्यं-दक्ष्यते दक्षः, तस्य भावो दाक्ष्यं नैपुण्यम् । ध्वांक्षति कांक्षति ध्वांक्षः तस्य, ध्वांक्षस्य इव काकस्य इव अस्ति । वायस्योपमानहीनत्वम् । च पुनः, हे राजेन्द्र, तव वक्षः - वक्षरोषे सपत्नीरोषविषयत्वात् वक्षतीति वक्षः भुजान्तरम् । नभः इव- नभ्यति नभः, न बभस्तीति वा, गगनम् । तदिव विशालं वर्तते । अत्रोपमानाधिकत्वं चेत्येवं न विधीयते । ग्रन्थान्तरे तु स्यादेतदपि । यथाह दण्डी—

न लिङ्गवचने भिन्ने न्यूनार्थाधिकताऽपि वा ।
उपमादूषणायालं तयाद्योगो विधीयताम् ॥ [ का द २.५१ ]

इति ॥५९॥

शुनीयं गृहदेवीव प्रत्यक्षा प्रतिभासते ।
खद्योत इव सर्वत्र प्रतापश्च विराजते ॥६०॥

इयं शुनी, "टुओश्विगतिवृद्ध्योः श्वयतिश्वास्त्रियां"; शुनी गृहदेवी इव सदनसुरी इव, अक्ष्णोऽतिव्याप्नोति अक्षं अक्षमिन्द्रियं प्रतिगता प्रत्यक्षा अध्यक्षा, प्रतिभासते । इहोपमानाधिकत्वम् । च पुनः, तव प्रतापः सर्वस्मिन् स्थाने; खे द्योतते खद्योतो ज्योतिः इङ्गण इव विभ्राजते । इदं हीनोपमानं, एतादृशमपि नानेतव्यम् ॥६०॥

सफेनपिण्डः प्रौढोर्मिरब्धिः शाङ्गीव शङ्खभृत् ।
च्योतन्मदः करी वर्षन् विद्युत्वानिव वारिदः ॥६१॥

आपो धीयन्ते यस्मिन्नसावब्धिः मितद्रुः अस्ति । किंभूतः ? स्फायन्ते फेना । "पिण्डीराधातुभिः," पिण्ड्यन्त इव पिण्डाः तेषां; पिण्डाः फेनपिण्डाः, तैः सह वर्तमान सफेनपिण्डः । पुनः किंभूतः ?

प्रौढा अतीवोच्चतरा, इर्यति इत्यूर्मयः । ऊर्मिभूमिरश्मय इति मिः । 'उरादेश्च धातोर्नामिनोर्वा:'[34] इति, दीर्घे ऊर्मयः कल्लोलाः यस्मिन् सः प्रौढोर्मिः । कः इव ? शार्ङ्गीव । शृङ्गस्य विकारः शार्ङ्गधनुः, तदस्यास्तीति शार्ङ्गी हरिः । स इव शङ्खभृत् । इहार्णवस्य जनार्दनस्य उपमानं, फेनपिण्डस्य शङ्खोपमानं, ऊर्मीणां विशेषणं न विद्यते, इत्युपमायाः विशेषणहीनता, एवमपि न विधेयम् । करी मातुङ्गः विराजते । कीदृक् ? श्च्योतन् क्षरन् मदोदानं यस्य सः च्योतन्मद । क इव ? वारिद इव । यथा वारिदो मेघः, वर्षन् शोभते । किंविशिष्टः ? विद्युत् विद्यतेऽस्य विद्युत्वान् । अत्र "तसौ मत्वर्थः" [हे. उ ५८०] इति संज्ञायां एकसंज्ञाधिकारेणापदत्वात् न जश्त्वम् । विद्युत्वानिति विशेषणाधिक्यं, अतः अधिकोपमादोषः ॥६१॥

अथ गुणातिदेशाः प्रदर्श्यन्ते—

मुखं चन्द्रमिवालोक्य देवाह्लादकरं तव ।
कुमुदन्ति मुदाक्षीणि क्षीणमिथ्यात्वसम्पदाम् ॥६२॥

हे देव, तव मुखं आस्यं चन्द्रमिव निभाल्य; मिथ्यति मिथ्या, "वृमिथी"तियादिः [हे उ. ६०१] किदाप्रत्ययः, तद्भावो मिथ्यात्वं, तस्य तदेव वा । सम्पन्मिथ्यात्वं, संपदि वा इति वा । क्षीणा मिथ्यात्वसंपत् येषां ते, तथा तेषां क्षीणमिथ्यात्वसम्पदाम् । सम्यक्दृशां पुरुषाणामन्वकानि, कुमुदानीवाचरन्ति कुमुदन्तिः चन्द्रवदाह्लादकरः प्रमदः, तत्करं प्रीत्युत्पादकम् । मुखं क्लीबे, चन्द्रः पुंसि । वाग्भटालङ्कृतिकृतः मते दूषणमेतत् । उभयलिङ्ग मुखं क्लीबद्वारा वर्णितमिति लिङ्गभेदेऽप्युपमा भवेत् ॥६२॥

उत्प्रेक्षान्तराले समासोपमितौ लिङ्गभेदं व्यञ्जयति–

निजजीवितेशकराग्रकृतक्षतपङ्क्तयः शुशुभिरे सुरते ।
कुपितस्मरप्रहितबाणगणव्रणजर्जरा इव सरोजदृशः ॥६३॥[35]

सरोजानि नलिनानि, तानीव दृशः दृष्टयः यासां ताः । तथाऽत्र पाठादर्थस्य बलीयस्त्वादिव शब्दस्य व्यवहितान्वयोऽवसेयः । सरोजशब्दः "क्लीबे" [हे. व्या. २.४.९७]दृक्स्त्रिया मित्यनयोः क्लीबस्त्रीलिङ्गयोः भेदस्य समासेनान्तर्हितत्वान्न दुष्टता । सरोजदृशः पद्माक्ष्यः प्रमदाः शुशुभिरे । किंलक्षणाः ? निजाः स्वकीयाः, ये जीवितेशाः प्राणनाथाः, तेषां करजाग्राणि नखरकोटिरूपाणि, तैः कृत्वा विहिताः क्षतपङ्क्तयः व्रणावलयः यासां ताः निजजीवितेशकरजाग्रकृतपङ्क्तयः । कुत्र सति ? सुरते सम्भोगावसरे सति । तत्तद्दुष्कारणात्कुपितः कोपंगतः, स चासौ स्मरः मन्मथश्च तथा, तेन प्रहितः मुक्तः यः बाणगणः शरनिकरः, तस्य व्रणैः क्षतैः जर्जरा इव अकिञ्चिद्वपुष इव । समरसुरतयोः समरस इति भावः ॥६३॥

34 पा. अ. 'उमोर्णयोर्वा' (४.३.१५८)

35. ने. नि., १०,२५

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदानीं रूपके लिङ्गभेदो भण्यते-

हस्ताग्रविन्यस्तकपोलदेशा मिथो मिलत्कङ्कणकुण्डलश्रीः ।
सिषेच नेत्रस्रवदश्रुवारैः दोःकन्दलीं काचिदवश्यनाथा ॥६४॥

काचित् नायिका दोःकन्दलीं द्रम्यति दोः प्रवेष्टः, कन्दैः सौत्रादल नदादित्वादीपि कन्दली, स एव कन्दलीदोः कन्दली, तां बाहुलतां नेत्राभ्यां स्रवन्ति गलन्ति यान्यश्रूणि नेत्राम्बूनि । तथा तेषां वाराः निचयाः, तैः नेत्रस्रवदश्रुवारैः सिषेच । किंलक्षणा ? न विद्यते वश्यः आयत्तः, नाथो रमणो यस्याः सा अवश्यनाथा रुष्टधवा । अनधीनभोक्तृकेत्यर्थः । पुनः कीदृशी ? हस्ताग्रे विन्यस्तः अर्पितः, कपोलदेशो गल्लस्थलभित्तिभागो यया सा । पुनः किंलक्षणा ? कङ्कते हस्ते कङ्कणं हस्तसूत्रं, कुण्डते दहत्यलक्ष्मीं कुण्डलं कर्णवेष्टकं. ततो द्वन्द्वे कङ्कणं च कुण्डलं च कङ्कणकुण्डले, मिथोऽन्योन्यं मिलन्तो मिश्रीभवन्ती, तयोः कङ्कणकुण्डलयोः श्रीः शोभा यस्यां सा तथोक्ता । यतः एव हस्ताग्रविन्यस्तकपोलदेशा अतः एव मिथोमिलत्कङ्कणकुण्डलश्रीः इति रहस्यम् । तथाऽत्र दोः पुंसि, कन्दली स्त्रियामिति पुंस्त्रीलिङ्गयोः भेदस्य समासेन तिरोभूतत्वान्न दोषः । उपमेवान्तर्हितभेदरूपकमिष्यते ॥६४॥

अधुना प्रतिवस्तूपमायां लिङ्गवचनयोः भेदं निरूपयति-

बहुवीरेऽप्यसावेको यदुवंशेऽद्भुतोऽभवत् ।
किं केतक्यां दलानि स्युः सुरभीण्यखिलान्यपि ॥६५॥

असावेकः स्वसमानजातीयद्वितीयापेतः श्रीमदरिष्टनेमिः । यदुवंशे- वम्यते जन्यतेऽनेन वंशः, यदूनां वंशोऽन्वयः, तस्मिन्नद्भुतः सर्वोत्कृष्टः अजनिष्ठ । किंलक्षणे वंशे ? बहवो वीराः सुभटाः यस्मिन् स तथा, तस्मिन् बहुवीरेऽपि । उदाहरणं- केतकित्वने केतकः, स्त्रियां केतकी । यद्वाचस्पतिः 'केतकस्तु द्वयो' रित्युक्तवान्, तस्यां केतक्यां निखिलानि समस्तान्यपि, दलन्ति विकसन्ति इति 'एचाद्यच्', दलानि पर्णानि । किं, सुष्ठु रभन्त इति सुरभीणि सुपरिमलानि भवेयुः ? अपि तु स्तोकान्येव कानिचित् सुरभीणि जायन्ते । वंशस्येह केतक्या उपमानम् । वीराणां चान्यदलोपमानम् । नेमेः सुरभिपत्रोपमानम् । वंशः पुल्लिङ्गे, केतकी स्त्रीलिङ्गे; वीराः पुंसि, दलानि क्लीबे । एको नेमिः बहुतराणि दलानि । इत्थं प्रतिवस्तूपमायां लिङ्गवचनभेदेऽपि दूषणं न भवति ॥६५॥

रूपकभेदान् व्याचष्टे—

रूपकं यत्र साधर्म्यादर्थयोरभिदा भवेत् ।
समस्तं वाऽसमस्तं वा खण्डं वाऽखण्डमेव च ॥६६॥

यत्र यस्मिन्नलङ्कारे, साधर्म्यात् समानधर्मत्वात्, अर्थयोरुपमानोपमेययोः वस्तुनोरभेदादैक्यं स्यात्सुधीभिस्तद्रूपकमुच्यते । तच्चतुर्विधं- समस्तं समासयुक्तं द्वैधं खण्डमखण्डं च; असमस्तं समासापेतमपि द्विविधं, खण्डं निरवयवं, अखण्डं समस्तवस्तुविषयं सावयवं, इत्यैदम्पर्यम् ॥६६॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्र तावदखण्डं समस्तं प्रकाशयति—

**कीर्णान्धकारालकराजमाना निबद्धतारास्थिमणिः कुतोऽपि ।**
**निशापिशाची व्यचरद्दधाना महान्त्युलूकध्वनिफेत्कृतानि ॥६७॥**

निशापिशाची – निश्यति तनूकरोति चेष्टाः निशा, निशन्ति समाहितमनस्का भवन्त्यस्यामिति वा । पिशितमश्नातीति पिशिताशः लोकोपचारात् । पृषोदरादित्वेन पिशितस्य पिशाभावः । आशस्य च भावः पिशाचः, स्त्रियां पिशाची, निशापिशाची । इव उपमितं व्याघ्राभिरिति समासः । निशैव पिशाची-त्येके । निशापिशाची शर्वरीराक्षसी । कुतः ? कस्मादपि स्थलाद् व्यचरत्परिभ्राम्यति स्म । किंलक्षणा ? कीर्णाः विक्षिप्ताः ये अन्धं हतदृष्टिशक्तिकं कुर्वन्ति इति कर्मणि अण् अन्धकाराः । ते एव अलकाः कचाः, तैर्विभ्राजमानाः निबद्धाः, तारा एवास्थिमणयः यया सा । किंकुर्वाणा ? महान्ति महत्तराणि, उलूकाः घूकाः, तेषां ध्वनयः एव फेत्कृतानि फेत्कारापरपर्यायाणि तानि दधाना । इह निशयोपमेयेन सार्कं पिशाच्या उपमानस्य समासविधानात् समस्तरूपकम् । कृत्स्नपिशाचीधर्माख्यानात् सकल-विशेषणानामपि समानत्वात् चाखण्डम् ॥६७॥

असमस्तमुपमेयेन सत्राऽखण्डं कृत्स्नं रूपकं व्यञ्जयति—

**संसार एषः कूपः सलिलानि विपत्तिजन्मदुःखानि ।**
**इह धर्म एव रज्जुस्तस्मादुद्धरति निर्मग्नान् ॥६८॥**

आसन्नतरवर्तित्वादेष संसारः कूपः । कु शब्दे, कुवन्ति मण्डूकाः अस्मिन्निति । 'कुयुभ्यां चे'त्यौ-णादिकः पः प्रत्ययः, स च किद्धातोः दीर्घत्वं च । भवः प्रहिर्वर्तते, इह संसृतिप्रहौ । विपदनं विपत्तिः आपज्जननं जन्मतया । दुःखयन्तीति दुःखानि, तान्येव सलिलानि विद्यन्ते । धर्म एवेत्यव-धारणे तत्साधर्म्याद्रज्जुरिव रज्जुः । सृज्यते इति रज्जु, "स्यन्दिसृजिभ्यामित्युप्रत्यये" रज्ज्वादेशे च [हे उ ७१७] । तस्मात्संसारकूपान्निर्मग्नान् जन्तूनुद्धरति निस्तारयति । यथा कश्चित्प्रमादवशाद-न्धुपतितः केनचिद्विवेकिना रज्ज्वा उद्द्रियते, तथात्रापि संसारेऽखिलकूपधर्मस्यारोपणादखण्डं समासराहित्यादसमस्तं रूपकम् । धर्मः पुंसि रज्जुः स्त्रियाम् ॥६८॥

इदानीं समस्तं खण्डं असमग्रं रूपकं प्ररूपयति—

**अधरं मुखेन नयनेन रुचिं सुरभित्वमब्जमिव नासिकया ।**
**नववर्णिनीवदनचन्द्रमसः तरुणा रसेन युगपन्निपपुः ॥६९॥**[36]

तरुणाः युवान पुमांसः । नवा चासौ वर्णिनी च नववर्णिनी, वदनं चन्द्रमाः इव, वदनमेव चन्द्रमाः वा इति समासः; तस्याः वदनचन्द्रमाः नववर्णिनीवदनचन्द्रमाः, तस्य । नूतनप्रमदाननकुमुदबान्ध-वस्य अधरं ओष्ठं, मुखेन वक्त्रेण कृत्वा । नयनेन नेत्रेण, रोचते रुचिः । तां कान्ति अम्बकेन कृत्वा, नासिकया घ्राणेन च सुरभित्वम् । रसेनात्यन्तादरेण, युगपत् समकाले, निपपुः भूयः पिबन्ति स्म । अत्यादरेण विलोकनादिकं पानकमुच्यते । सुरभित्वं किमिव ? अब्जमिव वारिरुहमिव ।

36. ने. नि. १०.३५.

चन्द्रस्य इह कश्चन धर्मो न निरूपितः इति खण्डमेतच्च बाह्यवृत्तिमाश्रित्योक्तम् । अन्यथा चन्द्रमाः शीत एव, अब्जं सुरभ्येव । अब्जत्वादिः कारणतावच्छेदको नियामको धर्मः । सुरभित्वविशेषत्वादिः कार्यतावच्छेदको धर्मोऽस्त्येवेत्यवसातव्यम् । 'नववर्णिनीचन्द्रमस' इति समासविधानात्समस्तम् ॥६९॥

अथासमस्तखण्डरूपकमभिधत्ते—

ज्योत्स्नया धवलीकुर्वन्नुर्वीं सकुलपर्वताम् ।
निशाविलासकमलमुदेति स्म निशाकरः ॥७०॥

निशाकरश्चन्द्र उदेति स्म । किंलक्षणः ? निशायाः विभावर्याः, विलासार्थं कमलमिव कमलम् । किंकुर्वन् ? ज्योतिरस्त्यस्यां ज्योत्स्ना, "मत्वर्थीये नकारे उपलोपे च" । तया कौमुद्या, कुलगिरिसंयुक्तामुर्वीं क्षोणीं, धवलीकुर्वन् । इह कमलस्य गुणानुपवर्णनात् खण्डं समासाभावादसमस्तम । यदुक्त—

यत्र गुणानां साम्ये सत्युपमानोपमेययोरभिदा ।
अविवक्षितसामान्या कल्प्यत इति रूपकं ज्ञेयम् ॥१॥ [ रु. का. ८-३८ ]

यथा—

[37] लावण्यसिन्धुपरिपूरितदिङ्मुखेऽस्मिन् स्मेरेऽधुना तव मुखे तरलायिताक्षि !
क्षोभं यदेति न मनागपि तेन मन्ये सुव्यक्तमेव जलराशिरयं पयोधिः ॥ [ ध्व. २ वृत्ति ]

इत्यत्र मुखं चन्द्र एवेति रूपकम् ॥७०॥

अधुना प्रतिवस्तूपमाया लक्षणमाह—

अनुपात्ताविवादीनां वस्तुनः प्रतिवस्तुना ।
यत्र प्रतीयते साम्यं प्रतिवस्तूपमा तु सा ॥७१॥

यत्र यस्यामलङ्क्रियायां, वस्तुनः पदार्थस्य, प्रतिवस्तुना प्रतिपदार्थेन सार्धं साम्यं समानत्वं, प्रतीयतेऽत्र गीयते । तुः अवधारणे भिन्नक्रमे च । सा प्रतिवस्तूपमा स्यात् । कस्यां सत्याम् ? इवादीनाम् । इववदितिप्रमुखाव्ययप्रत्ययसदृक्षार्थसमासप्रभृतिकानामनुत्पत्तौ सत्यां अनादाने सति ॥७१॥

अस्याः निदर्शनम्—

बहुवीरेऽप्यसावेको यदुवंशेऽद्भुतोऽभवत् ।
किं केतक्याः दलानि स्युः सुरभीण्याखिलान्यपि ॥७२॥

एतदर्थस्तु प्राग्वदवसातव्यः । अयमधिकारो माघाद्यसर्गान्तःस्थोपप्लुतमित्याद्यष्टात्रिंशत्तमवृत्तसर्वंकषावृत्तौ प्रणीतः । "अत्र वाक्यद्वये समानधर्मस्यैकस्येशिषे क्षमेतेति शब्दद्वयेन वस्तुप्रतिवस्तुभावेन निर्देशात्, तत्रापि तद्व्यतिरेकमुखत्वात् वैधर्म्येण प्रतिवस्तूपमालङ्कारः । उक्तं च—
सर्वस्वावाक्यार्थगतत्वेन सामान्यस्य वाक्यद्वये पृथग् निर्देशे प्रतिवस्तूपमा" [शि. टीका. १.३८] ॥७२॥

37 मूले- 'लावण्यकान्तिपरिपूरित...' इति । आनन्दवर्धनरचितः श्लोक एषः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साम्प्रतं भ्रान्तिमतो लक्षणं प्रतिपादयति—

वस्तुन्यन्यत्र कुत्रापि तत्तुल्यस्यान्यवस्तुनः ।
निश्चयो यत्र जायेत भ्रान्तिमान्स स्मृतो, यथा ॥७३॥

यत्र यस्मिन्नलङ्कारे अन्यस्मिन्कस्मिन्नपि वस्तुनि--वसन्त्यत्र वस्तु । वसस्तुनिति तुन् प्रत्यये वस्तु । तस्मिन्पदार्थे तत्सदृशस्य परवस्तुनो निश्चयो निर्णयः प्रादुर्भवेत्, संख्यावद्भिः स भ्रान्तिमान् स्मृतः ॥७३॥

एतस्य निदर्शनं निगदति—

हेमकमलं ति वयणे नयणे नीलुप्पलं त्ति पसयच्छि ।
कुसुमं ति तुज्झ हसिए निवडइ भमराण रिञ्छोली ॥७४॥

हे प्रसृताक्षि, प्रसृते विस्तीर्णे, अक्षिणी यस्याः सा, तथा तस्य आमन्त्रणे । तरलायितेक्षणे तव वदने वक्त्रे । हेमकमलं काञ्चननलिनं इति विधाय; नेत्रे नीलोत्पलं इन्दीवरमिति विधाय । च पुनः, तव हसिते हसने, कुसुमं प्रसूनं, विधाय, भ्रमराणां रिंछोलीति [दे. ना. ७.७] पङ्क्तिः निपतति । अमरुशतकटीकोक्तं किञ्चिदिहोच्यते—

" लज्जया व्यभिचारिभावेन पुष्टः सम्भोगशृङ्गारः ।" पद्मरागशकले दाडिमबीज भ्रान्तिमान· लङ्कारः । यदुक्तम्—

वस्तुविशेषं पश्यन् न[ना]वगच्छेदन्यमेव तत्सदृशम् ।
निःसन्देहं कस्मिन् प्रतिपत्ता भ्रान्तिमान् स इति ॥१॥ [रु. का. ८.८७] यथा
पालयति त्वयि वसुधां विविधाध्वरधूमशालिनीः ककुभः ।
पश्यन्तो दूयन्ते घनसमयाशङ्कया हंसाः ॥१॥" [रु. का. ८.८८]

ग्रन्थान्तरोक्तं लक्षणं चेदम् —

कविसम्मतसादृश्याद्विधेये[38] पिहितात्मनि ।
आरोप्यमाणानुभवो यत्र स भ्रान्तिमान् मतः ॥१॥ [चि. मी.]

अथाक्षेपलक्षणं वक्ति—

उक्तिर्यत्र प्रतीतिर्वा प्रतिषेधाय जायते ।
आचक्षते तमाक्षेपमलङ्कारं बुधाः, यथा ॥७५॥

यत्र यस्मिन्नलङ्कारे उक्तेः शब्देन, वा अथवा, प्रतीतेः अर्थसामर्थ्येन प्रतिषेधस्य प्रादुर्भवेत्, बुधाः अमलधियः तमाक्षेपं आक्षिप्यतेऽनेनाऽस्मादस्मिन्निति वा आक्षेपः, तमाक्षेपनामालङ्कारं ब्रुवते । यथेत्यनेन दर्शयिष्यमाणनिदर्शनात्मकं व्यज्यते ॥७५॥

---

38 मूले - विषये' इति पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**इन्द्रेण किं स यदि कर्णनरेन्द्रसूनुः ऐरावणेन किमहो यदि तद्द्विपेन्द्रः ।**
**दम्भोलिनाऽप्यलमलं यदि तत्प्रतापः स्वर्गोऽप्ययं ननु मुधा यदि तत्पुरी सा ॥७६॥**

यदि सः किरति शत्रूनिति कर्णः, स चासौ नरेन्द्रश्च, तथा । श्रिया त्रिवर्गसम्पत्त्या युक्तः कर्णनरेन्द्रः श्रीकर्णनरेन्द्रः । तस्य श्रीकर्णनरेन्द्रस्य सूनुः पुत्रः । श्रीकर्णनरेन्द्रसूनुः श्रीजयदेवः पृथ्वीशक्रो विद्यते तर्हि इन्द्रेण मघवता किमिति क्षेपे इन्द्रस्य प्रतिषेधः । यदि तस्य श्रीकर्णनरेन्द्रसूनोर्द्विपेन्द्रः तद्द्विपेन्द्रः श्रीकलशप्रशस्ताभिधानो वर्तते, तदैरावतेन महाम्बुदगोचरगजेन किमिति ऐरावतस्य प्रतिषेधः । अहो इति सम्बोधने विस्मये च । यदि तत्प्रतापः-तस्य प्रतापः स्फूर्जत्प्रभावः तत्प्रतापोऽस्ति, तर्हि दम्भोलिना-दम्भादाटोपाल्लीयते . दम्भोलिः, पृषोदरादिः, तेन कुलिशेनाऽप्यलमत्यर्थमलं सृतमिति कुलिशस्य प्रतिषेधः । यदि सा प्रसिद्धा । पुर अग्रगमने, पुरति पुरी, नाम्युपधात्के पुरं, स्त्रियां पुरी । तथोचे नाम्युपान्त्य...किः [हे. व्या. ५.१.५४] प्रत्ययान्तोऽपि । पुरिः प्रकृत्यन्तरमस्तीति सर्वधरेण इकारान्ता-दीपितत्सिद्धौ । तस्य पुरी तत्पुरी, अणहिल्लपत्तनाह्वया नगरी विद्यते । तदा ननु निश्चितं, स्वर्गोऽपि सुरलोकोऽपि, मुधा वृथेति स्वर्गस्य प्रतिषेधः । एतेन इहोक्त्या साक्षाद्वचनेनेन्द्रादीनां प्रतिषेधो व्यधायि इति प्रज्ञापितम् ॥७६॥

**यस्यास्ति नरकक्रोडनिवासे रसिकं मनः ।**
**सोऽस्तु हिंसानृतस्तेयतत्परः सुतरां जनः ॥७७॥**

यस्य नरस्य, मन्यते जानात्यर्थान्मनः । 'असिन्यस्' सर्वार्थग्रहणम् । नरक एव क्रोडः उत्सङ्गः, तत्र निवसनं निवासः, तस्मिन्नरकक्रोडनिवासे रसिकं तन्निवासरसोपेतमस्ति । सः जनः । हिंसनं जीवविध्वंसनं हिंसा । इयर्ति सतां हृदयं; ऋतं सत्यं, न तथाऽनृतं वितथं; स्तेनयति स्तेनः, तस्य भावः स्तेयम् । "स्तेनान्नलुक् चेति" [हे. व्या. ७.१.६४] यः स्तैन्यं । ततो द्वन्द्वे, हिंसा चानृतं च स्तेयं च तथा तानि, तेषु तत्परः परायणः हिंसानृतस्तेयतत्परः, सुतरां अतीव अस्तु । अनेन हिंसाप्रभृतिकं न विधेयमिति प्रतीतिः प्रख्यापिता ॥७७॥

**इच्छन्ति जे ण कित्तिं कुणन्ति करुणाकणं पि जे नेव्व ।**
**ते धणजक्खव्वनरा दिन्ति धणं मरणसमए वि ॥७८॥**

ये नराः कीर्तिमभिख्यां न इच्छन्ति न वाञ्छन्ति; ये च कणो लेशः, तन्मात्रामपि करुणां कृपां न कुर्वन्ति, ते मनुजाः धनदयक्षवत् निधनावसरेऽपि धनं वित्तं किं ददति ? अपि तु न ददति इत्यत्र आत् अभ्यस्तात् इति अनेन कः स्यात् ? उभयस्मिन्नर्थसामर्थ्यात् काकुव्याख्यानेन कृत्वा निषेधः प्रतीयते । अदयया दयानिषेधः । अमरुशतकटीकाकृताऽत्र प्रोक्तोऽधिकारः—

"सीत्कारः कामिनीनां दयितस्पर्शसुखातिशयेन हृदयोल्लसच्चमत्कारपूर्वकः श्वसितात्मा मन्मथोद्दीपनोन्मुखस्य चेष्टाविशेषः ।" [अ. श. ३७]

आक्षेपोऽलङ्कारः । यथा—

कुतः कुवलयं कर्णे करोषि कलभाषिणि ।
किमपाङ्गमपर्याप्तमस्मिन्कर्मणि मन्यसे ॥ इति [का. द. २.१२३] प्रभृतिकोऽयम् ॥७८॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संशयलक्षणं व्यनक्ति—

**इदमेतदिदं वेति साम्याद्बुद्धेर्हि संशयः ।**
**हेतुभिर्निश्चयः सोऽपि निश्चयान्तः स्मृतो, यथा ॥७९॥**

साम्यात् सादृक्ष्यादिति, बुद्धेर्धिषणायाः, हि निश्चितम् । संशयनं संशयः, समन्ततः शेते आत्माऽस्मिन्निति वा संशयाभिधानोऽलङ्कारो धीधनैः स्मृतः । इति इति किम् ? इदमेतद्वस्तु वा । तथोक्तम् वस्तुनियत्रैकस्मिन्ननेकविषयवस्तु भवति सन्देहः । प्रतिपत्तुं सादृश्यादनिश्चयः संशयः स इति ॥१॥ सोऽपि संशय एव हेतुभिः कारणैः संशयस्यैव निर्णयार्थं प्रवर्तनान्निश्चयान्तः सन् निश्चयनामालङ्कारो भवेत् । 'यथा' शब्देन पुरा वक्ष्यमाणोदाहरणं दर्श्यते ॥७९॥

**किं केशपाशः प्रतिपक्षलक्ष्म्याः किं वा प्रतापानलधूम एषः ।**
**दृष्ट्वा भवत्पाणिगतं कृपाणमेवं कवीनां मतयः स्फुरन्ति ॥८०॥**

एतेन उर्वीपतिना अरातीनां लक्ष्मीः केशेषु गृहीत्वा बलादाकृष्टा विद्यते । वृत्तविधाता तच्छङ्कते । हे नरनायक, कवीनां विदुषां, मतयो-मन्यते आभिर्मतयोऽर्थनिश्चयाः, एवं स्फुरन्ति । किं कृत्वा ? भवत्पाणिगतं त्वत्करप्राप्तं, असिं दृष्ट्वा । एवमिति किम् ? प्रतिकूलः पक्षः प्रतिपक्षः, तस्य लक्ष्मीः राज्यश्रीः, तस्याः प्रतिपक्षलक्ष्म्याः शत्रुरमायाः । किमिति विमर्शने । केशानां समूहः केशपाशो वा । पक्षान्तरे यद्वा किमिति हेतुप्रश्नाक्षेपे । एषः प्रतापानलधूमः - प्रतपनं प्रतापः, अनित्यनेन लोकोऽनलः, प्रताप एवानलो वह्निः, प्रतापोऽनल इति वा । धुनाति धूमः, तस्य धूमः प्रतापानलधूमः । 'तात्स्थ्यात्तद्व्यपदेश' इति न्यायेन विचक्षणैरित्थमुन्नीयत इति भावः ॥८०॥

इदानीं निश्चयान्तोदाहरणमभिधत्ते—

**इन्द्रः स एष यदि किं न सहस्रमक्ष्णां**
**लक्ष्मीपतिर्यदि कथं न चतुर्भुजोऽसौ ।**
**आः स्यन्दनध्वजधृतोद्धुरताम्रचूडः**
**श्रीकर्णदेवनृपसूनुरयं रणाग्रे ॥८१॥**

यदि स एषः । इदि परमैश्वर्ये इन्दति इति इन्द्रः तस्य; 'इन्द्र' इति संज्ञापदस्य यदर्थपरमैश्वर्यलक्षणभाक् सूत्रमा[ता ?] भवेत्, तदा अक्ष्णां लोचनानां, सहस्रं दशशतात्मकं, किमिति हेतुप्रश्ने । किं न ? चक्षुषां सहस्राभावत्वेन शक्रः न इत्यर्थः । यदि लक्ष्मीपतिः श्रीपतिः भवेत्, तर्हि चतुर्भुजः कथं न ? चतुर्भुजाभावत्वेन केशवो न स्यादित्यर्थः । स्मृतौ आः । आः सविसर्गः कोपपीडार्थवाचकोऽपोह यथोचितं व्याख्येय । ततश्च आः ज्ञातम् । 'इदं' शब्दोऽव्यवहितार्थनिर्देशकः । ततः सोऽयं रणाग्रे संग्रामप्रकर्षे, श्रीकर्णदेवनृपसूनुः श्रीजयसिंहदेवोऽस्ति । तदन्त.कोपलक्षितं विशेषणं ब्रूते । कथंभूतः ? स्यन्दनस्य रथस्य, ध्वजे केतौ, धृतः, उद्गता धूरस्य उदग्रः, ताम्रचूडः दीर्घनादो येन सः स्यन्दनध्वजधृतोद्धुरताम्रचूडः । इह एभिः कारणैश्चरणायुधकेतनत्वेन जयसिंहदेवे निश्चयान्तः संशयोऽवसितः ॥८१॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दृष्टान्तलक्षणं प्रतिपिपादयिषुराह—

अन्वयख्यापनं यत्र क्रियया स्वतदर्थयोः ।
तं दृष्टान्तमिति प्राहुरलङ्कारं मनीषिणः ॥८२॥

मनस ईषिणः मनीषिणः प्रेक्षावन्तः, प्रकृतस्य उत्पादकः उपोद्घातो दृष्टान्तः, तं दृष्टान्तमलङ्कारं प्रचक्षते । यस्मिन्नलङ्कारे क्रियया करणेन, स्वतदर्थयोरुपमानोपमेययोः दृष्टान्तदार्ष्टान्तिकयोः अवैषम्येणान्वयख्यापनं, शब्दानां परस्परमर्थानुगमनं अन्वयो वा इत्यभिहितान्वयवादिनां मते सामान्यरूपाणां पदानामाकाङ्क्षायोग्यतासन्निधिवशात्परस्परं संसर्गो पदार्थव्यतिरिक्तो वाक्यार्थः । प्रकाशत इति तस्य ख्यापनमनुगताकारा प्रवृत्तिः, सम्बन्धो भवेत् ॥८२॥

उदाहरति—

पतितानां संसर्गं त्यजन्ति दूरेण निर्मला गुणिनः ।
इति कथयन् जरतीनां हारः परिहरति कुचयुगलम् ॥८३॥

हारः इति कथयन् जरतीनां वृद्धतरप्रमदानां कुचयुगलमुरोजयामलं परिहरति । इति इति किम्? निर्मलाः विगतमलाः उज्ज्वलाः, गुणिनः गुणवन्तः, पतितानां सद्ध्वच्युतानां, संसृज्यत इति संसर्गः, 'भावकर्त्रो'र्घञ् इति [हे व्या. ५.३.१८] घञ् । हारोऽपि गुणीव वरकयुग् विशदः च जरतीनां कुचौ स्रस्तौ अतस्तेन तौ इत्याशयः । इहादिमार्द्धद्वितये प्रकृष्टोऽर्थः, तस्य हारो निदर्शनम् । तथोक्तं माघसत्कचतुर्दशसर्गस्थवीतेत्याद्यष्टमकाव्यसर्वंकषावृत्तौ । [शि. १४.८ टीका] "अत्र हरिमरीचिमालिनोर्वाक्यभेदात् बिम्बप्रतिबिम्बतया संनिहितत्वोदितयोः सामान्यधर्मतया निर्देशो दृष्टान्तालङ्कारः ।

यत्र बिम्बप्रतिबिम्बतयोच्यते—

"समानधर्मो वाक्यैकैः स दृष्टान्तो निगद्यते ॥१॥" [प्र.रु. अ प्र.] लक्षणमदः ॥८३॥

अधुना व्यतिरेकं लक्षयति—

केनचिद्यत्र धर्मेण द्वयोः संसिद्धिसाम्ययोः ।
भवत्येकतराधिक्यं व्यतिरेकः स उच्यते ॥८४॥

यत्र यस्मिन्नलङ्कारे, द्वयोरुभयोर्वस्तुनोः पदार्थयोरेकेन केनचित् शूरत्वादिना धर्मेण सम्पन्नसदृक्षयोः मध्ये एकतरस्य कस्याप्याधिक्यं भवति, विपश्चिद्भिः सः व्यतिरेकालङ्कारो भण्यते ॥८४॥

साम्प्रतमुदाह्रियते—

अस्त्वस्तु पौरुषगुणाज्जयसिंहदेव पृथ्वीपतेर्मृगपतेश्च समानभावः ।
किन्त्वेकतः प्रतिभटाः समरं विहाय सद्यो विशन्ति वनमन्यमशङ्कमानाः ॥८५॥

जयसिंहदेवपृथ्वीपतेः–जयेनोपलक्षितः सिंहः शौर्यातिशयाज्जयसिंहः । ततः प्रयुक्तः पूज्यमानवाचको 'देव' शब्दः 'कुमारपालदेव'–वत् । सकलराजभिरभ्यर्हितो जयसिंहदेवश्चासौ पृथ्वीपतिश्च जयसिंह·

Jain Education International For Private & Personal Use Only www.jainelibrary.org

देवपृथ्वीपतिः । तस्य सम्राजः, च पुनः, मृगपतेः कण्ठीरवस्य: पौरुषगुणात्–पुरुषस्य भावः कर्म वा पौरुषं, तस्य गुणः धैर्यादिः, तस्मात्पराक्रमगुणात् । समानस्य भावः सामान्यम् । "अस्तु अस्तु" इत्यत्र "नित्यवीप्सयोः" इति सूत्रेण [पा. अ. ८.१.४] ख्यातपदस्य द्वित्वे पराक्रमगुणेन समानताभीक्ष्ण्यं प्रतिपादितं भवतु । भवत्विति साम्यं, किन्त्वेष विशेषः-एकतः एकस्मादुर्वीपतेः सकाशात्प्रतिभटा अरातियोद्धारः, रणमपहाय वनं विपिनं विशन्ति । अन्यमपरं, मृगपतिं अशङ्कमाना इति व्यतिरेकः । एतेन सिंहादपि राज्ञः शौर्यातिशयः प्रख्यापितः इति भावः । एतदर्थोऽधिकारश्च माघप्रथमस्थगतमित्यादि द्वितीयकाव्यस्य सर्वंकषायां वृत्तौ अभिहितो यथा हरेः नारदर्षिनिरीक्षणक्षणे इहोपमेयस्य धातुः सुनस्य मुनेः सवितृकृशानुभ्यामुपमानाभ्यां तदसम्भाविनाऽधःप्रसारणधर्मेणातिरेकत्वकथनादुव्यतिरेकः । तदुक्तं काव्यप्रकाशे—

"उपमानाद्यः स्यादन्यस्य व्यतिरेकः स एव" [१०.१०५][39]

इति । अन्यच्च

[40]भेदसाधर्म्यप्राधान्यमुपमानोपमेययोः ।
अधिकाल्पत्वकथनाद् व्यतिरेकः स उच्यते ॥८५॥ [प्र. रु. अ. प्र.]

सम्प्रत्यपह्नुतिं लक्षयति—

**नेतदेतदिदं ह्येतदित्यपह्नुतिपूर्विकाम् ।**
**उच्यते यत्र सादृश्यादपह्नुतिरियं, यथा ॥८६॥**

यत्र यस्यामलङ्क्रियायां, सादृश्यात्समानत्वात्, इति । अपह्नवपूर्वकं-अपह्नवमपह्नवः पूर्वो यस्मिन् तदपह्नवपूर्वकमिति वर्तमानवस्तुनोऽपलापपूर्वकमुच्यते निगद्यते । इति इति किम् ? एतत् साक्षाद् दृश्यं एतन्न, हि निश्चितं, इदमन्यदपि एतत् । सा ह्ययमपह्नुतिः । अपह्नूयतेऽनयाऽपह्नुतिः, अपह्नवं वा अपह्नुतिरलङ्कृतिर्भवेत् । यथा इति अग्रेऽभिधीयमाननिदर्शने ॥८६॥

**नेतन्निशायां शितसूच्यभेद्यमन्धीकृतालोकनमन्धकारम् ।**
**निशागमप्रस्थितपञ्चबाणसेनासमुत्थापित एष रेणुः ॥८७॥**

निशायां क्षणदायामेतदन्धकारं न । किंलक्षणम् ? शिता तीक्ष्णा चासौ सूची च तथा, तया । अभेद्यं भेत्तुमनर्हं, शितसूच्यभेद्यम् । एतेन सान्द्रतरं तम इति सूचितम् । पुनः कीदृशम् ? अनन्धानि अन्धत्वेन कृतानि अन्धीकृतानि, आलोकनानि अम्बकानि येन तदन्धीकृतालोकनम् । एतादृशं तमिस्रं न । किन्त्वेष रेणुर्वर्तते । किंभूतः ? निशागमे शर्वरीसमागमने, निखिलभुवनजयार्थं प्रस्थितो जिगमिषितः, स चासौ पञ्चबाणो मन्मथश्च, स तथा; तस्य सेना चमूः, तया समुत्थापितः । तथात्र प्रस्तुतशृङ्गारशतकान्तःस्थं वृत्तमेतत्—

कपोले पत्राली करतलनिरोधेन मृदिता निपीतो निःश्वासैरयममृतहृद्योऽधररसः ।
मुहुः कण्ठे लग्नस्तरलयति बाष्पः स्तनतटं प्रियो मन्युर्जातस्तव निरनुरोधेन तु वयम् ॥८७॥
[अ. श. ८१]

39 मूले-'उपमानाद्यदन्यस्य व्यतिरेकः स एव सः' इति ।

40 मूले-'प्रधानसाधर्म्यं' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुल्ययोगितां निरूपयति-

**उपमेयं समीकर्तुमुपमानेन योज्यते ।**

**तुल्यैककालक्रियया यत्र सा तुल्ययोगिता ॥८८॥**

यत्र यस्यामलङ्कृतौ । तुल्येति—एकस्मिन्काले क्रिया एककालक्रिया, तुल्या याऽसावेककालक्रिया तथा तया । तुल्यैककालक्रिययोपमेयं वर्ण्यं वस्तु उपमानेन साकं समीकर्तुं समीकरणाय योज्यते, प्रवीणैः सा तुल्ययोगिता प्रोदिता ॥८८॥

दृष्टान्तमभिधत्ते-

**तमसा लुप्यमानानां लोकेऽस्मिन्साधुवर्त्मनाम् ।**

**प्रकाशनाय प्रभुता भानोस्तव च दृश्यते ॥८९॥**

हे धर्मोपदेशक ! अस्मिन्लोके साधुवर्त्मनां वरेण्याध्वनां, प्रकाशनाय प्रकटीकरणाय, प्रभुता क्षमता, भानोरादित्यस्य, च पुनः, तव गुरोः मुनीशस्य दृश्यते । किंविशिष्टानाम् ? साधुवर्त्मनाम् । तमसा· ध्वान्तेन, गुरुपक्षे अज्ञानेन लुप्यमानानामदृश्यमानानां, राजपथानां वाचंयममार्गाणां च दृश्यते, इतीह वर्तमानकालस्यैकक्रियासम्बधतोभयस्मिन्नपि खेर्गुरोश्च तुल्यक्रियात्वालोकनात् । तदवाचि माघतृतीय· सर्गस्थ 'रम्या' इत्यादिपञ्चाशत्तमकाव्यवृत्तौ । "अत्र वधूनां वलभीनां च प्रकृतानामेव वैधर्म्यसाधर्म्यै· णौपम्यावगमात्केवलप्रकृतगोचरा तुल्ययोगिता,[41] न श्लेषः । तथोक्तं—

"प्रस्तुतानां तथाऽन्येषां केवलं तुल्यधर्मतः ।
औपम्यं गम्यते यत्र सा मता तुल्ययोगिता" ॥८९॥ [शिशु ३.५३ टीका]

उत्प्रेक्षालङ्कारं विवृण्वन्नाचष्टे—

**कल्पना काचिदौचित्याद्यत्रार्थस्य सतोऽन्यथा ।**

**द्योतितेवादिभिः शब्दैरुत्प्रेक्षा सा स्मृता, यथा ॥९०॥**

यत्र यस्यामलङ्क्रियायां, अन्यथा अन्यप्रकारेण, सतः विद्यमानार्थस्य वस्तुनः औचित्यात् योग्यत्वात्, काचिदन्यथा कल्पना विधीयते, लब्धवर्णैः सोत्प्रेक्षा स्मृता । कीदृशी ? इवादिभिः शब्दैर्द्योतिता व्यक्तीकृता । आदिपदोपादानात्—

"मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः ॥१॥" [का द. २.२३४]

इत्याचार्यदण्डयुक्तवान् । तथोक्तं—

यत्रान्यधर्मसम्बन्धादन्यत्वं नोपकीर्तितम् ।[42]
प्रकृतं हि भवेत्प्राज्ञास्तामुत्प्रेक्षां प्रचक्षते ॥२॥ इति । [प्र. रु. अ. प्र.]

लक्षणमन्यच्च—

अभिसारूप्यादैक्यं विधाय सिद्धोपमानसद्भावम् ।
आरोपितेन च तस्मिन्नतद्गुणादीति सोत्प्रेक्षा ॥३॥ [रु. का. ८ ३२]

'यथा' शब्दोऽग्रे वक्ष्यमाणनिदर्शने ॥९०॥

41 "तुल्यक्रिया...तुल्ययोगिता—इदं पा. पुस्तके नास्ति ।

42. मूले—'सम्बन्धादन्यत्वेनोपकीर्तितं' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**नभस्तले किञ्चिदिव प्रविष्टाश्चकाशिरे चन्द्ररुचिप्ररोहाः ।**
**जगद्विगलित्वा हसतः प्रमोदाद्दन्ता इव ध्वान्तनिशाचरस्य ॥९१॥**

शशधरार्चिरङ्कुराः गगनतले किञ्चिदिव मनागिव, प्रविष्टाः रेजिरे । उत्प्रेक्ष्यन्ते । जंगम्यते इति जगत् विश्वम् । गिलित्वा प्रमोदात्सम्मदात् हेतोः हास्यं विदधतः सन्तमस नृचक्षसः दन्ता इव दशना इव । एतेनेन्दुज्योतिरङ्कुराणामन्धकारस्य चान्यथाकल्पनमुत्प्रेक्ष्येत्यावेदितम् । तदुक्तं माघतृतीयसर्गस्थ 'तेने' त्यादिनवमवृत्तवृत्तौ । हरेर्यत्र कौस्तुभमणौ प्रतिबिम्बितो बाह्यलोकः, तदङ्ग एव नैर्मल्याद्बहिः प्रतिफलितः कुक्षिस्थलोक इवालक्ष्यते इत्युत्प्रेक्षा । 'इव' शब्दोऽयमुत्प्रेक्षाव्यञ्जक एव, नोपमायाः ॥९१॥

अधुनार्थान्तरन्यासं लक्षयति—

**उक्तसिद्ध्यर्थमन्यार्थन्यासो व्याप्तिपुरःसरः ।**
**कथ्यतेऽर्थान्तरन्यासः श्लिष्टोऽश्लिष्टश्च स द्विधा ॥९२॥**

उक्तस्य प्राग्भणितस्य, सिद्ध्यर्थं-सिद्ध्यत्यनयाऽस्यां वा सिद्धिः निष्पत्तिः, तस्यै इदं सिद्ध्यर्थम् । अर्थेन नित्यसमासः सर्वलिङ्गता च प्रस्तावापन्नार्थसमर्थनाय योऽन्यार्थन्यासः सोऽर्थान्तरन्यासः सुधीभिः कथ्यते । किंलक्षणः ? व्याप्तिपुरःसरः । एवं सर्वत्र घटत इति व्याप्तिः पुरःसरा यस्मिन्सः व्याप्तिपुरःसरो व्याप्तिपूर्वक इत्यर्थः । स च द्विविधः । एकः श्लिष्टः श्लेषयुक्तः, च पुनः, अपरोऽश्लिष्टः श्लेषरहितः ॥९२॥

श्लिष्टमुदाहरति—

**शोणत्वमक्ष्णामसिताब्जभासां गिरां प्रचारस्त्वपरप्रकारः ।**
**बभूव पानान्मधुनो वधूनामचिन्तनीयो हि सुरानुभावः ॥९३॥**

उह्यन्ते वध्वः । वहोधश्चेत्यूप्रत्यये धातोर्धश्चेत्यन्तादेशे । "वधूर्जायास्नुषास्त्री चे"त्यमरः । [३.३.१०२] उक्तवांस्तासां स्त्रीणाम् । मन्यते मधुः । फलिपाटिनमिमनिजनां गुक् । पटिना किञ्चनाश्चेत्युप्रत्यये धातोर्धश्चेत्यन्तादेशे । "मधुश्चैत्रे च दैत्ये च मधुपुष्परसे मधुः"[43] इति विश्वः [विश्वप्रकाशे धद्विके ११] तस्य मधुनः कश्यस्य पानादक्ष्णामम्बकानां शोणत्वं लौहित्यमस्ति । किंलक्षणानाम् ? असिताब्जवदिन्दीवरवत् भाः कान्तिः, येषां तानि, तेषामसिताब्जभासाम् । तु पुनः, गिरां वाचां, प्रचारः उच्चारोऽपरप्रकारो भवति । मद्यपा हि यद्वद्वाभवन्ति वृथालापकरणात् । उदितमेवार्थमर्थान्तरेण दृढयति । इत्थं घटते । हि यस्मात्कारणात्, सुरायाः मदिरायाः, अनुभावः प्रभावोऽचिन्तनीयः चिन्तयितुमशक्यः । अथ च सुराः त्रिदशाः, तेषामनुभावो माहात्म्यं, देवानुभावश्च ॥९३॥

---

43. मूले तु-'मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः । दैत्ये चैत्रे वसन्ते च जीवाशाके मधुद्रुमे ॥' इति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

इदानीमश्लिष्टमुदाहरति—

**शुण्डादण्डैः कम्पिताः कुञ्जराणां पुष्पोत्सर्गं पादपाश्चारु चक्रुः ।**
**स्तब्धाकाराः किं प्रयच्छन्ति किञ्चित्कान्ता यावन्नोद्धतैर्वीतशङ्कम् ॥९४॥**

पादैर्मूलै पिबन्तीति पादपास्तरवः, कूजन्ति कुञ्जराः, कुञ्जौ हनूदन्तौ वा, ते । एषामिति वा । कौ जीर्यन्ति वा कुञ्जराः मत्तेभाः । तेषां शुण्डादण्डैः कम्पिताः आन्दोलिताः सन्तः । चारु यथा स्यात्तथा । पुष्पाणां प्रसूनानां, उत्सर्गस्त्यागः, तं पुष्पोत्सर्गं कुसुमोत्सर्जनं विदधुः । इहार्थमन्यं न्यस्यति । उद्धतैरविनीतैः पुंभिः; वीतशङ्कं-वीता गता, शङ्का यत्र तद्वीतशङ्कम् । विगतानिष्ट-सम्भावन यथा भवति । तथा यावदाक्रान्ताः न सन्ति तावत् स्तब्धाकाराः स्थिराः अनम्राः । अथ च जाल्माः अदातार इति यावत् । किञ्चित्, किं प्रयच्छन्ति? अपि तु न प्रयच्छन्ति । उद्दण्डचण्डैराहता एव वितरन्तीति भावः । एतेन अर्थान्तरन्यासस्य उपमेयपुरस्कृतोऽर्थान्तरन्यासः, कारणेन कार्यसमर्थनरूपोऽर्थान्तरन्यासश्चेति द्वैविध्यं प्रख्यापितमित्याशयः । ग्रन्थान्तरोक्तं त्वदः अभिधेयमभिधानं, तदेव सदृशं समस्तदोषगुणम् अर्थान्तरमवगमयति वाक्यं यदसौ परो भावः ॥१॥९४॥

एतर्हि समासोक्तिं ब्रूते—

**उच्यते वक्तुमिष्टस्य प्रतीतिजननक्षमम् ।**
**सधर्मं यत्र वस्त्वन्यत्समासोक्तिरियं, यथा ॥९५॥**

यत्र यस्यामलङ्कृतौ, वक्तुं भाषितुं, इष्टस्येप्सितस्य वस्तुनः, प्रतीत्युपार्जनशक्तं सधर्मं तुल्यं, अन्यदपरं वस्तूच्यते, इयं समासोक्तिः अभिधानान्तरेण अन्योक्तिश्च बुधैर्भण्यते । यथेत्यभिधास्यमानोदाहरणे ॥९५॥

**चिन्तयति न चूतलतां याति न जातिं केकीं क्रमते ।**
**कमललतालग्नमना मधुपयुवा केवलं क्वणति ॥९६॥[44]**

मधुपयुवा-मधु पुष्परसं मद्यं च पिबति मधुपः, स चासौ युवा तरुणश्च, तथा । केवलं क्वणति, ध्वनिविशेषं विधत्ते । अन्यच्च किमपि न घटयति । तदेवाह-सहकारलतां न चिन्तयति, चेतनायत्तां न निर्मिमीते । जायतेऽस्यां पुष्पादिर्जातिः मालती, तां जातिं प्रति न गच्छति । इह क्रियापद-कदम्बकसामर्थ्यात् अनुदितोऽपि च समुच्चयार्थो गृह्यते । अतः च पुनः, केतकीं न क्रमते । यतः एव प्रागापीतनलिनलतारसस्वैरस्वाध्यानविह्वलाशयश्च, अत एव एतदर्थसूचकं विशेषणमभिधत्ते । कथंभूतः? कमललतायां मग्नमासक्तं, मनोऽन्तःकरणं, यस्य सः कमललतालग्नमनाः ॥९६॥

**मधुकर मा कुरु शोकं विचर करीरद्रुमस्य कुसुमेषु ।**
**घनतुहिनपातदलिता कथं नु सा मालती मिलति ॥९७॥**

कस्मिंश्चिच्चेतोऽभीष्टायां वल्लभायां व्यापन्नायां सत्यां खेदं विदधति ब्रूते । हे मधुकर, शोचनं शोकः,

44 अत्रत्यकारिकाद्वय ९६-९७ इत्यस्य क्रमः पा. पुस्तके विपरीतरूपः प्राप्यते ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तं शोकं मा निर्मिमीष्व । किरति करीरः करिणं ईरयति कण्टकैः वा दुःशाखाः, तस्य द्रुमः, स चासौ द्रुमश्च करीरद्रुमः, तस्य क्रकरतरोः कुसुमेषु प्रसूनेषु विचर । नु इति वितर्के खेदे वा । सा मालती-मालयत्यामोदैः मालतीजाति कथं मिलति ? किंविशिष्टा ? घनः भूयान् सान्द्रो वा योऽसौ तुहिनपातः प्रालेयपतनं, तेन दलिता दग्धा । एतदर्थमाह हे वयस्य, त्वमन्यनितम्बिनीषु रमस्व । आपत्काले नास्ति मर्यादेति न्यायात् । वियोगिजनलक्षणार्थद्वितयं प्रतिपादितमित्याकूतम् । तथोक्तं तत्रैव-'स्पृशन्' इत्याद्यष्टापञ्चाशत्तमकाव्यटीकायाम् । इह प्रस्तुतसूर्यविशेषणमात्रसाम्याद-प्रस्तुतप्रसाधकप्रतीतेः समासोक्तिरलङ्कारः ॥९७॥

इदानीं विभावनां लक्षयति—

विना कारणसद्भावं यत्र कार्यस्य दर्शनम् ।
नैसर्गिकगुणोत्कर्षभावनात्सा विभावना ॥९८॥

सर्वत्र हि स्थले अनन्यथासिद्धनियतपूर्ववर्तित्वलक्षणेन कारणेनान्यथासिद्धनियतपश्चाद्भाविलक्षणं कार्यं निरीक्षितम् । यथा नैयायिकानां मते शिवेच्छया अणुषु क्रियायां प्रादुर्भूतायां द्व्यणुकाद्यनन्तकाणुकाव सानप्रभृतिककरणैः पृथिव्यादिरूपं कार्यमुत्पद्यते । तत्संजिहीर्षयैव तद्विलयश्च सांख्यानां प्रकृतिपुरुषसंयोग-बीजाद्बुध्यहङ्कारतन्मात्रापञ्चमहाभूतादिकृत्यप्रादुर्भावो, मीमांसकविशेषाणां स्याद्वादिनां च स्वकृत-कर्मणो जन्तूनां सातासातप्रमुखोद्भवो ब्रह्मा, अद्वैतवादिनां ब्रह्मणो विश्वसृष्टिः, बौद्धानामभिमतार्थसत्य-चतुष्टयाच्च बोजात् क्षणिकसर्वसंस्कारादिकृत्याविर्भावः स्यात्, इत्येतदनन्तरोदीरितपृथक्कारणनिकरात् तत्तदुत्तरोदितनानाविधकार्यकदम्बकं जायते । समस्तानुमतमिदम् । इह तु यत्र यस्यामलङ्कृतौ कारणसद्भावं विना कार्यस्य दर्शनं स्यात् सा विपश्चिद्भिः विभावनाऽलंक्रियोच्यते । कस्मात् ? निसृज्यतेऽनेन निसर्गः, तत्रभवो नैसर्गिकः स्वाभाविकः, स चासौ गुणोत्कर्षश्च, स तथा । तस्य विभावनं स्पष्टतापादनं, तस्मात् ॥९८॥

साम्प्रतमुदाहरति—

अनध्ययनविद्वांसो निर्द्रव्यपरमेश्वराः ।
अनलंकारसुभगाः पान्तु युष्मान् जिनेश्वराः ॥९९

जिनेश्वराः अर्हन्तः वः युष्मान् पान्तु रक्षन्तु इत्यन्वयः । कीदृशाः ? न विद्यतेऽध्ययनं पठनमेषामित्यन-ध्ययनाः । ते च ते विद्वांसश्चेति कर्मधारयः । इत्थं पुरोऽपि इहाध्ययनलक्षणं कारणं, विद्वत्तारूपं कार्यं; अपरे भूस्पृशः पठनेन पण्डिताः स्युः । त्रिकालविदस्त्वध्ययनमन्तरेण विद्वांसः । एवमितरे मनुजाः विभवेन परमैश्वर्यशालिनो भवन्ति, परमेष्ठिनश्च निर्द्रव्याः निःस्वाः अपि परमेश्वराः त्रैलोक्यलक्ष्मीनायकाः । इतरे जनाः अलङ्कारैः सौन्दर्यभाजः, अर्हन्तस्तु तैर्विनापि सौभाग्यशालिनः स्युः । सहजज्ञानतीर्थंकरकर्मसर्वोत्तमरूपातिशयत्वं नैसर्गिकगुणोत्कर्षात् । एतेन जिनेश्वराणां प्रागुदीरितं कारणसद्भावमन्तरेणोदीरितकार्यं दृष्टं; मृत्पिण्डतन्तुप्रभृतिकबीजानां च कलशचीवरादिकार्यविधाने प्रायशोऽचैतन्येन तादृशगुणोत्कर्षोऽसत्त्वम् । तेन तैरेव समवाय्यसमवायिनिमित्तकारणैः

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तत्तत्कार्योत्पादनं स्यादित्यावेदितम् । तथोक्तं शृङ्गारसञ्जीवन्यां—

त्वं मुग्धाक्षि विनैव कञ्चुलिकया धत्से मनोहारिणीं
लक्ष्मीमित्यभिधायिनि प्रियतमे सद्वीटिकासंस्पृशि ।
शय्योपान्तनिविष्टसस्मितसखीनेत्रोत्सवानन्दितो
निर्यातः शनकैरलीकरचनोपन्यासमालीजनः ॥ [ अ. श. २७ ]

हे विह्वलाक्षि, त्वं विनैव कञ्चुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यनेन विभावनालङ्कारः । यदुक्तं—

सेयं विभावनाख्या यस्यामुपलभ्यमानमभिधेयम् ।
अभिधीयते यतः स्यात्तत्कारणमन्तरेणापि ॥१॥ [ रु. का. ९.१६ ]

तथा—

शब्दार्थयुक्त्या[45] क्षिप्तोऽपि लिङ्ग्योऽर्थ[46] कविनाऽपरः ।[47]
यत्राविष्क्रियते सूक्त्या साऽन्यैवालङ्कृतिर्ध्वने. ॥ [ ध्व. २.२३ ]

यथा- 'अम्बा शेते' तिप्रभृतिकम् ॥९९॥

अथ दीपकं लक्षयति—

**आदिमध्यान्तवर्त्येकपदार्थेनार्थसङ्गतिः ।**
**वाक्यस्य यत्र जायेत तदुक्तं दीपकं, यथा ॥१००॥**

यत्र यस्मिन्नलङ्कारे आदिश्च मध्यश्च अन्तश्च तथा तेषु वर्तत इत्येवंशीलः आदिमध्यान्तवर्ती, स चासावेकपदार्थश्च तथा तेन द्वन्द्वान्तवर्तिपदस्य प्रत्येकमभिसम्बन्धादादिवर्तिना अधिवालवर्तिना वा अन्तर्वर्तिना[49] वा एकपदार्थेन क्रियालक्षणेन कारकरूपेण वा वाक्यस्यार्थसङ्गतिः, पूर्वापरग्रन्थैकवाक्यता प्रयोजिकाकांक्षाजनकज्ञानविषयोऽर्थसङ्गतिः इति भण्यते । अर्थस्य सङ्गतिरर्थसङ्गतिः जायेत प्रादुर्भवेत् । तत्सुधीभिर्दीपकमुक्तम् । 'यथा' इत्यनन्तरवक्ष्यमाणोदाहरणार्थं ॥१००॥

**जगुस्तव दिवि स्वामिन् गन्धर्वाः पावनं यशः ।**
**किन्नराश्च कुलाद्रीणां कन्दरेषु मुहुर्मुदा ॥१०१॥**

हे स्वामिन् । गन्धयन्ति हिंसन्ति दुःखं गन्धर्वाः । गौर्ध्रियते वाक् सप्तस्वरसम्पन्ना तिष्ठत्यत्रेतिवा । देवगायनाः तव, पावयति पावनं मेध्यविधानसमर्थं यशः श्लोकं, दिवि त्रिविष्टपे, जगुर्गायन्ति स्म । च पुनः, किन्नराः तुरङ्गवदनाः, कुलगिरीणां कन्दरेषु गुहासु, मुहुर्वारंवारं, मुदा सम्मदेन, तव पूतं यशः जगुः । जगुरिति इह गायतेः, कर्तरि लिटि क्रियापदमिदमादौ वर्तते । परं स्थानद्वयेऽपि संटंकितम् । अतो दीपकम् । इत्थमन्तरावसानक्रियापदे विश्वस्मिन्सम्बध्येते ॥१०१॥

45. मूले तु- 'शक्त्या' इति ।
46. मूले तु- 'व्यङ्ग्योऽर्थः' इति ।
47. मूले तु- 'कविना पुनः' इति ।
48. मूले तु- 'स्वोक्त्या' इति ।
49 'आदिवर्तिनान्तरावर्तिना'—ला.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भूरिक्रियायोगे दीपकमाचष्टे—

विराजन्ते तमिस्राणि द्योतन्ते दिवि तारकाः ।
विभान्ति कुमुदश्रेण्यः शोभन्ते निशि दीपकाः ॥१०२॥

निशि क्षणदायां, तमांस्येव तमिस्राणि । अन्ये तद्दिघतोरः उपाध्याया इत्थं चेति । तमिस्राणि ध्वान्तानि विराजन्ते, यामिन्यां व्योम्नि तारका द्योतन्ते प्रकाशन्ते, शर्वर्यां कुमुदश्रेण्यः कैरवराजयः विभान्ति, दीपकाः कज्जलध्वजा विभावर्यां विभ्राजन्ते । तदुक्तं—

"यत्रैकमनेकेषां वाक्यानां क्रियापदं भवति ।
तद्वत्कारकपदमपि तदेतदिति दीपकं द्वेधा ॥१॥ [रु. का. ७.६४]
अतिशयभेदः पूर्वं च यत्रास्ति प्रबलतया विवक्ष्यते ।
पूर्वमेव नास्य प्रादुर्भावः पश्चाज्जनकस्य तद्भवेत्पूर्वम् ॥२॥
दुर्लभजनमभिलषतामादौ दन्दह्यते मनो यूनाम् ।
गुरुरनिवारप्रसरः पश्चान्मदनानलो ज्वलति ॥३॥१०२॥

वस्तुनो वक्तुमुत्कर्षमसम्भाव्यं यदुच्यते ।
वदन्त्यतिशयाख्यं तमलङ्कारं बुधाः, यथा ॥१०३॥

वस्तुनो वर्णनीयपदार्थस्य उत्कर्षं वक्तुमतिरेकत्वं प्रतिपादयितुं यदसम्भाव्यं सम्भावयितुमनर्हमुच्यते, बुधाः मेधाविनः; तमतिशयाख्यं- अतिशेतेऽनेनातिशयोऽतिशयनं वालङ्कारं ब्रुवन्ति । यथेत्यनेनोदाहरिष्यते पुरो वृत्तो ॥१०३॥

त्वद्दारितारितरुणीश्वसितानिलेन सम्मूर्छितोर्मिषु महोदधिषु क्षितीश ।
अन्तर्लुठद्गिरिपरस्परशृङ्गसङ्गघोरारवैर्मुररिपोरपयाति निद्रा ॥१०४॥

हे क्षितीश, हे राजन्[50]। महोदधिषु-उदका निधीयन्त एष्विति उदधयः । उदकं चेति कर्मण्यधिकरणे चेति किः संज्ञायां लोकोपचारादुदकस्योदादेशः । महान्तश्च ते उदधयश्च महोदधयः, तेषु महार्णवेषु । मुररिपोः जनार्दनस्य, नियतं द्रान्तीन्द्रियाण्यस्यां प्रमीला अपयाति । "अपपरी वर्जने" [पा. अ. १.४.८८] दूरे व्रजति । स्वापभङ्गः स्यादित्यर्थः । कैः कृत्वा ? अन्तर्मध्ये, लुठन्तश्च ते गिरयो धराधराश्च तथा तेषां, यः परस्परमन्योन्यं; शृणन्ति शीर्यन्त एभिर्वा शृङ्गाणि; शृणातेरङ्ग इत्यङ्गप्रत्यये ह्रस्वत्वे धातोः, परस्याकारस्य लोपे चेति शृङ्गाणि; तेषां भङ्गः शृङ्गभङ्गः सान्द्रास्फालनं तेन घोराः भयानकाः ये आरवाः ध्वनयः, तैः कृत्वा । किंविशिष्टेषु महोदधिषु ? त्वया दारिताः भेदिताः, येऽरयोऽरातयः, तेषां तरुण्यः युवतयः, तासां श्वसितानिल निःश्वसितपवनः, तेन संमूर्च्छिता समेधिताः, ऊर्मयः महाकल्लोला येषु ते, तथा तेषु । इह प्राग्निःश्वसितानिलेन सागरक्षोभो न भवति; कुतस्तरां तदन्तर्वर्ति सानुमदन्योन्यसान्द्रास्फालनं; कुतस्तमां पीताम्बरस्य निद्राभङ्गः । परमेतावताऽत्र भूपतेर्युगपदेतत्सकलासम्भाव्यपदार्थसम्बन्धाभिधानादसम्बन्धेऽपि स्वप्रतापाधिक्येडासम्बन्धरूपाऽतिशयोक्तिरसूचि । तथोक्तं तत्रैव 'तपने' त्यादिषद्षष्ठितमवृत्तवृत्तौ । अत्र पुरे, युगपत्सर्वर्तुकासम्बन्धाभिधानादसम्बन्धेऽपि सम्बन्धरूपाऽतिशयोक्तिः" [शि १.६६] ॥१०४॥

50 'पृथ्वीश'-पा.; 'पृथ्वीपते'-व.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**एकदण्डानि सप्त स्युर्यदि छत्राणि पर्वते ।**
**तदोपमीयते पार्श्वमूर्ध्नि सप्तफणः फणी ॥१०५॥**

पर्व्यते पूर्यते शिलाभिः पर्वतः । 'दृपृभृ' [ हे. उ. ७०४ ] इत्यतः तस्मिन्पर्वते अद्रौ । यदि एकः, दण्डः येषु तानि एकदण्डोपरिष्टात्प्रस्फुरितानि । पपू समवाये, 'षप्यशौभ्या' [ हे. उ. ९०३ ] मित्युणादिसूत्रेण; तन प्रत्यये सप्तन्, सप्तसिद्धौ प्रथमाबहुवचने सप्त, तत्संख्याकानि छत्राण्यातपवारणानि, तिर्यक् प्रसृतानि भवेयुः तदा । स्पृशति ज्ञानेन सर्वभावानिति पार्श्वः । तथा पश्यति इति निरुक्तात्पार्श्वोर्हः; तस्य मूर्च्छामूर्छन्त्यस्मिन्नाहताः प्राणिनः इति मूर्धा । 'श्वन्मातरी'त्यनि [ हे. उ. ९०२ ] निपात्यते, तस्मिन् पार्श्वमूर्ध्नि त्रयोविंशतितमजिनोत्तमाङ्गे फणी नागः उपमीयते उपमानं लभते । कीदृक् फणी ? सप्त फणाः यस्य सः सप्तफणः । पार्श्वस्य पर्वतेन साकमुपमानं, तडित्वच्छविमत्तनुवर्णत्वात्संजायेत । फणिनश्चैकदण्डेन सप्तफणानां सप्तातपत्रैश्च सार्धमुपमानं परम् । पर्वते एकदण्डोद्धृतानि सप्तच्छत्राणि न सम्भवेयुः । अत पार्श्वस्वामिनः स्फटानामुपमा नास्तीत्यतिशयोऽभाणि ॥१०५॥

हेतुं लक्षयति—

**यत्रोत्पादयतः किञ्चिदर्थं कर्तुः प्रकाश्यते ।**
**तद्योग्यतायुक्तिरसौ हेतुरुक्तो बुधैर्यथा ॥१०६॥**

यत्र यस्मिन्नलङ्कारे करोतीति कर्ता, तस्य कर्तुर्मनुजस्य कञ्चिदर्थमभिधेयमुत्पादयतः जनयतः यत्तद्योग्यता तदिदमुचितं भवेदिति युक्तिर्यस्य वाच्यनिर्माणस्य योग्यता, योगाय प्रभवतीति । योग्यस्तस्य भावो योग्यता क्षमत्वं, तस्य योजनं युक्तीः रचनाः, तद्योग्यता, युक्तिविशेषणैः कृत्वा प्रकाश्यते; बुधैरसौ, हिनोति वर्तते हेतुः, गमयत्यर्थं वा, हेतुरलङ्कारोऽभिहितः । यथा शब्दोऽग्रे विधीयमानोदाहरणार्थे ॥१०६॥

**जुव्वणसम ओम्मत्ता तत्ता विरहेण कुणइ नाहस्स ।**
**कण्ठब्भंतरघोलिरमहुरसरं बालिया गीयं ॥१०७॥**

बालिका, गीयते स्म गीतं रागगीत्यादिकं करोति । किंभूता ? यूनोः भावः यौवनं, तस्य समयः निधुवनावसरः, उत् प्राबल्येन माद्यति स्म उन्मत्ता उत्कटा, तेन उन्मत्ता यौवनसमयोन्मत्ता इति हेतुः । हेतुगर्भितं विशेषणं पुनरप्याह । नाथस्य भर्तुः, विरहेण वियोगेण तप्ता, मदकलकलहंसचञ्चुकोटित्रोटितमोपालमृणालकिसलयवत् हिम नीप्लुष्टा अब्जिनीवत् वा परिक्लान्ततप्तगात्रलतात्वेनातिदुःखिता । किंविशिष्टं गीतम् ? कण्ठाभ्यन्तरे निगरणान्तराले घोलित करुणत्वेनालपितः मधुरस्वरो यस्मिन् तत्तथा । 'उन्मत्ता' इति घोलनस्य योग्यतायुक्ति । 'बालिका' इति मधुरस्वरत्वेनेतरेतेन यदेव विरहतप्तत्वं तदेव रागागामालिप्तहेतुत्वं प्रख्यापितमित्याशयः ॥१०७॥

**विससोयरो मयंको कयंतआसाइ आगओ पवणो ।**
**जायपलासो सिहरी पहिए मारन्ति ते तिण्हि ॥१०८॥**

इण्हि इदानीं अधुना । अपेभिन्नक्रमत्वात्तो त्रयोऽपि पथिकानध्वनीनान्मारयन्ति व्यापादयन्ति । ते के ? एको मृगाङ्कः मृगएणांकः लक्ष्म यस्य सः रोहिणीपतिः । कीदृग् ? विषं सोदरो भ्राता यस्य

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सः विषसोदरः । एकतोऽर्णवाज्जातत्वाद्विषं हि व्यापादयति; तत्सहोदरः कुमुदबान्धवः, सोऽपि मारयतीति तदुचितम् । द्वितीयः आ अश्नुते आशा । कृतोऽन्तो येन सः कृतान्तः यमः, तस्य आशायामदिक्, तदधिष्ठितत्वात् तद्व्यपदेशः इति कृतान्ताशा । तस्याः दक्षिणस्याः दिशः सकाशादागतो मलयाचलवायुः विरहद्रुमहः हेमन्तमारुतवत् । अपरोऽपि कृतान्तवदाशया व्यापादनाध्यवसायेन समायातः स्यात्स हिनस्ति तृतीयः शिखरिद्रुमः । किंलक्षणः ? जातानि प्रादुर्भूतानि, पलाशानि पर्णानि यत्र स जातपलाशः । इतरोऽपि जातपलाशो विध्वंसयति जातोत्पन्नापलस्य मांसस्याशावान् छायस्त स तथा । सोऽपि मारयतीति हेतुरवसेयः ॥१०८॥

पर्यायोक्तिं लक्षयति—

अतत्परतया यत्र कल्पमानेन वस्तुना ।
विवक्षितं प्रतीयेत पर्यायोक्तिरियं, यथा ॥१०९॥

यत्र यस्यामलङ्कृतौ, अतत्परतया भेदेन कल्पमानेन वस्तु प्रतीयेत, प्रतिपूर्वो दिण कर्मणि लिङावसीयते, इयं पर्ययणं पर्यायः, परीयन्ते प्रतीयन्ते क्रमेण अर्थाऽनेनेति वा; घञि प्रत्यये, तस्य वचनं उक्तिः पर्यायोक्तिः स्यात् । 'यथा'-शब्दोऽग्रे वक्ष्यमाणोदाहरणार्थे ॥१०९॥

त्वत्सैन्यवाहनिवहस्य महाहवेषु द्वेषः प्रभो रिपुपुरन्ध्रिजनस्य चासीत् ।
एकः खुरैर्बहलरेणुततिं चकार तां संजहार पुनरश्रुजलैर्यदन्यः ॥११०॥

हे प्रभो नायक, आहूयन्ते शत्रवो येष्विस्याहवाः, महान्तश्च ते आहवाश्च महाहवास्तेषु बृहद्रणेषु । सेनैव सैन्यं, वाहयन्ते वाहाः, निवहतीति निवहः । तव सैन्यं त्वत्सैन्यं, तस्य वाहाः हयाः तथा, तेषां निवहः समुदयः, तस्य त्वत्सैन्यवाहनिवहस्य भवच्चमूतुरङ्गमनिकरस्य । पुरं वपुः धत्ते पुरन्ध्रिः, पृषोदरादित्वात्तस्याः जनः । एतस्यामपि पुरन्ध्रां पुरन्ध्रिलोक इति जात्यपेक्षया लोकोक्तिः । एकवचनं चाथ पुरं गृहं धारयतीति पुरन्ध्रिः, सैव विधेयत्वेन जनः । यद्वा प्रियस्यानल्पप्रेयसीस्पृहणीयतया पुरन्ध्रिगण एव भवतु रिपूणां पुरन्ध्रिजनः, तथा तस्य । रिपुपुरन्ध्रिजनस्य अरातिप्रमदानिचयस्य चान्योन्यं द्वेषोऽभवत् । तयोरेकः त्वत्सैन्यवाहनिवहः खुरैर्बहलरेणुततिं संजहार संहरति स्म । कैः ? अश्रुजलैः बाष्पनीरैः । द्वेषस्यैतल्लक्षण- एको निर्मिमीते अन्यः संहरति । इहारय प्रोज्जासिता इति विवक्षितम् तथैतेनार्थेनावगम्यते न साक्षाद् भाष्यत इति कल्प्यमानेन द्वेषेण नृपस्य शौर्यं प्रतीयते । शौर्यस्य साक्षादभणितत्वादतत्परता । तदुक्तं—

कारणं गम्यते यत्र प्रस्तुतात्कार्यवर्णनात् ।
प्रस्तुतत्वेन सम्बद्धं तत्पर्यायोक्तमुच्यते ॥ [प्र. रु-अ. प्र]

तथा चाभाणि माघसप्तमसर्गस्थ 'प्रथमं' इत्याद्येकोनसप्ततितमवृत्तौ । अत्रैकस्य धनञ्जयस्य क्रमेणा-नेकाश्रयसम्बन्धनिबन्धनात् पर्यायालङ्कारभेदः—

क्रमेणैकमनेकस्मिन्नाधारे वर्तते यदि ।
एकस्मिन्नथवाऽनेकपर्यायालङ्कृतिर्मता ॥इति १ ॥११०॥ [शि. ७/६९. टीका]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समाहितमभिनीय दर्शयति–

**कारणान्तरसम्पत्तिर्दैवादारम्भ एव हि ।**
**यत्र कार्यस्य जायेत तज्जायेत समाहितम् ॥१११॥**

यत्र यस्मिन्नलङ्कारे कार्यस्यारम्भे दैवाद्विधिवलात् एकस्मात्कारणादन्यं कारणं कारणान्तरं, तस्य कृत्य विधायकस्य बीजान्तरस्य सम्पत्तिर्वाप्तिः प्रादुर्भवेत् तत्समाहितं नामालङ्कारो जायेत ॥१११॥

सम्प्रत्युदाहरति—

**मनस्विनी वल्लभवेश्म गन्तुमुत्कण्ठिता यावदभून्निशायाम् ।**
**तावन्नवाम्भोधरधीरनादप्रबोधितः सौधशिखी चुकूज ।११२॥**

मनस्विनी मानाध्मातहृदया कोपात्कान्तं पराणुद्य पश्चात्तापसमन्वितेत्येवंलक्षणा मानवती प्रमदा यावन्निशायां विभावर्यां प्रियतममन्दिरं गन्तुमुत्कण्ठितेति । " कठिशोके उत्पूर्वश्चिन्तायाम् " । उद्बाहुलतिकात्वेन दयितस्मरणं उत्कण्ठा, सा जाता यस्याः सोत्कण्ठिता उत्सुकाऽभूत् , तावदेव तस्मिन्नेव समये सौधशिखी धवलसदनप्राङ्गणकेकी चुकूज आरवं व्यधात् । किंभूतः कलापी ? नवो नूतनश्चासावम्भोधरश्च नवाम्भोधरो नवीनजलप्रवाहः, तस्य यो धीरो मन्द्रो नादो गर्जारवः, तेन प्रबोधितो जागरितः । इयता न स्थितात्र । मदनविह्वलाशयत्वेन कुपितनायिकया प्रसादनोपायानन्तरेणापि मानं परिहृत्य रमणवेश्मगमनं कार्यमारब्धं, तावता एव दैववशात् मुदिरो नदति स्म; तदनु भवनशिखण्डी अरावीत् इति निमित्तान्तराभ्यां स्मरोद्दीपनाभ्यामतीव झटिति समनोत्कण्ठिता भवति स्मेत्याशयः । उत्कण्ठितात्वं कार्यं, शिखिकूजनं कारणम् । तथा माघसत्कविगतेत्यादिकाव्यसर्वंकषावृत्ताववाचि । " अत्र दण्डसाध्ये मृगनिवारणे काकतालीन्यायेन[51] कारणत्वकथनात्समाधिरलङ्कारः । यदुक्तं काव्यप्रकाशे—

समाधिः सुकरं कार्यं कारणान्तरयोगतः । [का. १०.१२५]

इति लक्षणम् [शि. ६.४९]" ॥११२॥

एतर्हि परिवृत्तिं लक्षयति—

**परिवर्तनमर्थेन सदृशासदृशेन वा ।**
**जायतेऽर्थस्य यत्रासौ परिवृत्तिर्मता, यथा ॥११३॥**

यत्र यस्मिन्नलङ्कारे सदृशश्चासदृशश्च सदृशासदृशं, संहतिप्रधानत्वादेकवचनं, तेन । तथा समानासमानेनार्थेन साकमर्थस्य परिवर्तनं परावर्तो विनिमयो भवेत् , सुधीभिरसौ परिवृत्तिः परिवृत्त्यभिधानालङ्कृतिर्मता भणिता । यथेत्यनन्तरवक्ष्यमाणोदाहरणे ॥११३॥

**अन्तर्गतव्यालकणामणीनां प्रभाभिरुद्भासितभूषु भर्तः ।**
**स्फुरत्प्रदीपानि गृहाणि मुक्त्वा गुहासु शेते त्वदरातिवर्गः ॥११४॥**

हे भर्तः इन्द्र, त्वदरातिवर्गः तवारिनिकरः गुहासु दरीषु, शेते निद्राति । किंकृत्वा ? गृहाणि निलयानि[52]

51 मूले–'सुखार्थस्य मानस्य' इत्यधिकम् ।  52 निलयनानि–पा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

मुक्त्वा अपनीय । किंविशिष्टानि? स्फुरन्तः भासमानाः, प्रदीपाः कज्जलध्वजाः येषु तानि स्फुरत्प्रदीपानि । किंलक्षणासु गुहासु? अन्तः मध्ये, गताः प्राप्ताः, विविधमालमनर्थः[?] । एभ्यो व्याला व्यदनं हन्तुमुद्यमः एषामस्तीति वा । ततः कर्मधारये, ते च ते व्यालाः दुष्टद्विजिह्वाश्च । तथा फण गतौ, फणन्तीति फणाः फण्यन्ते वा । फणा एव मणयः, फणासु मणयो वा, फणामणय इवेति वा, तेषां फणामणयः । तथा तेषामन्तर्गतव्यालफणामणीनां प्रभाभिः दीप्तिभिः, उद्भासिता प्रकाशिता भूः भूमिः; यासां तास्तथा । तासु उद्भासितभूषु प्रदीपस्थाने फणामणयः; गृहस्थाने गुहाः । कज्जलध्वजान्वितसदनसदृशस्य फणामणिद्योतितकन्दरारूपस्यार्थस्य परावर्तनविधानात्सदृशपरिवृत्तिः ॥११४॥

असदृशार्थं निदर्शयति—

**दत्त्वा प्रहारं रिपुपार्थिवानां जग्राह यः सयति जीवितव्यम् ।**
**शृङ्गारभङ्गीं च तदङ्गनानामादाय दुःखानि ददौ सदैव ॥११५॥**

यो काश्यपीपालः भूपालः, संयति रणे, प्रहरणं प्रहारो घातः, तं दत्त्वा वितीर्य; रिपुपार्थिवानां शत्रुनृपाणां जीवितव्यं जग्राह आददे । च पुनः, तदङ्गनानां सपत्नसुन्दरीणां, शृङ्गारमण्डनप्रकाराद्यलङ्काराः, तेषां भङ्गी सविच्छित्तिरचना परम्परा वा, तामादाय सदैव दुःखानि सातानि दत्तवान् । इह प्रहारसमानेन जीवितव्येन शृङ्गारभङ्गीसमानानि दुःखानि अतोऽसदृशार्थेन परिवर्तनम् । तथोक्तं पौलस्त्यमहादेवयोः मुखवरप्रदानयोः विनिमयात्परिवृत्तिः, समन्यूनाधिकानां च पदानां विनिमयो भवेत् साकं समाधिकन्यूनैः, परिवृत्तिरसौ मतेति लक्षणम् । अन्यच्च—

युगपद्दानादानेऽन्योन्यं वस्तुनोः क्रियेते यत् ।
क्वचिदुपचर्येते त्वाप्रसिद्धितः सेति परिवृत्तिः ॥१॥ [रु. का. ७.७७]

यथा—

दत्त्वा दर्शनमेते मत्प्राणा वरतनु त्वया हि कृताः ।
किन्त्वपहरसि मनो यद् ददासि रणरणकमेकं तत् ॥ [रु. का. ७.७८] ॥११५॥

यथासङ्ख्यं लक्षयति—

**यत्रोक्तानां पदार्थानामर्थाः सम्बन्धिनः पुनः ।**
**क्रमेण तेन बध्यन्ते तद्यथासङ्ख्यमुच्यते ॥११६॥**

यत्र यस्मिन्नलङ्कारे एकस्मिन् स्थले उक्तानां निबद्धानां, पदार्थानां वस्तूनां, सम्बन्धोऽस्त्येषामिति सम्बन्धिनः । मत्वर्थीयो णिनिः, न तु कृतो णिनिः । अत्र कृत्तद्धितयोः तद्धितवृत्तिः बलीयसीति भाष्येऽतः सम्बन्धिनोऽर्थाः पुनः भूयः, तेनैव क्रमेण परिपाट्या; तथोदितवानमरः 'क्रमः परिपाटीति' । बध्यन्ते रच्यन्ते विद्वद्भिः तत्सङ्ख्यानमतिक्रम्य करोतीति यथासङ्ख्यं भण्यते ॥११६॥

एतदुदाह्रियते—

**मृदुभुजलतिकाभ्यां शोणिमानं दधत्या चरणकमलभासा चारुणा चाननेन ।**
**बिसकिसलयपद्मान्यात्तलक्ष्मीणि मन्ये विरहविपदि वैरात्तन्वते तापमङ्गे ॥११७॥**

बियन्ति बिसानि 'पटवटिवीभ्यामिति डिति सः' [हे. उ. ५७९]; बिस्यन्ते प्रर्यन्ते वा । कसन्ति किसलयानि,



Jain Education International For Private & Personal Use Only www.jainelibrary.org

'कसेरलादिरिच्चास्येत्यय:' [है.उ ३६८] । पद्यते पद्मानि अर्तीरीतिमः, बिसानि च किसलयानि च पद्मानि च तानि तथा । ततश्चाहमेवं मन्ये वितर्कयामि, बिसानि तन्तुलानि, किसलयानि पल्लवाः, पद्मानि नलिनानि, इमानि त्रीणि विरहविपदि विप्रयोगकृच्छ्रे, वैरात् विद्वेषात् , अङ्गे वैरे, तापं सन्तापं, तन्वते विस्तारयन्ति । वैरहेतुगर्भितं विशेषणं विवदति । आत्ता लक्ष्मीर्यैस्तानि आत्तलक्ष्मीणि गृहीतविभूषणानि । अपरोऽपि यो बलादात्तलक्ष्मीकः स्यात्स विद्वेषं धत्ते; व्यसने पतिते च सन्तापं निर्मिमीते । कैः ? भुज्यते आभ्यां भुजौ, तौ लतिके इव भुजलतिके; मृद्वौ च ते भुजलतके च तथा, ताभ्यां मृदुभुजलतिकाभ्यां सोमालबाहुवल्लीभ्याम् । पद्मनालानि आत्तलक्ष्मीणि निर्मितानि । इत्थमंह्रिनलिनप्रभया, शोणिमानं लोहितिमानं बिभ्रत्या किसलयानि गृहीताभाकानि विहितानि । तथा चारुणा रुचिरेण, आननेन वदनेन, पद्मानि आदत्ताभिख्यानि सृष्टानि ॥११७॥

अथ विषमं लक्षयति —

**वस्तुनो यत्र सम्बन्धमनौचित्येन केनचित् ।**
**असम्भाव्यं वदेद्वक्ता तमाहुर्विषमं यथा ॥११८॥**

वक्ता पुरुषः, यत्र यस्मिन्नलङ्कारे, उभयोर्वस्तुनोः केनचिदनौचित्येन अयोग्यतया, सम्बन्धमसम्भाव्यं सम्भावयितुमनर्हं, वदेत्कथयेत्, लब्धवर्णाः तं विषममलङ्कारमाहुः ब्रुवन्ति । यथा इति अनेन अनन्तरवृत्ते चैतदुदाह्रियते ॥११८॥

**क्वेदं तव वपुर्वत्से कदलीगर्भकोमलम् ।**
**क्वायं राजीमति क्लेशदायी व्रतपरिग्रहः ॥११९॥**

विरागिणीं राजीमतीं प्रति उग्रसेनपार्थिवस्योक्तिरियम् । इह द्वौ 'क्व' शब्दौ महदन्तरं सूचयतः । वदति मातरं दृष्ट्वा वत्सःमावादीति सः स्त्रियामा[म]पि वत्सा, तस्य आमन्त्रणे हे वत्से राजीमति ! इदं तव वपुः क्व, अयं व्रतस्य वज्रकर्कशप्राणभृद्दुर्वहस्य दीक्षारूपस्य, परिग्रहोऽभ्युपगम्यो व्रतपरिग्रहः क्व ? किंविशिष्टं वपुः ? कदल्याः गर्भः मध्यः, तद्वत्कोमलं कदलीगर्भकोमलम् मोचामध्यमृदुलम् । कथभूतो व्रतपरिग्रहः ? क्लेशं केशलोचाद्यात्मकं, ददातीत्येवंशीलः क्लेशदायी । इह तडागोन्मीलितकोमलमृणालन्यायेन तनोरतीव सोमालत्वेन चारित्रस्य चाधिकतरक्लेशदातृत्वेन सम्बन्धो न सम्भवेदित्याकूतम् । तथोक्तं शृङ्गारशतकसत्कपञ्चपञ्चाशत्तमस्य —

रात्रौ वारिभरालसाम्बुदरवोद्विग्नेन जाताश्रुणा ।
पान्थेनात्मवियोगदुःखपिशुनं गीतं तथोत्कण्ठया ॥[53]

इत्याद्यात्मकस्य वृत्तस्य वृत्तौ लक्षणया तस्या आलेख्यके लोकान्तरं गतो इत्यर्थः । त्वं तावदास्व दूरे । भृत्यावयवो निहन्त्यहित्वर्गमित्यादिर्वद्विषमालङ्कारः । तथा गीतं वाद्यं नृत्यं चालेख्यं विशेषकपत्रच्छेद्यमित्याद्यपि विषमालङ्कारः । तदुक्तं —

विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य वा भवेत् ।
विरूपघटनाय स्याद्विषमालङ्कृतिर्मता ॥ [प्र.रु.-अ.प्र.] इति लक्षणम् ।१।

"यत्र क्रियाविपत्तेर्न भवेदेव क्रियाफलं तावत्कर्तुरनर्थश्च भवेत्तदपरमभिधीयते विषमम् ।२।

53. श्लोक एष अ.श. ५४ रूपेणापि प्राप्यते । नोपलभ्यते शृङ्गारशतकस्य प्रकाशितग्रन्थेषु ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अन्यच्च—

> कार्यस्य कारणस्य च यत्र विरोधः परस्परं गुणयोः ।
> तद्वत्क्रिययोरथवा संजायेतेति तद्विषमम् ॥३॥

यथा—

> आनन्दममन्दमिमं कुवलयदललोचने ददासि त्वम् ।
> विरहस्त्वयैव जनितस्तापयतितरां शरीरं मे ॥३॥११९॥ [अ.म. पृ. २९९]

अथ सहोक्तिः प्रदर्श्यते—

> **सहोक्तिः सा भवेद्यत्र कार्यकारणयोः सह ।**
> **समुत्पत्तिः कथाहेतोर्वक्तुं तज्जन्मशक्तिताम् ॥१२०॥**

सा सहोक्तिः सहोक्त्यभिधानालङ्कृतिर्भवेत् । सा का ? यत्र यस्यामलङ्कृतौ वर्णनीयस्य क्ष्मापतिप्रभृतिकस्य कथानायकस्य कथाहेतोः कथनाय कार्यकारणयोः सह युगपदेव समुत्पत्तिः समुद्भवः उच्यते । किं कर्तुम् ? तयोः कार्यकारणयोः ताभ्यां कार्यकारणाभ्यां वा जन्मोद्भवः तत्र । शक्तिः सामर्थ्यं यस्य सः तज्जन्मशक्तिः, तस्य भावः तत्ता, तां तज्जन्मशक्तितां वक्तुं कथयितुम् । एतेन कथानायक एव शक्तः सन्, समकालमेव कृत्यं बीजं च जनयतीति वक्तुमित्यस्यार्थं आवेदितः ॥१२०॥

इयमुदाह्रियते—

> **आदत्ते सह यशसा नमयति सार्धं मदेन सङ्ग्रामे ।**
> **सह विद्विषां श्रियाऽसौ कोदण्डं कर्षति श्रीमान् ॥१२१॥**

असौ, श्रीर्नित्यमस्यास्तीति श्रीमान् वसुधाधिपतिः, विद्विषां रिपूणां, यशसा श्लोकेन साकं; कदिः सौत्रः, कद्यतेऽनेन कोदण्डः । पिचण्डैरंडे त्यंडे निपात्यते; कोपाद्दण्डयत्यनेन वा; पृषोदरादित्वात्, तं कोदण्डं चापं, आदत्ते गृह्णाति । सङ्ग्रामन्तेऽत्र संग्रामः, तत्राक्रन्दनेऽरातीनां, मदेनाभिमानेन सत्रा कोदण्डं नमयति । विपक्षिणां श्रिया राजलक्ष्म्या समं कार्मुकं कर्षति । इहारातीनां यशसः आदानरूपं कार्यं, स्वयं कार्मुकादानं कारणम् । कारणैर्यान्ति हि कार्यमवरं संयुज्यन्त इति न्यायेन कोदण्डं ह्यादाय विजितेषु प्रत्यर्थिषु श्लोकः स्वात्मनि समेति । सपत्नानां मदापनयनं कृत्यं, कोदण्डनामानं च बीजम् । इत्थं शत्रूणां कमलाकर्षणं प्रयोजनं, चापाकर्षणं च निमित्तम् । इह भूपतेः शौर्यातिरेकत्वे यं· त्वराविधानेन कार्यकारणयोः सहभावः प्रतिपादितः । तथा चावाचि शृङ्गारशतकान्तस्थ "प्रस्थानं वलयैः" इत्यादिषट्त्रिंशत्तमवृत्तटीकायां सहोक्तिरलङ्कारः ।

> भवति यथारूपोऽर्थः कुर्वन्नेवापरं तथा रूपम् ।
> उक्तिस्तस्य समाना तेन समं या सहोक्तिः सा ॥१॥ [रु. का ७.१३]

चेतोवत्ये तु इत्यौपम्यकल्पनया कार्यगताशुत्वभावप्रतीतेश्चमत्कार इति रहस्यम् ॥१२१॥

अधुना विरोधं लक्षयति—

> **आपाते हि विरुद्धत्वं यत्र वाक्येन तत्त्वतः ।**
> **शब्दार्थकृतमाभाति स विरोधः स्मृतो यथा ॥१२२॥**

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्र यस्मिन्नलङ्कारे वाक्ये आपाते शब्दश्रवणमात्रे निरूपणकाले च, विरुद्धत्वमाभाति विरुद्धत्वेनाभासते । परं न तत्त्वतो न परमार्थतः, किन्तु विरुद्धशब्दकृतं विपरीतारवनिष्पादितं प्राज्ञैः, हि निश्चितं, स विरोधालङ्कारः स्मृतः । 'यथा' शब्दोऽनन्तरवक्ष्यमाणविरुद्धशब्दार्थकृतदृष्टान्तद्वितयार्थकः ॥१२२॥

तत्र शब्दविहितविरोधं दर्शयति—

**दुर्वारबाणविभवेन सुवर्मणापि लोकोत्तरान्वयभुवापि च धीवरेण ।**
**प्रत्यर्थिषु प्रतिरणं स्खलितेषु तेन संज्ञामवाप्य युयुधे पुनरेव विष्णुः ॥१२३॥**

जरासन्धवसुधापतिना युद्धे कृष्णमजेयं मत्वा प्रयुक्तया जराविद्यया यदुकटके निहतसंज्ञे निर्मिते सति । वेवेष्टि विश्वं व्याप्नोति विष्णुः, "सूविषिभ्यां नुर्यण्वदिति नुः" । संज्ञायतेऽनया संज्ञा संज्ञानं वा, संज्ञाम् । ततः क्षणान्तरे विष्णुर्विश्वम्भरः, संज्ञां चैतन्यं, अवाप्य लब्ध्वा, पुनः भूयः, एवेत्यवधारणे । युयुधे सङ्गरं विदधौ । केषु सत्सु ? तेन नेमिस्वामिना; प्रतिरणं-प्रतीपमर्थयन्ते प्रत्यर्थिनः, तेषु प्रत्यर्थिषु परिपन्थिषु जरासन्धपाक्षिकेषु स्खलितेषु सत्सु; उच्छृंखलभावं मोचितेषु करुणार्द्रहृदयत्वेन प्रोज्जासितेषु । दुर्वारादिविशेषणचतुष्केन श्रीनेमिनाथं विशिनष्टि । किं भूतेन नेमिना ? बाणान् वारयति वारबाणः । 'राजादन्तादित्वात्, [हे. व्या. ३.१.१४९] पूर्वनिपातः । वारमाच्छादकं वा, नमस्येति वा, पूर्वपदस्थादिणि णत्वं—'वारबाणस्तु कञ्चुकः' [३.४३१] इत्यभिधानचिन्तामणिवचनात् । दुष्टो वारबाणस्य कञ्चुकस्य विभवो यस्य सः दुर्वारबाणविभवः, तेन । पुनः कीदृशेन ? वृणोत्यङ्गं वर्म, 'मनितिमन्'; सुष्ठु वर्म सन्नाहो यस्य सः सुवर्मा, तेन । अपिः विरोधाभाससूचकः सर्वत्र योज्यः । यो हि दुर्वारबाणविभवः सः कथं सुवर्मा शोभनकवचो भवेत् ? आपाते विरोधो, न तत्त्वतः; विरोधपरिहारस्तु दुःखेन वारयितुं शक्यः, दुर्वारो बाणविभवो सायकप्रपञ्चो यस्य सः, तथा तेन । पुनः किंलक्षणेन ? लोकोत्तरे सर्वोत्कृष्टेऽन्वये वंशे, भूः उत्पत्तिः यस्य असौ, तथा तेन लोकोत्तरान्वयभुवा । यः किल उत्तमवंशोद्भवः सः कथं धीवरो मत्स्यबन्धक इति विरोधः । वस्तुगत्या तु धीवरेण धिषणासत्तमेनेति तत्परिहारः ॥१२३॥

अर्थनिर्मितविरोधं दृष्टान्तयति—

**येनाक्रान्तं सिंहासनमरिभूभृच्छिरांसि विनतानि ।**
**क्षिप्ता युधि शरपङ्क्तिः कीर्तिर्याता दिगन्तेषु ॥१२४॥**

येन भूपालेन सिंहासनमाक्रान्तम् । अरिभूभृतां विपक्षराज्ञां, शृणन्ति वियुक्तानीति शिरांसि शीर्षाणि, विनतानि प्रह्वीभावमापादितानि । यत्खल्वाक्रम्यते तन्नमति । इह चापरमाक्रान्तं इतरन्नमितं इत्यर्थकृतो विरोधाभासः । यथा येन राज्ञा, युधि सङ्गरे, शृणाति शीर्यते वा एभिः शराः, पंच्यते पंक्तिस्तेषां पंक्तिः, शरपंक्तिः इषुश्रेणिः, क्षिप्ता दिगन्तेषु ककुप्पर्यन्तेषु, तेषु । कीर्तिः याता गता । यत् क्षिप्यते तद्दूरं याति । इह च न तथा क्षिप्तं अन्यद्दूरगतं; अन्यदर्थकृतविरोधोऽयम् । तदुक्तं—

यस्मिंश्च द्रव्याणां परस्परं सर्वथा विरुद्धानां एकत्रावस्थानं समकालं भवति स विरोधः । सर्वत्र विरोधे विरुद्धवदाभासत इति विरोधभासालङ्कारः । तथा चावाचि काव्यप्रकाशे—

विरोधाभासो- "अविरोधेऽपि विरुद्धत्वेन यद्वचः" [१०.११०] इति लक्षणम् ॥१२४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

साम्प्रतमवसरं लक्षयति—

**यत्रार्थान्तरमुत्कृष्टं सम्भवत्युपलक्षणम् ।**
**प्रस्तुतार्थस्य स प्रोक्तो बुधैरवसरो, यथा ॥१२५॥**

यत्र यस्मिन्नलङ्कारे प्रस्तुतार्थस्य प्रस्तावप्राप्तार्थस्य वर्णनीयोत्कृष्टं सकलप्रतीतमर्थान्तरमुपलक्षणं संभवति, बुधैः सुधीभिः सोऽवसरालङ्कारः प्रोक्तः प्रणीतः । यथेत्यनेन पुरो वृत्ते उदाहरिष्यते ॥१२५॥

**स एष निश्चयानन्दः स्वच्छन्दतमविक्रमः ।**
**येन नक्तंचरः सोऽपि युद्धे बर्बरको जितः ॥१२६॥**

स एष राजा विद्यते; अर्थाज्जयसिंहदेव एव । किंविशिष्टः ? निश्चयेन सर्वकालीनेन, आनन्दः प्रमदो, यस्य सः निश्चयानन्दः । न कर्हिचन परपरिभवादिव्यासेन विख्यातः । पुन कीदृशः ? अतिशयेन स्वच्छन्दः स्वायत्तः स्वच्छन्दतमः, तथाविधो विक्रमो विक्रान्तिर्यस्य सः, स्वच्छन्दतमविक्रमः स्वाधीनतरबलः । उपलक्षयति-येन सम्राजा सोऽपि प्रख्याततरो बर्बरनामधेयो नक्तंचरो निशाचरलक्षणो भूपतिराह वेजितोऽतिभूतः । अत्रार्थादेव जयसिंहदेवः प्रसिद्धस्य बर्बराह्वभूपस्य जयविधायकत्वेनोपलक्षणेनावसीयते । यमित्यवसरालङ्कारः । तथा चोक्तममरूशतकान्तर्वर्ति 'कोपो यत्र' इत्याद्येकोनचत्वारिंशत्तमकाव्यटीकायां— "तथा निःशङ्केन किमप्याचरितं यथाऽहमप्यनन्यशरणा ते दुर्जनी जाता" । अवसरोऽलङ्कारोऽर्थान्तरमुत्कृष्टं सरसं यद वोपलक्षणं क्रियते—

अर्थस्य तदभिधानं प्रसङ्गतो यत्र सोऽवसरः । [अ. श. २८-टीका]

यथा—

तदिदमरण्यं यस्मिन् दशरथवचनानुपालनव्यसनी ।
निवसन् बाहुसहायः चकार रक्षःक्षयं रामः ॥२॥१२६॥ [अ. श. ३८-टीका]

सारं लक्षयति—

**यत्र निर्धारितात्साराद् सारं सारं ततस्ततः ।**
**निर्द्धार्यते यथाशक्ति तत्सारमिति कथ्यते ॥१२७॥**

यत्र यस्मिन्नलङ्कारे, निर्धारितात् निर्धारीकृतात्, सामान्यवस्तुनः पृथक्कृतात्साराच्च श्रेष्ठाद्वस्तुनः सारमुत्तमं निर्धार्यतेऽभिन्नं विधीयते । ततस्तत इति तदनुभूयोभूयो, यथाशक्ति स्वसामर्थ्यानुसारेण सारं वस्तु निर्धार्यते । ततस्तत इति वीप्सायां द्वित्वे सारनैरन्तर्यमुदितं, प्रवीणैरिदं सारमिति सारालङ्कार उच्यते । न च ततस्तत इत्यादौ पौनरुक्त्यमाशङ्कनीयम् । उक्तं च—

अनुवादादरवीप्साभृशार्थविनियोगहेत्वसूयासु ।
ईषत्सम्भ्रमविस्मयगणनास्मरणेष्वपुनरुक्तम् ॥ इति ॥१२७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उदाहरति—

संसारे मानुष्यं सारं मानुष्यके च कौलीन्यम् ।
कौलीन्ये धर्मित्वं धर्मित्वेऽपि चापि सदयत्वम् ॥१२८॥

संसरन्ति शुभाशुभैः कर्मभिर्जन्तवोऽस्मिन्निति संसारः संसरणं वा, तस्मिन् । संसारे गतिचतुष्टयभ्रमणात्मके भवे, मानुषस्य भावो मानुष्यं, सारं वरेण्यम् । मानुष्यकेऽपीति । मनुष्याणां समूहो मानुष्यकं, 'गोत्रे क्षेत्यकञ्';[54] मानवसमवायवर्तित्वं, तस्मिन् मानुष्यके । परत्रानभिहितक्रियात्वाचकत्वेन पुण्यवशात् प्राप्तेऽपि, कुलीनस्य भावः कौलीन्यम् दशाङ्गयुगुत्तमकुलजातत्वं, सारमग्रिमं, तस्मिन् कौलीन्ये सुकृतसम्पत्तिबलेन लब्धेऽपि धर्मित्वमिति ।

तार्क्ष्यः पक्षिषु, मेरुरद्रिषु,वियद्व्यूढेषु, चक्री नरेष्विन्द्रः स्वर्गिषु, शीतदीधितिरुडुष्वैरावणो हस्तिषु ।
शीतासिन्धुषु हेमधातुषु रविर्भास्वत्सु धाराधरा जीवातुर्व्ययमर्हतानिगदितो धर्मेषु धर्मो गुरुः ॥१॥

इत्येतादृशो धर्मः श्रुतचारित्रात्मकोऽस्यास्तीति धर्मी, तस्य भावो धर्मित्वं, सारं प्रधानम् । च पुनः अपिरवधारणे भिन्नक्रमे च, तस्मिन् । अवाप्तेऽपि सहृदयया सकलप्राणिजतनया वर्तमानः सदयः, तस्य भावः सदयत्वम्, सारं निखिलश्रेष्ठं वर्तते ॥१२८॥

अथ श्लेषं लक्षयति—

पदैस्तैरेव भिन्नैर्वा वाक्यं वक्त्येकमेव हि ।
अनेकमर्थं यत्रासौ श्लेष इत्युच्यते, यथा ॥१२९॥

यत्र यस्मिन्नलङ्कारे, एकमेवेत्यवधारणे, वाक्यं पदसमुदायात्मकं; तैरेव पदैर्वर्णसमूहरूपैर्वेति, पक्षान्तरे यद्वा भिन्नैर्विलक्षणैः, पदैरनेकं विविधं, अर्थमभिधेयं, वक्ति वदति, बुधैरसौ श्लेषाभिधानालङ्कार इत्युच्यते । 'यथा' इत्ययं शब्दोऽग्रेऽभिधीयमानतत्पदभिन्नदृष्टान्तद्वयार्थकः ॥१२९॥

आनन्दमुल्लासयतः समन्तात्करैरसन्तापकरैः प्रजानाम् ।
यस्योदये क्षोभमवाप्य राज्ञो जग्राह वेलां किल सिन्धुनाथः ॥१३०॥

राजतेऽमात्यादिभिरिति राजा, 'उक्षितक्षीत्यन्', [हे उ.९००] रञ्जयति प्रजामिति वा, तस्य राज्ञः । ततोऽन्वये यस्य राज्ञो जयसिंहदेवाह्वयस्य वसुधाधिपस्योदये क्षोभं साध्वसं लब्ध्वा । सिन्धूनां जनपदानां नाथः सिन्धुनाथो भूपतिः, किलेत्याप्तवाक्ये, वेलां जग्राह समयमतिवाहयांबभूव । कीदृशस्य राज्ञः? आनन्दनमानन्दः, तं: प्रजायन्ते प्रजाः, तासां प्रजानां समन्तादानन्दमुल्लासयतः । कैः? करैर्दण्डै । किंलक्षणैः? सन्तापमसातं कुर्वन्तीति सन्तापकराः, न तथा असन्तापकराः, तैः, सुखकारिभिरित्यर्थः । अथ चापराऽपि यः सिन्धूनां नदीनां, नाथो भर्ता । नद्यो हि सागरमहिष्य इति वचनात् सिन्धुनाथः समुद्रो राज्ञो निशारत्नस्य । "राजा निशो रत्नकरौ च चन्द्र" इत्यूचुरभिधानचिन्तामणौ हेमसूरिपादाः [२.१९] । तस्य उदये, क्षुभ्यतेऽनेन क्षोभः, तं, चान्द्रकया । तदुल्लासादूर्मित्वमासाद्य । वेलति चलति वेला जलवृद्धिरूपा, तां वेलां तीरश्रेणिकां वा, गृह्णात्यापद्यते । किंलक्षणस्य निशारत्नस्य? प्रजानां जनानां, करैः अंशुभिः, आनन्दं हर्षं, उल्लासयतः । किंभूतैः करैः? असम्यक्तापकरैः तुहिनरश्मिभिरित्यर्थः । अतस्तैरेव पदैः श्लेषः । इह सिन्धुनाथे सिन्धुशब्दस्य साधर्म्यादेकनालावलम्बिफलद्वयवदेकशब्देनार्थद्वयप्रतीतेः उभयथाऽपि सिन्धुशब्दस्य प्रकृतत्वाच्च केवलप्रकृतविषयोऽर्थतः श्लेषविशेषस्यापि केवलप्रभेदे श्लिष्टत्वानियमान्न तुल्ययोगिता ॥१३०॥

54. गोत्रक्षत्रियेभ्यः अकञ् प्रायः । [हे. व्या. ६.२.२०]

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भिन्नपदैः श्लेषमुदाहरति—

कुर्वन् कुवलयोल्लासं रम्याम्भोजश्रियं हरन् ।
रेजे राजापि तच्चित्रं निशान्ते कान्तिमत्तया ॥१३१॥

यो जयसिंहो राजा, कमनं कान्तिः द्युतिः विद्यते यस्मिन्नसौ कान्तिमान्, तस्य भावः तत्ता, तया कान्तिमत्तया प्रग्रहवत्तयाऽवश्यं तया। निशायामम्यते गम्यते इति निशान्तं, 'अम्गता' विति धातोः क्ते तत्सिद्धौ, निशाम्यन्त्यस्मिन्निति वा । निशाया अन्तोऽत्रेति केचित् । तस्मिन् निशान्तेऽन्तःपुरेऽपि रेजे विभ्राजते स्म, तच्चित्रं महदाश्चर्यम् । किं कुर्वन् ? कुवलयोल्लासं कुर्वन्-कुः पृथ्वी तस्याः वलयं, तथा । तस्य कुवलयस्य भूमण्डलस्य, उल्लासमाल्हादं, कुर्वन् विदधन् । तथा रम्यां वरेण्यां, भोजस्य श्रीः भोजश्रीः, ताम् । पदैकदेशे पदसमुदायोपचारात् भोजराजलक्ष्मीं हरन् । अपरोऽपि यो राजा कुमुदबान्धवः भवति, सः निशान्ते प्रत्यूषे, कान्तिमत्तया न विभ्राजते । सोऽपि कौ वलति प्राणिति कुवलयं, कुत्सितो बहिर्वलयः पत्रवेष्टनमस्य वा; तस्य कुवलयस्य कैरवस्य उल्लासं विकासं कुर्वन् । अम्भसि जातान्यम्भोजानि, रम्याणि रमणीयानि च तान्यम्भोजानि च तथा, तेषां श्रीः रम्याम्भोजश्रीः, तां श्रेष्ठसूर्यविकासिनलिनशोभां हरन् । इह कुः पृथ्वीति भिन्नपदं, रम्येति भिन्नपदं, अम्भोजश्रीरिति भिन्नपदम् । अतो भिन्नपदश्लेषः । तदुक्तमर्थश्लेषलक्षणं—

"एकार्थवाचकानामेव शब्दानां यत्रानेकार्थः सोऽर्थश्लेषः" इति ।

तेन

यत्रैकमनेकार्थैर्वाक्यं रचितं पदैरेकस्मिन् ।
अर्थे कुरुते निश्चयमर्थश्लेषः स विज्ञेयः ॥ [रु. का. १०.१]

इति रुद्रटेन यल्लक्षणं विहितं [रु. का. १०.१] तच्छब्दश्लेषत्वमेवापद्यते । अनेकार्थानां हि शब्दानामन्वयव्यतिरेकाभ्यां तस्य प्रवृत्तिनिवृत्ती ।

यथा—

तवैष विद्रुमच्छायो मरुमार्ग इवाधरः ।
करोति कस्य नो बाले पिपासाकुलितं मनः ॥१॥
तव तन्वि कुचावेतौ भूभुजाविव राजतः ।
अन्योन्यमण्डलाक्रान्तौ सन्धिहीनौ करार्थिनौ ॥ इति ॥१३१॥

सम्प्रति समुच्चयं लक्षयति—

एकत्र यत्र वस्तूनामनेकेषां निबन्धनम् ।
अत्युत्कृष्टापकृष्टानां तं वदन्ति समुच्चयम् ॥१३२॥

यस्मिन्नलङ्कारे एकस्मिन् वर्णनीये वस्तूनि अनेकेषां वस्तूनां निबन्धनमुपन्यासो भवेत् कवयः, समुच्चयनं समुच्चयः अनेकस्यैकत्राध्यावापः, तं समुच्चयाभिधानमलङ्कारं ब्रुवन्ति । किंविशिष्टानां वस्तूनाम् ? अतिशयेनोत्कृष्यन्ते स्म अत्युत्कृष्टानि, अपकृष्यन्ते स्म अपकृष्टानि अत्युत्कृष्टानि चापकृष्टानि च तथा तेषां अत्युत्कृष्टापकृष्टानाम् । अत्युत्कृष्टानां अत्यर्थसत्तमानां, अपकृष्टानामधमानां इति विवेकः ॥१३२॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्युत्कृष्टवस्तूदाहरणं निबध्नाति—

अणहिल्लपाटकं पुरमवनिपतिः कर्णदेवनृपसूनुः ।
श्रीकलशनामधेयः करी च रत्नानि जगतीह ॥१३३॥

इह जगति त्रीणि; रमते मनः एषु रत्नानि, "रमेस्त चेति" [हे उ २६४] नः वस्तूनि विद्यन्ते। तानि कानीत्याह–पाटयति पाटकः, क्लीबे पाटकम् । अणहिल्लेनोपलक्षितं पाटकं अणहिल्लपाटकं एकं तत्पुरं पत्तनम् ।१। द्वितीयोऽवन्याः पृथिव्याः पतिः अवनिपतिः श्रीकर्णदेवसूनु श्रीजयसिंहदेवः ।२। च पुनः, तृतीयः प्रशस्तं नाम एव नामधेयं, नामरूपभागेभ्य स्वार्थे। [हे.व्या.७ २.१५८][55] धेय इति धेयः, तदनु श्रीकलश इति नामधेयं यस्य सः श्रीकलशनामधेयः, करी गजः ।३। इहोत्कृष्टानामुपन्यासोऽवसेयः ॥१३३॥

अपकृष्टवस्तूनि ग्रथ्नाति–

ग्रामे वासो नायको निर्विवेकः कौटिल्यानामेकपात्रं कलत्रम् ।
नित्यं रोगः पारवश्यं च पुंसामेतत्सर्वं जीवितामेव मृत्युः ॥१३४॥

ग्रस्यते कुण्ठैः इति ग्रामः, "ग्रसिहागृभ्यां जिह्रोवेति मः," [हे उ. ३३९] गुणान् ग्रसतीति वा तस्मिन् ग्रामे वसनं वासः भवति । नयतीति नायकः, विवेचनं विवेकः, निर्गतो विवेको यस्मादसौ निर्विवेको नाथः । इह च शब्दः स्वगतानेकभेदसूचनार्थकः । कुटन्ति कुटिलानि । इले कुटादित्वात् गुणाभावे वक्राणि, तेषां समूहो भावो वा कौटिल्यम्, बहुवचने कौटिल्यानि । तेषां कौटिल्यानां अर्थात् वञ्चनभावानामेकपात्रं अद्वितीयभाजनम् । कलत्रं भार्या, नियतं भवं नित्यम् । 'नेर्ध्रुवे' इति [हे. व्या. ६.३.१७] त्यच् सना। रोगो व्याधिः, च पुनः । परवशस्य भावः पारवश्यं पराधीनत्वम्, 'को नरकः परवशता' इति वचनात् । पान्ति त्रिवर्गान् पुमांसः, 'पातेः' [हे. व्या. ४.२.१७] डुम्सुरिति डुम्सुः । तेषां पुंसां पुरुषाणां, एतत्सरति सर्वं, 'लटिखटीति वः' । [हे. उ. ५०५] सर्वतीति वा निखिलं, प्रागुक्तमेवेत्यवधारणे । जीवन्तीति जीवन्तः, तेषामपि मृत्युप्रायं दशप्राणधारणकानामपि इत्यवसातव्यम् । यदुक्तं माघसत्कमुदमित्यादिद्वासप्ततितमवृत्तौ । अत्र सफलप्राप्त्याद्यनेककर्तृक्रियायो[यौ]गपद्याद्भिन्नाधिकरणक्रियासमुच्चयासमुच्चयरूपः समुच्चयालङ्कारभेदः । "गुणक्रियायौगपद्यं समुच्चय" [टीका. शिशु. ६.७२] इति सामान्यलक्षणम् ॥१३४॥

साम्प्रतमप्रस्तुतप्रशंसां लक्षयति—

प्रशंसा क्रियते यत्राप्रस्तुतस्यापि वस्तुनः ।
अप्रस्तुतप्रशंसां तामाहुः कृतधियो यथा ॥१३५॥

यत्र यस्यामलङ्क्रियायां प्रस्तुतं प्रक्रान्तं, न तथा तस्याप्रस्तुतस्यानुचितस्याप्रशंसनीयस्य वस्तुन प्रशंसा श्लाघा क्रियते विधीयते, तामप्रस्तुतप्रशंसामलङ्कारकयां कृता पुण्या धीर्येषां ते कृतधियः कुशाग्रीयमतयः, आहुः ब्रुवन्ति । 'यथा' शब्दोऽनन्तरवक्ष्यमाण दृष्टान्तार्थकः ॥१३५॥

55. 'नामरूपभागात् धेयः' हे. व्या. ७.२.१५८.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उदाहरति—

स्वैरं विहरति स्वैरं शेते स्वैरं च जल्पति ।
भिक्षुरेकः सुखी लोके राजचौरभयोज्झितः ॥१३६॥

भिक्षणशीलो भिक्षुः, भिनत्ति सदनुष्ठानेन क्षुधमष्टप्रकारं कर्मेति वा । नात्रैतदर्थवाचको भिक्षुर्यतिर्गृह्यते, किन्तु भिक्षुशब्देन रङ्क आदीयते । ततश्चायमर्थः – इह लोके एको भिक्षुः द्रमकः सुखी वर्तते । कथमित्याह–स्वमात्मानमीरयतीति स्वैरं, 'स्वादीरेरिण्योः इति वृद्धिः' । स्वैरं यथा स्यात्तथा । विहरति विचरति, तथा स्वैरं स्वेच्छया, शेते निद्राति । च पुनः, स्वैरं जल्पति । किंभूतः? राजनीतिज्ञो राजा, परद्रव्यापहारकश्चौरः तयोर्यद्भयं, तेनोज्झितः त्यक्तः, राजचौरभयोज्झितः । तथा चावादि माघसत्कषोडशसर्गान्तर्वर्ति 'सुकुमार'मित्याद्येकविंशतितमवृत्तटीकायां । अत एवाप्रस्तुतसामान्येन प्रस्तुतविशेषप्रतिपत्तिरूपोऽयमप्रस्तुतप्रशंसाभेदः । "अप्रस्तुतस्य कथनात्प्रस्तुतं यत्र गम्यते । अप्रस्तुतप्रशंसेयं सारूप्यादिनियन्त्रितेति" लक्षणम् [टीका शिशु. १६.२१] ॥१३६॥

एकावलीं लक्षयति—

पूर्वपूर्वार्थवैशिष्ट्यनिष्ठानामुत्तरोत्तरम् ।
अर्थानां या विरचना बुधैरेकावली मता ॥१३७॥

पूर्वस्मात्पूर्वः पूर्वपूर्वः, स चासावर्थश्च तथा, तस्य वैशिष्ट्यं विशेषसाहित्यं, तन्निष्ठाः तदायत्ताः, तेषामर्थानामुत्तरोत्तरं यथा स्यात्तथा । या विशेषेण रचना ग्रन्थनं विरचना, बुधैर्विचक्षणैः सा एकावलीत्याख्यालङ्क्रिया मता भणिता ॥१३७॥

दृष्टान्तयति—

देशः समृद्धनगरो नगराणि च सप्तभूमिनिलयानि ।
निलयाः सलीलललना ललनाश्चात्यन्तकमनीयाः ॥१३८॥

एतादृशो देशो जनपदोऽस्ति । किंलक्षणः? सं सम्यक्प्रकारेण रुध्यन्ति स्म; ऋद्धैराधिक्यमासादयन्ति स्म समृद्धानि । तथाविधानि नगराणि पुराणि विद्यन्ते यस्मिन्नसौ समृद्धनगरः । च पुनः, नश्यन्ति एषु नगराणि, जठरेग्पुरे निपात्यते । नगाः सन्त्येषु वा, 'मध्वादित्वाद्रः' ।[56] न करोऽस्त्येतेषु वा । पुराणि कीदृशानि? सप्तभूमयो निलया आवसथा येषु तानि सप्तनिलयानि । च पुनः, निलीयन्ते येषु ते निलयाः आवासाः । किंविधाः? सह लीलया शृङ्गारचेष्टाविशेषेण वर्तमाना सलीलाः, तादृश्यो ललनाः येषु ते तथा; ललन्ति लल्यन्ते वा ललनाः । लड् विलासे, नन्द्या दषु युप्रत्यये । डलयोरेकत्वे ललनाः अङ्गनाश्चात्यन्तकमनीयाः; अत्यन्तकमनीयत्वमासाम् । पतिव्रतानां प्राणेश्वरचिन्तानुवृत्तिधर्मत्वेन चतुःषष्ठिगुणोपेतत्वेन चावसेयम् । तदुक्तं—

यदुत्तरोत्तरेऽर्थानां स्यात्सर्वपूर्वप्रतिक्रमात् ।
विशेषकत्वकथनमसावेकावली मता ॥१॥१३८॥ [प्र. रु. अ. प्र.]

56. 'मध्वादेः'– हे. व्या. ६.२.७३.



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतर्हि अनुमानं लक्षयति—

प्रत्यक्षाल्लिङ्गतो यत्र कालत्रितयवर्तिनः ।
लिङ्गिनो भवति ज्ञानमनुमानं तदुच्यते ॥१३९॥

यत्र यस्मिन्नलङ्कारे, प्रतिगतमक्षमिन्द्रियं प्रत्यक्षं, अक्ष्णेण[क्ष्णा?] प्रतीतं वा, तस्मात्प्रत्यक्षात् । लिङ्ग्यते गम्यते येन तल्लिङ्गं, तस्मात् लिङ्गतोऽनुमानात् कालत्रये वर्तत इत्येवंशील:, स तथा । स्य कालत्रितयवर्तिनोऽतीतानागतवर्तमानस्थायिनो लिङ्गिनोऽनुमेयस्य ज्ञानं भवति, तदनुमानमनुमानाह्वयालङ्कारो बुद्धिमद्भिः वर्ण्यते ॥१३९॥

अतीतमुदाहरति—

नूनं नद्यस्तदाऽभूवन्नभिषेकाम्भसा विभोः ।
अन्यथा कथमेतासु जनः स्नानेन शुध्यति ॥१४०॥

नूयते नूनं, निशिनूभ्यां नक्तननूनौवेत्यम्, निश्चितमवश्यं 'नूनं च निश्चये' इत्यूचुः [अ. चि. ६.१७६] हेमसूरिपादाः । तदा तस्मिन्, जन्मस्तपनसमये, नदन्ति स्रोतांसि तरसा, नद्योगोरादित्वात्ङोप्, तटिन्यः । प्रभोः श्रीमदरिष्टनेमेः अभिषेकाम्भसाऽजनि स्नात्रोदकेनाभूवन्नासंस्तवेति पाठान्तरेणार्थवशाद्भिभक्तिपरिणामेन पाठादर्थस्य बलीयस्त्वेन च । हे प्रभो देवाधिदेव, तव जनिमहे इति वा व्याख्येयं व्यतिरेकमाह । अन्येन प्रकारेण अन्यथा, एतासु नदीषु, जनो लोकः, स्नानेन मज्जनेन, कथं शुद्ध्यति निर्मलीभवति ॥१४०॥

भाव्यनेहसं दृष्टान्तयति—

जम्भजित् ककुभि ज्योतिर्यथा शुभ्रं विजृम्भते ।
उदेष्यति तथा मन्ये खलः सखि निशाकरः ॥१४१॥

हे सखि, अहमित्थं मन्ये । केन? आदित्येन, कुत्सितानि भानि नक्षत्राणि अत्र, तथा तं करोतीति नामधातोः क्विप् । ककुप्केनादित्येन स्कुभ्नाति द्योतत इति वा स्कुम्भेः सौत्राद्दोप्त्यर्थाच्च क्विप् पृषोदरादित्वाद्वर्णः सलोपः । व्युत्पत्तिरियं कातन्त्रसत्का सर्वधरानुसारेणोदिता प्राक्प्रणीताऽपि हैमानुसारेण । जम्भते जम्भः, जायते इति वा । 'गुदृरमीति भः' [है. उ. ३२७] ततस्तं जयतीति जम्भजिदिन्द्रः, तेनोपलक्षिता तस्य वा; ककुप्; जम्भजित् ककुप्, तस्यां प्राच्यां दिशि, शुभ्रं श्वेतं ज्योतिस्तेजः, तथा तेन प्रकारेण विजृम्भते प्रकाशीभवति । यथा विप्रयोगवतीनामसातदायित्वात् सन्तापकारित्वाच्च खलः दुर्जनः, निशाकरः चन्द्रः, उदेष्यति उदयं प्राप्स्यति ॥१४१॥

वर्तमानसमयमतिदिशति—

मुखप्रभाबाधितकान्तिरस्याः दोषाकरः किंकरतां बिभर्ति ।
तल्लोचनश्रीहृतिसापराधान्यब्जानि नोचेत्किमयं क्षिणोति ॥१४२॥

दोषाकरो रात्रिकरोऽस्याः वनितायाः मुखस्य 'किंकरोमि' इत्याज्ञां प्रतीक्षते । किंकरः तस्य भावः तत्ता, तां किंकरतां भृत्यतां बिभर्ति दधाति । किंविशिष्टो दोषाकरः? मुखस्य वक्त्रस्य, प्रभा द्युतिः,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तया बाधिता तर्जिता, कान्तिः त्विट्, यस्य सः मुखप्रभाबाधितकान्तिः । चेत् यदि इत्थं न भवेत्, तर्हि अयमिन्दुः अब्जानि कमलानि, किमिति हेतुप्रश्नार्थे, क्षिणोति क्षणुग् हिंसायामिति धातोर्लट्रूप, किं पोऽज्जासयति संकोचीभावमापादयति इत्यर्थः । हेत्वन्तरालितं विशेषणं ब्रूते । कीदृशान्यब्जानि ? लोक्यते आभ्यां लोचने, तस्याः सुन्दर्याः लोचने तल्लोचने, तयोः श्रीर्विभूषा तथा । हरणं हृतिः, तस्याः हृतिः तल्लोचनश्रीहृतिः, तया सापराधानि सागांसि, तल्लोचनश्रीहृतिसापराधानि । यो हि यस्य परिकर्मीभवति सः तस्यारातिं व्यथयति । यदुक्तं—

यत्र बलीयः कारणमालोक्य भूतमेव भूतमिति ।
भावीति वा तदन्यत्कथ्यते तदन्यमनुमानम् [रु. का. ७.५९]

यथा—

वहति यथा मलयमरुयथा हरितीभवन्ति विपिनानि ।
प्रियसखि, तथैव न चिरादेष्यति तव वल्लभो नूनम् ॥१॥१४२॥[रु का. ७.६३]

इदानीं परिसंख्यां लक्षयति—

**यत्र साधारणं किञ्चिदेकत्र प्रतिपाद्यते ।**
**अन्यत्र तन्निवृत्त्यै सा परिसंख्योच्यते, यथा ॥१४३॥**

यत्र यस्मिन्नलङ्कारे, किञ्चित्साधारणं सह आधारेण आधारेण वर्तत इति वा साधारणं, एकत्र स्थले प्रतिपाद्यते विवक्ष्यते । अन्यस्मिन्निति अन्यत्र स्थले, तन्निवारणाय स्यात्, बुधैः सा परिसङ्ख्याह्वाऽलंक्रिया उच्यते । यथेत्यनेन पुरो वृत्ते निर्देक्ष्यते ॥१४३॥

**यत्र वायुः परं चौरः पौरसौरभसम्पदाम् ।**
**युवानश्च कृतक्रोधादेव बिभ्युर्वधूजनात् ॥१४४॥**

तत्र पुरे, लक्ष्म्याः स्तेनः कोऽपि न विद्यते । परं केवलं, यत्र यस्मिन् पुरे, वायुर्वातः, चौरोऽस्ति । कासाम् ? पुरस्य नगरस्येदं पौरं, तस्येदमिति 'अणि' [हे. व्या ७.४ ५२] वृद्धिः । सुरभेर्भावः सुरभिरेव वा सौरभं, पौरं च सौरभं च पौरसौरभे, तयाः सम्पदः ऋद्धयः, तासां पौरसौरभसम्पदाम् । एतावता यत्र युवन्ति स्त्रिया मिश्रीभवन्ति इति युवानः, 'भूयुयुवृषीति वन्'; तरुणाः यौवनस्थाः नराः; वधूश्चासौ जनश्च वधूजनः, तस्माद्वधूजनात् भार्यालोकादेवेत्यवधारणार्थे । बिभ्युः बिभयांचक्रुः, नान्यतः । कीदृशाद्वधूजनात् ? कृतो विहितः, कोपो येन सः तथा, तस्मात्कृतक्रोधात् । एतेन वीरविशिखपाताभावेऽपि क्रुद्धाङ्गनापाङ्गविशिखपातात् भीता इव, यद्वा धीरा अपि स्त्रीसन्निकर्षात् विक्रियन्त इत्यावेदितम् । इयताऽन्यसाध्वसं न वर्तते, चौरत्वं सर्वेषां साधारणम् । परं निवेशितमेकस्मिन्पवनेऽभीतत्वं समस्तसामान्यं, परमन्यत्र निवृत्तिः । तथोदितं माघसत्कचतुर्दशसर्गान्तर्वर्ति 'दर्शन' इत्याद्याष्टाचत्वारिंशत्तमकाव्यटीकायाम् । " अत्र दीयतामिति वचसः सं प्रार्थनार्थवर्जनेन ।[57] अत्युत्यसर्जनार्थता[58] कथनादेकस्यानेकत्र प्रसक्तावेकत्र नियमनाख्या परिसङ्ख्या । "

एकस्य वस्तुनः प्राप्तावनेकत्रैकधा यदा ।
एकत्रनियमः सा हि परिसङ्ख्या निगद्यते ॥१॥१४४॥ [प्र. रु.- अ. प्र ][59]

57. टीकायां तु "वचः सार्थनार्थे..." इति ।

58. टीकायां तु "तेनातिसर्जना..." इति ।

59. समाना व्याख्या तु 'अलङ्कारसर्वस्वे' -'एकस्यानेकप्राप्तविकत्रनियमनं परिसंख्या ' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अधुना प्रश्नोत्तरसङ्करयोर्लक्षणद्वितयं क्रमेणाह—

**प्रश्ने यत्रोत्तरं व्यक्तं गूढं वाऽप्यथवोभयम् ।**
**प्रश्नोत्तरं यथोक्तानां संसर्गं सङ्करं विदुः ॥१४५॥**

यत्र यस्मिन्नलङ्कारे प्रच्छनं प्रश्नः, 'यजिस्वपीति नः [हे. व्या. ५.३.८५]', तस्मिन् प्रश्नेऽनुयोजने, उत्तरन्त्यस्मादुत्तरं, 'उदो वा तरप्', उत्तरति पलायते सन्देहादिरनेनेत्युत्तरं वा । स्वरान्तत्वादल् । लिङ्गस्य लोकाश्रयत्वात् क्लीबत्वम् । प्रतिवचः व्यज्यते व्यक्तं स्फुटम्, अपेर्भिन्नक्रमत्वाद्वा पक्षान्तरे । गुह्यते स्म गूढं गुप्तं च भवति । अथवा उभयं व्यक्तं गूढं स्यात् । प्रश्नश्च उत्तरं च प्रश्नोत्तरे ते विद्येते यस्मिन् । यद्वा प्रश्नस्य प्रश्ने वा उत्तरं यस्मिन् स तथा । तं प्रश्नोत्तरनामानमलङ्कारमलङ्कारविदो विदुः । तथा प्रागुक्तानामालङ्काराणामेकत्र मीलनं सङ्कराभिधानमलङ्कारं च तज्ज्ञाः विदुः ॥१४५॥

एतत् दृष्टान्तत्रितयं क्रमेण व्यञ्जयति—

**अस्मिन्नपारसंसारसागरे मज्जतां सताम् ।**
**किं समालम्बनं साधो, रागद्वेषपरिक्षयः ॥१४६॥**

हे साधो, साध्नोति साधुः सम्यग्दर्शनादिभिः, परमपदं साधयतीति वा, तस्य आमन्त्रणे हे साधो । अस्मिन् पार्यते समाप्यतेऽत्रेति पारं, परं तीरं वा, न विद्यते पारं यस्य सोऽपारः; संसारं सागर इव संसारसागरः, स चासौ संसारसागरश्च अपारसंसारसागरः, तस्मिन् । अलब्धमध्यभवाब्धौ मज्जन्तीति मज्जन्तः, तेषां मज्जतां बुडतां सतां विद्यमानानां प्राणिनां किं समालम्बनं व्यक्तम् ? उत्तरं–रागद्वेषपरिक्षयः । रागो माया, लोलेच्छात्मको द्वेषः मानमन्युलक्षणः, तयोः परिक्षयः तद्दोषाभाव इत्यर्थः ॥१४६॥

**क्व वसन्ति श्रियो नित्यं भूभृतां वद कोविद ।**
**असावतिशयः कोऽपि यदुक्तमपि नोह्यते ॥१४७॥**

हे कोविद, त्वं वद ब्रूहि । भूभृतां राज्ञां, श्रियः कमलाः क्व वसन्ति कस्मिन् स्थिरीभवन्ति । असौ कोऽप्यतिशयः आधिक्यं यद्यस्मादुदितमपि स्वल्पकालताप्रतिपादनार्थे नोह्यते न सम्भाव्यते । उत्तरं गूढं; असौ कृपाणे वसन्ति, श्रियो हि खड्गाक्रान्ता वीरप्रिया भवन्तीति भावः ॥१४७॥

**किमैभं श्लाघ्यमाख्याति ? पक्षिणां कः ? कुतो यशः ।**
**गरुडः कीदृशो नित्यं दानवारिविराजितः ॥१४८॥**

इभस्येदमैभं गजसम्बन्धिवस्तु । श्लाघ्यं किम् ? आख्याति गूढमुत्तरं । द्यति खण्डयति अनेन दानं, वारीव द्रवीभूतत्वाद्दानवारि मदसलिलम् । प्रशस्यते कः ? आरवः । पच्यते कालेन पक्षः, बहुवचने पक्षाः सन्त्यस्य पक्षीः, तं पक्षिणं निगदति । गुप्तमुत्तरं- वेति गच्छति विः, 'नीवीप्रह्वभ्यो डित्' इति इः [हे. उ. ६१६] । काश्यपीपालानां यशः कुतः कस्याः स्यात् ? गूढमुत्तर–अजन्ति अधिक्षिपन्ति अस्यामाजिः, तस्याः । आजितः संगरात्, गरुद्भिः डयते, पृषोदरादित्वात् गरुडः ।

सौपर्णेयः नित्यं कीदृशो भाति ? प्रकटमुत्तरं दानवारिः इहार्थवशात् श्रीपतिः, तेन विराजितः शोभितः दानवारिविराजितः, इति गूढागूढमुत्तरम् । यदुक्तं—

उत्तरवचनश्रवणादुन्नयनं यत्र पूर्ववचनानाम् ।
क्रियते तदुत्तरं स्यात्प्रश्नादप्युत्तरं यत्र ॥१॥ [रु. का. ७.९३]

अन्यच्चोक्तं—

यत्नाक्षेपः स यत्नस्य कृतस्यानिष्टवस्तुनः ।
विपरीतफलोत्पत्तेरानर्थक्योपदेशनम् ॥२॥ [का. द. २.१४८]

गच्छेति वक्तुमिच्छामि त्वत्प्रिय मत्प्रियैषिणम् ।
निर्गच्छति मुखाद्वाणी 'मा गा' इव, करोमि किम् ॥३॥१४८॥ [का. द. २.१४७]

अथ सङ्करमुदाहरति—

**वंभंडसुत्तिसंपुडमुत्तियमणिणो पहासमूह व्व ।**
**सिरिबाहड त्ति तणओ आसि बुहो तस्स सोमस्स ॥१०९॥**

तस्य सोमस्य बाहड इत्याह्वयः तनयोऽङ्गजः आसीदभवत् । किंलक्षणस्य सोमस्य ? शोचति शुक्तिः, 'दृमुषीति कित् तिः' [हे. उ. ६५१]; तस्याः सम्पुटं मुक्तास्फोटसम्पुटं, ब्रह्माण्डमेव शुक्तिसम्पुटं, ब्रह्माण्डशुक्तिसम्पुटमेवेति वा । तथा मुक्तैव मौक्तिकं, मणति महार्घतां मणिः, तत्र मणिः हारान्तर्नायकमणिः मौक्तिकमणिः । तत्र मौक्तिकमणिरिव ब्रह्माण्डशुक्तिसम्पुटमौक्तिकमणिः, तस्य । बाहडः सुतः क इव ? प्रभासमूह इव । यद्वा ब्रह्माण्डशुक्तिसम्पुटमौक्तिकमणेरतेजःपुञ्ज इव । पुनः किंभूतः ? बुधः विचक्षणः । इह सम्प्रदायतश्चासौ श्रीश्रीमालविमलकुलशिरोमणिः सोनगिरान्वयालङ्करणखरतरगच्छाम्नायधर्मवर्त्मधुरन्धरो बाहडनामा सङ्घपतिरभवत् । तथा च प्रतिपादयांचकार श्रीसारस्वतव्याकरणग्रन्थसत्कमण्डनाह्वयटीकाकारः—

उद्यत्सान्द्रजिनेन्द्रसुन्दरपदद्वन्द्वप्रसादोद्भवत्
भूयोऽभीष्टपुमर्थसाधकजनुः श्रीमालमालामणिः ।
सोऽयं सोनगिरान्वयः खरतरः श्रीबाहडस्यात्मजः
श्रीसारस्वतमण्डनं रचयति क्ष्मामण्डनं मण्डनः ॥

इतीदं वृत्तं फलात्फलोत्पत्तिपदार्थावगमनं शेषवदनुमानम् कार्यवैशिष्ट्यगम्यत्वात्कारणवैशिष्ट्यस्येत्यवसेयम् । अत्रैतद् ग्रन्थकारेण स्वकीयाभिधानान्वितसङ्करालङ्कृत्युदाहरणमुदितम् । ब्रह्माण्डशुक्तिसम्पुटमौक्तिकमणेरित्यत्र रूपकं, प्रभासमूह इवेत्युत्प्रेक्षा । युक्तोऽयमर्थः । सोमस्य हिमरश्मेः तनूजो बुध एव भवतीति श्लेषालङ्कारः । श्रीबाहड इतिप्रभृति शेषं जातिः, अन्त्यक्रियादीपकं चेत्येषामलङ्काराणां योगे सङ्करालङ्कारः । यदुक्तं—

मिश्रालङ्काराणां[60] तिलतन्दुलवच्च दुग्धजलवद्वा ।
व्यक्ताव्यक्तांशत्वात्सङ्कर उत्पद्यते द्वेधा ॥१॥ [रु. का. १०.२५]

तथा चावादि माघसर्वंकषावृत्तौ—"अत्र वागीशानां मूकीकरणान्मूकानां प्रवाक्करणाच्च शक्यवस्तुकरणरूपो विशेषालङ्कारः, स्वरूपभेदासम्बन्धे सम्बन्धरूपातिशयोक्तिरिति तयोः सङ्करः ॥१४९॥

60. योगवशादेतेषां इति प्रथमादर्शे ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अचमत्कारिता वा स्यादुक्तान्तर्भाव एव च ।
अलङ्क्रियाणामन्यासामनिबन्धे निबन्धनम् ॥१५०॥

अन्यासामपरासामलङ्क्रियाणां अनिबन्धेऽकथने । निबध्नाति निबन्धनं, निमित्तभेदमेतद् द्वितयमाह । चमत्कुर्वन्तीत्येवंशीलाः चमत्कारिण्यः, तासां भावः चमत्कारिता । त्वतलोर्गुणवचनस्य पुंवद्भावो वक्तव्यः, इत्यनेन ङीब्निवृत्तिः । न चमत्कारिता अचमत्कारिता, स्याद्भवेदिति पक्षान्तरे, यद्वा तासां तदन्योन्यं, मिथो यत्रोत्पाद्योत्पादकता भवेदिति लक्षणात् । यथा— रजनीशशिनोर्मिथः शोभाकारित्वात् अन्योन्यालङ्कारः ।

सामान्यं गुणसाम्येन यत्र वस्त्वन्तरैकता ।
तत्सामग्र्यामनुत्पत्तिर्विशेषोक्तिर्निगद्यते ॥ [प्र. रु.-अ. प्र.]

बलिनः प्रतिपक्षस्य प्रतीकारे सुदुष्करे ।
यः तदीयस्तिरस्कारः प्रत्यनीकं तदुच्यते ॥ [प्र. रु.-अ. प्र.]

विषयो विषयी यत्र सादृश्यात्कविसम्मतात् ।
सन्देहगोचरौ स्यातां सन्देहालङ्कृतिश्च सा ॥ [प्र. रु.-अ. प्र.]

सोऽप्यन्ते निश्चयान्तोक्तेर्निश्चयान्तः ।
मीलनं वस्तुना यत्र वस्त्वन्तरनिगूहनम् । [प्र. रु.-अ. प्र.]

इति मीलनालङ्कारः ।
सा समालङ्कृतिर्योगे वस्तुनोर्हेतुरूपयोः । इति । [प्र. रु.-अ. प्र.]

एकत्र वस्तुनो भावान्ननु वस्त्वन्यदापतेत् ।
किमुतन्याय तत्साम्यादर्थापत्तिरलङ्क्रिया ॥ [प्र. रु.-अ. प्र.]

आरोप्यमाणस्य प्रकृतोपयोगित्वे परिणामालङ्कारः इति । [अ. स. १.१६; अ. र. सूत्र २८] यथा—

क्षीरमध्ये क्षिपेन्नीलं क्षीरं चेन्नीलतां व्रजेत् ।
इन्द्रनीलमिदं ख्यातमिति लक्षणसम्भवात् ॥

रूपके त्वपरंजनत्वमात्रमिति भेदः ।

स्वभावोक्तिरसौ चारु यथावद्वस्तुवर्णनम् । [प्र. रु.-अ. प्र.]

**अन्यच्च**

नानावस्थं पदार्थानां रूपं साक्षाद्विवृण्वती ।
स्वभावोक्तिश्च जातिश्च स्वभावाख्यानमीदृशम् ॥इति॥ [का. द. २.८]

उत्तरवाक्यार्थस्य पूर्ववाक्यार्थहेतुत्वेनोपमानिबन्धाद्वाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ।

सति हेतावतद्रूपः स्वीकारः स्यादतद्गुणः । [प्र. रु.-अ. प्र.]

इत्यतद्गुणालङ्कारः ।

तद्गुणः स्वगुणत्यागादन्योत्कृष्टगुणाहृतिः[61] । [का. द. १४१]
तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते । [प्र. रु.-अ. प्र.]

आधाराधेययोरानुरूप्याद्भाविको मतः ।

61. मूले- 'अन्यदीयगुणग्रहः' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यत्रातिप्रबलतया गुणः समानाधिकरणं समानम् ।
अर्थान्तरं विदध्यात् आविर्भूतमपि तत्पिहितम् ॥ [रु. का. ९.५०]

इति पिहितालङ्कारः ।

मन्मथोऽप्यायि तच्छाया सैव कान्तिरिति स्मृता ।
विस्पृष्टे समकालं कारणमन्यत्र कार्यमन्यत्र ।
यस्यामुपलभ्येते विज्ञेयाऽसङ्गतिः सेयम् ॥ [रु. का. ९.४८]

इत्यसङ्गतिरलङ्कारः ।

दोषीभावो यस्मिन् गुणस्य दोषस्य च गुणीभावः ।
अभिधीयते तथाविधः कर्मनिमित्तः स लेशः ॥ [रु. का. ७.१००]

इति लेशालङ्कारः ।

व्याजोक्तिश्छद्मनोद्भिन्नवस्तुरूपनिगूहनम् । [का. प्र. १०.११८]

[इति] व्याजोक्तिरलङ्कारः ।

इङ्गिताकारलक्ष्योऽर्थः सौक्ष्म्यात्सूक्ष्म इति स्मृतः ॥ [का द. २.२६०]

[इति] सूक्ष्मालङ्कारः ।

इत्यादिकानामलङ्कृतीनां सलक्षणानां काव्यप्रकाशदण्डयाद्यलङ्कारशास्त्रमाघसर्वंकषावृत्त्यादिषु भणितानामुक्तान्तर्भाव एवात्रानुक्तानामित्यभ्यूह्यम् । यथा समासोक्तावन्योक्तेरन्तर्भावः । यत एव 'सौन्दर्यमलङ्कार' इति बीजं, अत एव कथिताभ्योऽलङ्कृतिभ्योऽपरासामलङ्क्रियाणामचत्कारिताभावादनिबन्ध एव प्रशस्यतरः ॥१५०॥

**द्वे एव रीती गौडीया वैदर्भी चेति सान्तरे ।**
**एका भूयःसमासा स्यादसमस्तपदापरा ॥१५१॥**

द्वे एव रीती विद्येते गौडीया वैदर्भी चेति । कीदृश्यौ? अन्तरेण विशेषेण सह वर्तमाने सान्तरे भिन्नलक्षणे । तदेव स्पष्टयति । एका गौडीया रीतिः; भूयान् समासो यस्याः सा तथा भूरितरसमासा स्यात् । अपरा द्वितीया वैदर्भीया रीतिः । न समस्तानि समाससहितानि पदानि यस्याः सा असमासा भवेत् । ननु वैदर्भमार्गे सर्वथा समास एव न स्यादिति चेन्न ओजसः समासभूयस्त्वात् तर्हि । ओजसो गुण एव गौडीये मार्गे, इति चेन्न । गौडीये केवलं यथाशक्ति समास एव, वैदर्भे पुनः श्लेषप्रसादयोरपीति ॥१५१॥

एतर्हि गौडीयामुदाहरति—

**दर्पोत्पाटिततुङ्गपर्वतशतग्रावप्रतापाहतिक्रूराक्रन्ददतुच्छकच्छपकुलक्रेङ्कारघोरीकृतः ।**
**विश्वं बर्बरबध्यमानपयसः सिप्रापगाया स्फुरन्नाक्रामत्ययमक्रमेण बहलः कल्लोलकोलाहलः॥१५२**

अपां समूह आपोऽर्णवः, तं गच्छत्यापगा; आपेन वेगेन गच्छतीति वा; सिप्रासंज्ञिका आपगा सिप्रापगा । कल्ल अव्यक्ते शब्दे, कल्यन्ते कल्लन्ते वा; उभे उणादिके कल्लोलाः । कुत्सिता लोला इत्येके । कोलमप्याह-लति त्रासयति कोलाहलः । भूयोभिर्मिलित्वा शब्दे विहिते कोलाहलः । तेषां कोलाहलः कल्लोलकोलाहलः ।[62] ततोऽन्वये तस्याः सिप्रा(प्र)गायाः सिप्रायाः तटिन्याः अयं कल्लोलकोलाहलः तरङ्गकलकलः । अनुक्रमेण युगपद्विशन्ति सर्वेऽस्मिन्निति विश्वम् । 'अशिलटिखटिविशिभ्यः क्व' इति क्वः । जगदाक्रामति । किंलक्षणः कल्लोलकोलाहलः? दर्पेण दर्पः अभिमानः ।

62. तेषां कोलाहलः...कोलाहलः-इदं व. पुस्तके नास्ति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ताम्यत्यनेन तुङ्गम् ; "कमितमीतिडत्" [हे. उ. १०७] तुङ्गः । गृह्यन्ते ग्रावाणः, 'गृहे राचेति वन्'। कृन्तन्ति क्रूराः; 'कृतेः' [हे व्या. ६.३.१९२] क्रूकृछौवेति रः'। तुदन्ति तुच्छाः, 'तुदि मदीति छक्' [हे उ. १२४] न तुच्छाः अतुच्छाः । कच्यते कच्छः, कचेः छः । सिन्धूनां सरसां च प्रान्तभागः तं कच्छ पान्ति कच्छपाः; कच्छेन पिबन्ति इति, कुत्सितं शपन्ति इति वा । कोलन्ति सन्स्त्यायन्ति कुलानि । ततोऽन्वये तैरुत्पाटितं यत्तुङ्गमुन्नतं पर्वतशतं, तस्य ये ग्रावाणः प्रस्तराः, तेषां प्रपतनं प्रपातः तस्या हननमाह-तिराघातः, तेन क्रूराः कर्कशाः, आक्रन्दन्तः आक्रन्दध्वनिं विदधतः, ये अतुच्छाः भूयांसः कच्छपाः कमठाः, तेषां केङ्काराः, तैः आरवविशेषैः घोरीकृतो भैरवीकृतः । पुनः किंलक्षणः ? स्फुरन् स्फुर्जन्, तथा बहुलो निविडतर । कीदृश्याः ? सिप्रागायाः । बर्बरदनुजेन बध्यमानं पयः सलिलं, यस्याः सा तथा तस्याः बर्बरबध्यमानपयसः । दर्पोत्पाटितेतीह गौडीया । विश्वमित्यादौ वैदर्भी च, एतद् वृत्तविधातुः दूषणम् । इदं हि काव्यं मालवराष्ट्रक्षितिपतिना परमाडिसंज्ञकेन सार्कं संग्रामः, यत श्रीजयसिंहदेवस्य मालवसाहाय्यकृद्बर्बरश्चोरणेडायां प्रणीतम् ॥१५२॥

अथ वैदर्भीं दृष्टान्तयति--

**विप्राः प्रकृत्यैव भवन्ति लोलाः लोकोक्तिरेषा न मृषा कदाचित् ।**
**यच्चुम्ब्यमानां मधुपैर्द्विजेशः श्लिष्यत्ययं कैरविणीं कराग्रैः ॥१५३॥**

एषा लोकोक्तिः कदाचित् कस्मिंश्चन काले । मृष्यते मृषादि विपुरीति किदाः, मृषावादो न भवति । विप्राः-विविधं प्रान्ति पूरयन्ति विप्राः, विशेषेण पान्तीति वा । खुरक्षुरेति रे निपात्यते वाडवा, प्रक्रियतेऽनया प्रकृतिः, तया प्रकृत्या स्वरूपेणैवेत्यवधारणे । लोलन्तीति लोलाः, लोल उन्मादने, नाम्युपधात्के, डलयोरेकत्वे तत्सिद्धौ लोलाः विवेकराहित्येन चञ्चला भवन्ति । यद्यस्मात्कारणादसौ द्विजेशो रोहिणीपतिः कैरवाणि विद्यन्ते यस्यां सा कैरविणी, तां कुमुदिनीं कराग्रैर्दीप्तिकोटिभिः श्लिष्यति स्पृशति । कीदृशीं कैरविणीम् ? मधु मकरन्दं मद्यं पिबन्तीति मधुपाः, तैश्चुम्ब्यमानाम् । मधुपाः षट्पदाः । द्विर्जायन्ते द्विजाः, तेषामीशो द्विजेशश्चन्द्रमा ब्राह्मणविभुश्च । अथ मधुपाः मद्यपाः कराग्रैः पाणिकोटिभिः स्पृशन्ति, अतो लोलत्वम् ॥१५३॥

ननु ग्रन्थान्तरेष्वलङ्कृतिभूयस्त्वमर्थविशेषचमत्कारविधायित्वं चावसीयते । अतः कथं इयत्यः एवालङ्क्रियाः इत्याशङ्कापनोदायेदं वक्ति—

**अर्थेन येनातिचमत्करोति प्रायः कवित्वं कृतिनां मनःसु ।**
**अलङ्क्रियात्वेन स एव तस्मिन्नभ्युह्यतां हन्त दिशाऽनयैव ॥१५४॥**

येनार्थेनाभिधेयेन कवित्वं वृत्तं प्रायः प्रकर्षेणायते, प्रायो बाहुल्येन, कृतिनां वागीशानां मनःस्वन्तःकरणेष्वतिचमत्करोति अतीव चमत्कारविधायकं स्यात्, तस्मिन्वृत्ते स एवार्थः । हन्तेति प्रीतौ । अनया, दिशन्ति तामिति दिक्, तया दिशा एतेन मत्प्रणीतेन प्रकारेणालङ्कृतित्वमभ्युह्यतां तर्क्यताम् । एतावता यस्मिन् काव्ये योऽर्थो विस्मयविधाता, स तस्मिन्नलङ्कारत्वेन मन्तव्यः ॥१५४॥

इति श्रीबृहत्खरतरगच्छे भट्टारकप्रभुश्रीजिनराजसूरिविजयिराज्ये
श्रीसागरचन्द्रसूरिसन्ताने पट्टानुक्रमसञ्जातश्रीमद्वाचनाचार्यरत्नधीरगणिप्रवरविनेयवाचनाचार्य
ज्ञानप्रमोदगणिविनिर्मितायां वाग्भटालङ्कारवृत्तौ चतुर्थः परिच्छेदः ॥४॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

# पञ्चमः परिच्छेदः

अथ रसान् प्रकटयिषुर्व्याचष्टे—

साधुपाकेऽप्यनास्वाद्यं भोज्यं निर्लवणं यथा ।
तथैव नीरसं काव्यमिति ब्रूमो रसानिह ॥१॥[1]

यथा भोक्तुमर्हं भोज्यं शाल्यादिकं, पाचनं[2] पाकः; साधुः सुन्दरः, स चासौ पाकश्च, स तथा । तस्मिन्साधुपाकेऽपि विदग्धसूपकारेण निष्पादितेऽपि । निर्गतं लवणान्निर्लवणं, निर्गतं लवणं यस्माद्वा, तादृशं सदनास्वाद्यं आस्वादयितुमनुचितं अस्वादु भवेत् । तथैव तेनैव प्रकारेण, काव्यं वृत्तं अभिज्ञकविना रचितमपि शृङ्गारादिरसाऽपेतमनास्वाद्यम् । विचक्षणान्तःकरणं न चमत्करोति इति हेतोः काव्यकर्तारो मन्त्रीशवाग्भटरूपा ब्रुवन्ति, इह ग्रन्थे वयं रसान् ब्रूमः व्यक्तं भणामः । विश्वत्रयीव्याप्तानां रसानां सव्यासं ग्रन्थपर्यन्तमात्रे कथमवतारं विधापयिष्यति इत्याशङ्कया विपुलधियामवहीलना मा भूयादिति[3] आत्मनो विस्तरसंक्षेपक्षमत्वबोधनाय, वयमिति बहुवचनं अस्मदोर्द्वयोश्चेत्यनेन समानीतम् ॥१॥

विभावैरनुभावैश्च[4] सात्त्विकैर्व्यभिचारिभिः ।
आरोप्यमाण उत्कर्षं स्थायीभावः स्मृतो रसः ॥२॥

नित्यं तिष्ठतीति स्थायी, सामाजिकानां वासनारूपेण तिष्ठतीति वा । भावयत्यश्नुतेऽन्तःकरणं विभावप्रमुखैः व्यक्तीकृत्य रसतां नीतः सन्निति भावः ।

विभावेनाहृतो योऽर्थस्त्वनुभावैश्च गम्यते ।
वागङ्गसत्त्वाभिनयैः स भाव इति संज्ञितः ॥१॥[5]

कवेरन्तर्गतं भावं भावयन्भाव उच्यते ।
बाह्यस्वरूपमालम्ब्य सुखदुःखमयं शुभम् ॥२॥[6]

जायते या मनोऽवस्था स भाव इति संज्ञितः ।
बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रिताः ॥३[7]

---

1. कारिकैषा 'अलङ्कारशेखर' २०, आरम्भे यः श्लोकः तस्य प्रायः समाना ।
2. पचनं-पु.
3 'मा भूदिति'- पु.
4. 'अनुभावैर्विभावैश्च'- पा. कारिकैषा दश. ४.१ इत्यनेन समाना ।
5. ना. शा. ७.२ इत्येष श्लोक अनेन समानः ।
6. ना. शा. ७.३ इत्येष श्लोक अनेन समानः ।
7. ना. शा. ७६ इत्यनेन श्लोक एषः समानः ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

भावा एवातिसम्पन्ना प्रयान्ति रसताममी ।
यथा द्रव्याणि भिन्नानि मधुरादिरसात्मताम् ॥४॥[8] [शृ. ति. १.१६]

सम्भवन्ति यथा वृक्षे पत्रपुष्पफलादयः ।
तद्वद्रसेऽपि रुचिरा विशेषा भावरूपिणः ॥५॥[9] [शृ. ति. १.१७]

प्रायोऽनैकरसं काव्यं किञ्चिदत्रोपलभ्यते ।
बाहुल्येन भवेद्यस्तु स तद्वृत्त्या निगद्यते ॥६ [शृ. ति. १.१८]

कैशिक्यारभटी चैव सात्त्वती भारती तथा ।
चतस्रो वृत्तयो ज्ञेया रसावस्थानसूचकाः ॥७॥[10] [शृ. ति. १.१९]

स च त्रिधा-स्थायी १, सात्त्विको २, व्यभिचारी चेति ३ । तत्र स्थायीभावः प्रतिजीवं नवप्रकारो भवेत् । तानेवाह-रतिः १, उत्साहः २, शोकः ३, हास्यः ४, विस्मयः ५, भयं ६, द्वेषः ७, जुगुप्सा ८, उपशमः ९ । यस्मात्सकलो जन्तुः सातलम्पटो रिरंसते १, आत्महितार्थमुत्सहते २, निजस्फूर्त्यपगमभयेन शोचते ३, हास्यमोहनीयोदयात् हसति ४, स्वकीयापरविहितवैचित्र्यनिरीक्षणाद्विस्मयते ५, भयमोहनीयकर्मोदयाद्बिभेति ६, अन्यस्मै द्वेष्टि ७, अपरं जुगुप्सते ८, वैराग्यवशात् किञ्चित् किञ्चित् परिहर्तुमनाः सन्नुपशमं निषेवते ९, नवभिरेतैरन्तःकरणव्यापारैः रहितः कश्चन कर्हिचन न भवेत् । सिद्धावस्था याः अर्वाक् परं कस्यचित् कश्चिदतिरेकः, कश्चनो न, कश्चनानर्हेऽपि पदार्थे कस्यचित् सार्थकः, कश्चनापरथापि तद्विशेषत एवोत्तममध्यमाधमभावाः जन्तौ भवेयुः । स्थायिव्यभिचारिलक्षणाश्चित्तवृत्तयो-विभाव्यन्ते वैशिष्ट्येनावबुध्यन्ते एभिः विभावाः, वागाद्यभिनयोपेताः । आलम्बनोद्दीपनस्वरूपाः, ललनोद्यानप्रभृतिकाः, कारणभूतास्ते च काव्ये नाट्ये विभावाः प्रोच्यन्ते । तैः सामाजिकलोकः स्थायिव्यभिचारिरूपं चेतोव्यापारविशेषमनुभवन् अनुकूलं भाव्यते एभिरित्यनुभावाः; अनुपश्चात् भावयन्ति[11] प्रकाशयन्तीति कटाक्षभुजाक्षेपाद्याः कार्यात्मकालावबोधकाऽभिनया अनुभावास्तैर्द्वयेऽप्यमेयाः । सीदन्त्य[स्य ?]स्मिन् मन इति सत्त्वम्; मोहरागद्वेषादय एव सांख्यभाषायां सत्त्वरजस्तमांसि उच्यन्ते । तत्र सत्वेनाशयेन निर्वृत्ता इति सात्त्विकाः । सत्त्वमसुरूपं वस्तु, तत्रभवाः वा । ते चाष्टौ यथा—

स्तम्भः १ स्वेदो२ऽथ रोमाञ्चः ३ स्वरभङ्गो ४ऽथ वेपथुः ५ ।
वैवर्ण्यं ६ मश्रु ७ प्रलय ८ इत्यष्टौ सात्त्विकाः स्मृताः ॥ [शृ. ति. १.१५][12]

तैः । निर्वेदः स्वावमाननं १, ग्लानिर्बलहीनता २, शङ्काऽनिष्टसंभावनं ३, असूया सत्स्वपि गुणेषु दोषारोपणं ४, मदः आनन्दसम्मोहयोः सङ्गमः ५, श्रमः प्रयासः ६, आलस्यं कार्ये उपेक्षा ७, दैन्यं कृपणत्वं ८, चिन्ता ध्यानं ९, मोहो मौढ्यं १०, स्मृतिराध्यानं ११, धृतिः स्वास्थ्यं १२, व्रीडाऽन्तःकरणसंकोचः १३, चपलता मनोऽनवस्थितिः १४, हर्षो मानसप्रसादः १५, आवेगः

8. श्लोक एषः ना. शा. ६.४१ इत्यनेन समानः ।

9. श्लोक एषः ना. शा. ६.४२ इत्यनेन समानः ।

10. सूचिकाः-पु.

11. 'रूपं चेतो...भावयन्ति' प्र, इदं पा. पुस्तके नास्ति ।

12. श्लोक एष ना. शा. ७.१४८ इत्यनेन सह प्रायः समानः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

संवेगः १६, जडताविष्टेऽवचेतनत्वं १७, गर्वः चित्तोन्नतिः १८, विषादः चेतोव्यथा १९, औत्सुक्यमुत्कण्ठा २०, निद्रा संलीनेन्द्रियत्वाच्छ्वासहेतुभिः २१, अपस्मारो धातुवैषम्यादेरावेशः २२, सुप्तं सुखसुप्तिका २३, प्रबोधो विगतप्रमीलत्वं २४, अमर्षः प्रतिचिकीर्षारूपः २५, अवहित्थमाकारगुप्तिः २६, उग्रत्वं चण्डत्वं २७, मतिरर्थनिर्णयः २८, व्याधिः व्याधिहेतुत्वाच्चेतोर्त्तिः २९, उन्मादश्चेतोविकृतिः ३०, मरणं म्रियमाणता ३१, त्रासो निर्घातादिभ्योऽन्तःकरणचमत्कारलक्षणः ३२, वितर्कोऽध्याहारः ३३, इमे मानसास्त्रयस्त्रिंशदेव न तदतिरेकास्तेनापरे एष्वेवान्तर्भावनीयाः। यथा कपटमवहित्थे, उद्वेगो निर्वेदे, बुभुक्षापिपासाप्रभृतयो ग्लानौ । अमी निर्वेदादयो विविधमाभिमुख्येन चरन्तीति व्यभिचारिणस्तैः जातुचन नोद्भूता अपि निजहेतुध्वंसे विध्वंस्यन्ते, अवगतपरमार्थस्य च न स्युः । तथा मन्त्रौषधिसमन्वितस्य कस्यापि मानवस्य जननान्तराले ग्लान्यालस्यक्लमप्रभृतयो न जायेरन्नेव । रत्याद्यास्तु विहितात्मीयकरणीयतया प्रलीनप्राया अपि संस्कारशेषतां न जहति । एकपदार्थविषये तद्व्यच्छेदेऽपि पदार्थान्तरविषये सत्त्वात्ततस्ते स्थायिनः । तथा 'अलस एष' इति भणिते, 'कस्मात् कस्मात्' इति हेतुप्रश्नः । तेन ग्लान्यालस्यादीनां व्यभिचारित्वम् । 'राघवः उत्साहशक्तिमान्' इति प्रोदिते 'कस्मात्' इति हेत्वनुयोजनं न भवेत् । अतः उत्साहादीनां स्थायित्वम्। तथा च सति वृत्तताण्डवग्रन्थविख्यातैर्विभावैरनुभावैर्व्यभिचारिभिश्चोत्कर्षं व्यक्ततामारोप्यमाणः प्राप्यमाणो रत्यादिस्थायी, सहृदयैः रस्यमानः शृङ्गारादिरसः भणितः । कोऽर्थः? रसस्य रत्यादिस्थायिनः उपादानकारणानि यथा घटस्य मृत्पिण्डः । ननु समवायिकारणं द्रव्यमेव भवेत्, रत्यादयस्तु गुणाः, तर्हि कथं तेषां समवायिकारणत्वमिति चेन्न । तेषां जन्तुद्रव्येभ्योऽविनाभावित्वेन द्रव्यत्वाच्छृङ्गारे काम्यं वस्तु प्रतियोगि[गी ?] । यथा नरस्य वनिता, वनितायाः नरः । वीरे स्वकीयपक्षविपक्षसत्कं धर्मयुद्धदानत्रिकम् । करुणे परिदेवनीयम् । हास्ये विकृताङ्गवचोवेषगत्यनुचेष्टनादि । अद्भुतेऽपूर्ववद्विस्मयात्मकमायेन्द्रजालादि । भयानके व्याघ्राहिमेघगर्जादि । रौद्रे प्रतिसपत्नादिः । बीभत्से लुठत्कृमिशुनीकलेवरप्रभृतिकम् । शान्ते रागद्वेषविरहोत्थभवासारताप्रमुखम् । इति प्रतियोगिनोऽमीषां दृशास्मरणम् । असमवायिकारणम् यथा घटस्य कपालद्वयसंयोगः । विभावा निमित्तकारणानि; यथा घटस्य दण्डचक्रकुम्भकारचीवरादिमानि अनुभावाः सिद्धकृत्यानि; यथा सिद्धस्य घटस्य तोयधारणमांगल्यविधापनादीनि सात्त्विकव्यभिचारिणः स्वाभाविकाः; यथा घटस्य कम्बुग्रीवादिमद्रूपाकारप्रमुखाः । तथोक्तं स्थायिभावाधिकारे ग्रन्थान्तरे । शृङ्गारादयो नवरसाः काव्ये नाट्ये च रसास्वादकत्वात् । यथा नानाव्यञ्जनसंस्कृतं शालिदाल्याद्यन्नं भुञ्जाना रसानास्वादयन्ति सुमनसः पुरुषाः, सम्मदं च प्राप्नुवन्ति, तथा नानाभिनयव्यञ्जितान् वागङ्गसत्त्वोपेतान् स्थायिभावानास्वादयन्ति सुमनसः इति[13] । यदुक्तवांश्च भरतः । स्थायिभावाः दृष्टीनामुपक्रमे ।

> व्याक्रोशस्नेहमधुरा स्मितपूर्वाभिभाषिणी ।
> अपाङ्गभ्रूकृता दृष्टिः स्निग्धेयं रतिभावजा ॥१॥ इत्यादि ।२।

---

13. यथा... इति-भरत ना. शा.. ६.३३ गद्यं इत्यनेन प्राय: समानमिदम् । भरते यथा- " यथा नानाव्यञ्जनसंस्कृतमन्न भुञ्जाना रसानास्वादयन्ति सुमनस: पुरुषा:, हर्षादिंश्चाधि (?) गच्छन्ति, तथा नानाभिन(य)व्यञ्जितान् (वागङ्गसत्त्वोपेतान् ?) स्थायिभावानास्वादयन्ति सुमनस: पुरुषा इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्थायिनां नव भेदाः, ततो रसस्यापि नव स्युः, अतस्तानुद्दिशति—

**शृङ्गारवीरकरुणहास्याद्भुतभयानकाः ।**
**रौद्रबीभत्सशान्ताश्च नवैते निश्चिता बुधैः ॥३॥**

श्रयत्येनं जनः शृङ्गारः, इतरव्युत्पत्तिस्तु पूर्ववत्। रतिर्नाम प्रमोदात्मको भावस्तदुपचयात्मको मानसविकारविशेषः उत्तमप्रकृतिः शृङ्गारो नाम रसः । तदुक्तं—

पुंसः स्त्रियां स्त्रियः पुंसि संयोगं प्रति या स्पृहा ।
स शृङ्गार इति ख्यातो रतिक्रीडादिकारणम् ॥१॥ [ ]

धर्मार्थकामजत्वेन त्रिविधो हि शृङ्गारः । तत्रायस्तपोव्रतादिविहितः। आत्मविहितः यथा नन्दयन्त्या आगमभोजनप्रभृतिकः । स्वदेशमात्मसात्कर्तुमुदयनस्य पद्मावतीपरिणयोऽर्थशृङ्गारः । तस्यैव वासवदत्तापरिणयः कामशृङ्गारः १ । शूरवीरविक्रान्तौ—वीरयन्ति विक्रामन्ति जनाः अनेनेत्यच् । वीरो दानयुद्धधर्मेषूत्साहकारी वीररसः २ । कं सुखं रुणद्धि, मूलविभुजादित्वात्के धस्य वर्णविकारे णत्वम् । यद्वा किरति विक्षिपति चित्तानीति करुणः । 'ऋकृवृदारिभ्यः उन' इत्युनः [है.उ.१९६] । शोकोपचयात्मकः करुणः ३ । हासे साधुर्हास्य, स एव वा सामाजिकानां चर्वणगोचरं गतो हासोपचयात्मको हास्यः ४ । अद्विस्मितं भवत्यनेनास्मिन्वा मनः इत्यद्भुतः । 'अदो भुवो डुतः' इति डुतः [है.उ.२१४] । विस्मयोपचयात्मकोऽद्भुतः ५ । बिभेत्यस्मादिति भयानकः । भीशीङ्भ्यामानको, भयोपचयात्मको भयानकः, रुद्रस्यायं रौद्रो, रुद्रो देवताऽस्येति वा । उक्तं च—

शृङ्गारो विष्णुदेवः स्यात् हास्यः प्रमथदैवतः ।
करुणो यमदैवस्तु रुद्रो रुद्राधिदैवतः ॥१॥ [ना. शा. ६.४९]

क्रोधोपचयात्मको रौद्रः ७ । बीभत्साऽस्त्यस्मिन् बीभत्सो, जुगुप्सोपचयात्मको बीभत्सः ८ । शम्यते स्म शान्तः, उपशमोपचयात्मकः शान्तरसः । हास्यादयस्तु पुल्लिङ्गाः । गौडस्तु—

शृङ्गारवीरौ बीभत्सं रौद्रं हास्यं भयानकम् ।
करुणा चाद्भुतं शान्तं वात्सल्यं च रसा दश ॥इति । [ ]

लिङ्गनिर्णयमाह स्म—

रसौ शृङ्गारबीभत्सौ तथा वीरभयानकौ ।
रौद्राद्भुतौ तथा हास्यकरुणौ वैरिणौ मिथः ॥ [शृ. ति ३ २१]

अपरे तु—

शृङ्गारानुगतो हास्यः करुणो रौद्रकर्मजः ।
वीरादद्भुत उत्पन्नो बीभत्साच्च भयानकः ॥इति ।[15]

चतुर एव च रसानाहुरित्यर्थमूलटीकामनुसृत्योद्दिश्यते । उत्तममध्यमनीचप्रकृतीनां समस्तानां कामित्वात् प्राक् शृङ्गारस्योद्देशस्तदनु उत्तमप्रकृतौ भूरितरत्वाद्वीरस्य पुरतोऽवशिष्टानां क्रमेण सकलरसावतंसीभूतस्य शान्तस्य प्रान्ते प्रतिष्ठा । प्रथमोदितानामष्टानामुपेक्षायामैहिकपारत्रिकोदयाप्रसक्तौ कन्यचनैवात्रसिततत्त्वस्य भूयस्त्वाः संभवादित्थं चेमे बुधैर्विद्वद्भिः नवसंख्याका एव रसाः, न त्वतिरेकाः, न हीनाः न्यूनाः निर्णीताः ॥३॥

---

14. ना. शा. ६.४९ इत्यनेन प्रायः समान एष श्लोकः । रसरत्नप्रदीपिकायामपि १.२०-२१ द्रष्टव्यौ ।
15. श्लोक एषः ना.शा. ६ ४४ इत्यनेन सह प्रायः समानः । द.रू. ४ ४४-४५ अपि द्रष्टव्यौ ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यथोद्देशं निर्देश इति न्यायेन प्रागुद्दिष्टं शृङ्गारं लक्ष्यति—

जायापत्योर्मिथो रत्यावृत्तिः शृङ्गार उच्यते ।
संयोगो विप्रलम्भश्चेत्येषस्तु द्विविधो मतः ॥४॥

पतिरस्यां प्रविश्य पुनर्जायत इति जाया, पातीति पतिः; जाया च पतिश्च जायापती; तयोर्जाया-पत्योरभिधास्यमानलक्षणयोर्नायिकानायकयोः मिथोऽन्योन्यं रतेः शृङ्गारभावजायाः प्रेमविशेषस्यावृत्तिः भूयोभूयोऽनुशीलनं, स शृङ्गार उच्यते, विचक्षणैरित्यध्याहार्यम् । तु पुनः अवधारणे च । एषः शृङ्गारनामा रसः इति । द्विविधः द्विप्रकारो, मतो भणितः । इतीति किम्? एकः संयुज्येते जायापती अस्मिन्निति संयोगः । अपरः विशेषेण प्रलम्भ्येते वंच्येते जायापती प्रेमफलेनास्मिन्निति विप्रलम्भः ॥४॥

तौ केन प्रकारेण भवेतामिति व्याचष्टे—

तौ तयोर्भवतो वाच्यौ बुधैर्युक्तवियुक्तयोः ।
प्रच्छन्नश्च प्रकाशश्च पुनरेष द्विधा मतः ॥५॥

तौ संयोगविप्रलम्भौ, तयोर्जायापत्योः, युक्तवियुक्तयोः संपृक्तासम्पृक्तयोर्भवतोः सतोः, बुधैरमलधीभिर्निरूपितव्यौ । एष पुनः शृङ्गारः प्राक्प्रणीतद्विप्रकारोऽपि द्विधा द्विविधः, प्रच्छन्न-प्रकाशभेदात् । संयोगः शृङ्गारः प्रच्छन्नः प्रकाशश्च स्यात् । द्वितीयश्चकारः स्वगतानेकभेदसूचकः । तेन विप्रलम्भोऽपि प्रच्छन्नः प्रकाशश्च । प्रच्छन्नो गूढः, प्रकाशः स्पष्टः । एतेषु शृङ्गारप्रकारेषु परस्परस्पृहात्मिका रतिः स्थायी । मिथो वनिता मानवा वा आलम्बनरूपौ विभावौ । यथा—

म्लानं पाण्डु कृशं वियोगविधुरं लम्बालकं सालसं
भूयस्तत्क्षणजातकान्तिसरसं जातं मयि प्रोषिते ।[16]
साटोपं रतिकेलिकालसरसं रम्यं किमप्यादरा-
द्यत्पीतं सुतनोर्मया वदनकं वक्तुं न तत्पार्यते ॥१॥ [अ. श. ७८]

'सुतनोः' इति पदेन शरीरकार्श्याद्वदनं कृशं; 'वियोगविधुरं' इदं विशेषणं विभावकत्वेन सालसं यावत्सम्बध्यते । न हि वैधुर्यमेव केवलं वियोगविभावकं, म्लानत्वादीनामपि तद्विभावकत्वात् । 'भूय' इत्यादिना सुभगस्यालम्बनविभावकता व्यज्यते । तदुपयोगिपवनारामविधुभानूदयास्तसलिलकेल्यादिमाः उद्दीपकलक्षणाश्च विभावाः । यथा—

मेघैर्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्नक्तं भीरुरयं, तदेहि तदिमं राधे गृहं प्रापय ।
इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं राधामाधवयोर्जयन्ति यमुनाकूले रहः केलयः ॥
[गी गो. १.१]

राधामाधवयोरित्यादिभिर्वाक्यस्योद्दीपकविभावताऽवसीयते । प्रकाशसंयोगे प्रकाशसंभोगे यथा—

मदनकुञ्जरकुम्भतटोपमे स्तनयुगे परितः स्फुरिताङ्गुलिम् ।
स्वकरजक्षतवाममपि प्रिया दयितपाणिममन्यत दक्षिणम् ॥३ [शृ.ति. १]

16. शतके तु- 'रभसप्राप्ते मयि प्रोषिते' 'मधुरं प्राप्ते मयि प्रोषिते'- इति वा ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतेन हर्षवितर्कातिरेकत्वं सूचितम् । प्रच्छन्नसंयोगे यथा—

किञ्चिच्चञ्चितकण्ठकन्दलदलत्पीनस्तनावर्तन-
व्यायामाञ्चितकञ्चुकं मृगदृशः तस्यास्तदालोकितम् ।
वाचस्ताश्च विदग्धमुग्धमधुराः स्फारीभवन्मन्मथाः
हंहो मानस किं स्मरस्यभिमताः सिद्ध्यन्ति पुण्यैः क्रियाः ।। [शृ.ति. १]

प्रच्छन्नविप्रलम्भो यथा—

सन्तप्तः स्मरसन्निवेशविवशैः श्वासैर्मुहुः पञ्चमो-
द्गारावर्तिभिरापतद्भिरभितः सिक्तश्च नेत्राम्बुभिः ।
एतस्याः प्रियविप्रयोगविधुरस्त्यक्त्वाधरो रागितां
सम्प्रत्युद्धतवह्निवारिविषमं मन्ये व्रतं सेवते ।।५ [शृ. ति. १]

प्रकाशविप्रलम्भे यथा—

कान्ते विचित्रसुरतक्रमबद्धरागे संकेतकेऽपि मृगशावदृशा रसेन ।
तत्कूजितं किमपि येन तदीयतल्पं नाल्पैः परीतममुशङ्कितपत्रिसंघैः ।।६ [शृ. ति. १]

अनेन विषादाधिक्यं ज्ञापितम् पुनरपि संयोगद्वये स्वेदाश्रुरोमाञ्चश्वसितकेशबन्धांशुकसंयमनभूषा-माल्यादिसम्यग्निवेशचाटुप्रभृतयोऽनुभावा यथा—

यत्र स्वेदलवैरलं विलुलितैः व्यालुप्यते चन्दनं
सच्छेदैर्मणितैश्च यत्र रणितं निह्नूयते नूपुरम् ।
यत्रायान्त्यचिरेण सर्वविषयाः कामं तदेवाग्रतां
सख्यस्तत्सुरतं भणामि धृतयेऽशेषा नु लोकस्थितिः ।।७ [शृ. ति. १]

इह स्वेदलवैश्चन्दनापनयने नितम्बिन्याः सुरतसुखादयोऽनुभावा अवसीयन्ते । वामलोचनस्फुरणादिमया धृत्यादिभावा व्यभिचारिणो यथा—

स्फुरति यदिदमुच्चैः लोचनं तन्वि वामं स्तनतटमभिधत्ते[17] चारुरोमाञ्चमालाम् ।
कलयति च यदन्तः कम्पतेऽनूरुकाण्डं[18] ननु वदति तदद्य प्रेयसा संगमं ते ।।८ [शृ.ति. २]

अत्र 'प्रेयसा संगमं ते' इति वचनेन धृत्याधिक्यम् भूयोऽपि विप्रलम्भद्वितये सन्तापकृशतादीन-वचनजागरविलापलेखलिखनवाचनवार्ताप्रश्नमगोप्यसन्देशाधिका अनुभावाः । जुगुप्साकौसीद्यापेताः, तद्भगने बीभत्सादिरसप्रत्ययो भवेद्यथा—

कार्श्यजागरसन्तापान् यः करोति श्रुतोऽप्यलम् ।
तमेव दुर्लभं कान्तं चेतः कस्मादिदृक्षसे ।।९ [शृ. ति १]

इह कृशतादिको व्यक्तः ।

किं चन्दनैः रचय मा[19] च मृणालशय्यां मा मा ममालि धुनु कोमलतालवृन्तम् ।
मुञ्चाग्रहं विकचपङ्कजयोजनेषु तत्सङ्गमः परमपाकुरुते स्मराग्निम् ।। [शृ ति. २]

17. मूले-'स्तनतटमपि धत्ते' इत्यपि पाठः ।

18. मूले-'कम्पतामूरुकाण्डं' इति ।

19.-'रचयसे नु' 'रचय मुञ्च' इति पाठद्वयम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अत्र रमणसङ्गमन्तरेण प्रज्वलन् सन्तापरूपस्तदवस्थ एव ।

यत्सङ्केतगृहं प्रियेण कथितं सम्प्रेष्य दूतीं स्वयं
तच्छून्यं सुचिरं निषेव्य सुदृशा पश्चाच्च भग्नाशया ।
स्थानोपासनसूचनाय विगलत्सान्द्राञ्जनैरश्रुभिः
भूमावक्षरमालिकेव लिखिता दीर्घं रुदन्त्या शनैः ॥११॥ [शृ. ति. १]

इह विप्रलम्भः प्रकट एव । इत्थं शृङ्गारस्योत्पत्तिप्रकाराश्चत्वारः, तत्रैकैकोऽप्यन्योन्यनिरीक्षणाधरपान-चुम्बनाद्यसंख्यविधः परमेक एव गण्यते । यथा—

किमपि ललितैः स्निग्धैः किञ्चित् किमप्यतिकुञ्चितैः
किमपि वलितैः[20] कन्दर्पेषून् हसद्भिरिवेक्षणैः ।
अभिमतमुखं वीक्षांचक्रे नवाङ्गनया तथा
ललितकुशलोऽप्यालीलोको यथाऽतिविसिष्मिये ॥१२ [शृ. ति. १]

न हि निरनुरागे पुंसि नायिकानां दृष्टयो लज्जामनुभवन्ति । अनुभावैकवेद्याश्चैवंविधा दृष्टयः । तथोक्तं—

सत्रासा इव सालसा इव लसद्गर्वा इवार्धा इव
व्याजिह्मा इव लक्षिता इव परिभ्रान्ता इवार्द्रा इव ।
त्वद्रूपे निपतन्ति कुत्र न जगद्देव प्रभो सुभ्रुवां
वातावर्तननर्तितोत्पलदलद्रोणिद्रुहो दृष्टयः ॥१३ [ ]

तथा—

अधरेऽमृतमस्ति योषितां हृदि हालाहलमेव केवलम् ।
अत एव निपीयतेऽधरो हृदयं मुष्टिभिरेव ताड्यते ॥१४ [ ]

इत्यादयो निरीक्षणाधरपानप्रमुखा दृष्टान्ताः मन्तव्याः ॥५॥

समग्रगुणमय उत्तमो, भूयिष्ठगुणः स्तोकदोषो मध्यमः, भूरिदोषसमन्वितोऽधमः । तत्र प्रच्छन्नसंयोगे उत्तमनायकोऽधिकृत इति तं लक्षयति ।

**रूपसौभाग्यसम्पन्नः कुलीनः कुशलो युवा ।**
**अनुद्धतः सूनृतगीः ख्यातो नेताऽत्र सद्गुणः ॥६॥**

अत्र प्रच्छन्नशृङ्गारविषये रूपमाकृतिसौन्दर्यं, सौभाग्यं सर्वजनवल्लभत्वं, ताभ्यां सम्पन्नस्तत्सम्पदुपेतः । किंभूतः कुलीनः ? श्रेष्ठवंशोद्भूतः । तथा कौशलति, कुशं लुनाति वा कुशलः, कुशाग्रीयमतित्वात् । ग्रन्थप्रणीताङ्गीकृतहावभावबोद्धा, युवावयःस्थः, अनुद्धतोऽविनीतत्वाद्यपेतः । तथा गुणातिगीः । सुष्ठु नृत्यति सतां मनोऽनेनेति सूनृतम् । 'स्थादिभ्यःके घञ्' । उपसर्गस्येति बाहुलकाद्दीर्घ. ।

20. मूले–' चलितैः ' इत्यपि पाठः ।
21. मूले–' यथातिविसिस्मये ' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्रियामा[म]पि सूनृता, तादृशी गीर्यस्य सः सूनृतगीः सत्यवाणीकः सन्तः, वर्तमाना गुणा यस्य सः सद्गुणः । अष्ट च ते यथा—

दाक्ष्यशौर्योत्साहनीचजुगुप्सोत्तमस्पर्धाज्ञापिका शोभा यतः शरीराकाराद्यक्ष्यादिरवसीयते । धीरे गतिदृष्टी यस्मिन्नकस्माच्च क्रोधस्मितवचश्चमत्कारमुखविकूणनं च विलासः २ । भ्रूनेत्रादीनां सुकुमारत्वविधानेन करचरणाङ्गविन्यासो ललितम् ३ । बृहत्यपि सङ्ग्रामप्रयासादौ क्षोभनिमित्ते विद्यमानेऽप्यव्यग्रत्वं माधुर्यम् ४ । प्रत्यूहे विद्यमानेऽप्यभियोगादपरिभ्रंशः स्थैर्यम् ५ । प्रीति-प्रभृतिविकृत्यनुत्पत्तिविधायिगाम्भीर्यं यतो मन्युप्रमुखाणां बहिर्विकारानयनविकासाननानुरागाद्याः नोत्पद्यन्ते ६ । स्वकीयत्वदन्येष्वपि परिज्ञानवितरणालापादिचेष्टा औदार्यं ७ । पराधिक्षेपाद्यमर्षणं तेजः परात्सपत्नान्न तु गुरोः पितृसुहृत्प्रमुखात् ८ । एतादृशो नेता नायकः, ख्यातः प्रणीतः । स च चतुर्विधो यथा—

गुप्तदर्पः स्थिरो वीरः क्षमी चाप्यविकत्थनः ।
बृहत्सत्त्वो दृढव्रतश्च यः स्यात् १ स धीरोदात्तो यथा रामप्रमुखः १ ।

तथोक्तं—

भव्यः क्षमी स्थिररुचिः सुभगोऽभिमानी । स्त्रोणामतः सु[शु ?] भवचा इह नायकः स्यात् ॥
१ कलान्वितः सखीशृङ्गारी मृदुर्निश्चितश्च यः, स धीरललितो यथा वत्सराजादिः ।

तथा चाह—

त्यागी कुलीनः कुशलो रतेषु कल्पः कलावित् तरुणो धनाढ्यः । इति २ [शृ. ति १.२३] ।
यो विनयोपशमी स धीरशान्तः माधवचारुचित्ताढ्यः । ३
मायामात्सर्ययुक् शूरः छद्मवांश्च विकत्थनः ।
स धीरोद्धतो या[जा]मदग्न्यप्रभृतिकः स्मृतः ॥४ [ ]

उक्तं च—

देवा धीरोद्धता ज्ञेयाः स्युर्धीरललिता नृपाः ।
सेनापतिरमात्यश्च धीरोदात्तौ प्रकीर्तितौ ॥१ [भा. प्र. ९.१०]
धीरप्रशान्ता विज्ञेया ब्राह्मणा वणिजस्तथा ।
इति चत्वार एवेह नायकाः समुदाहृताः ॥२ [भा. प्र. ९.१०]

इति चतुःप्रकारोऽप्यौत्तम्यानुलङ्घनेनैक एव मन्तव्यः ॥ ६ ॥

अधुनैतस्य भेदान् व्याचष्टे—

**अयं च विबुधैरुक्तोऽनुकूलो दक्षिणः शठः ।**
**धृष्टश्चेति चतुर्धा स्यान्नायिकाऽस्य चतुर्विधा ॥७॥**

अयमुत्तमनायको विबुधैः सुधीभिरिति, चतुर्विधः उक्तो भणितः । इतीति किम् ? अनुकूलः १, दक्षिणः २, शठः ३, धृष्टः ४ च । अस्य नायकस्य नायिका चतुर्विधा चतुर्भेदा भवेत्, तल्लक्षणानि पुरः प्रदर्शयिष्यन्ते ॥७॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

इतो नायकभेदाँल्लक्षयति—

नीलीरागोऽनुकूलः स्यादनन्यरमणीरतः ।
दक्षिणश्चान्यचित्तोऽपि यः स्यादविकृतः स्त्रियाम् ॥८॥[22]

प्रियं वक्त्यप्रियं तस्याः कुर्वन् यो विकृतः शठः ।
धृष्टो ज्ञातापराधोऽपि न विलक्षोऽवमानितः ॥९॥

नीलीव रागो यस्य, नील्या गुल्या राग इव रागो वा यस्य स तथा । दृढप्रीतिरित्यर्थः । अन्या चासौ रमणी च, अन्येषां रमणी वाऽन्यरमणी, तस्यां रतः आसक्तः, न तथाऽनन्यरमणीरतः, परवनिताऽनासक्तश्च यः स्यात् सोऽनुकूलो नायकः कथ्यते । यथा—

अतिरक्ततया[23]नार्यां सदा त्यक्तपराङ्गनः ।
सीतायां रामवत्सोऽयमनुकूलः स्मृतो यथा ॥१॥ [शृ. ति. १.२५]

वक्त्रस्याधरपल्लवस्य वचसो हासस्य लास्यस्य च
धन्यानामरविन्दसुन्दरदृशां कान्तस्तनोति स्तुतिम् ।
स्वप्नेनापि न गच्छति श्रुतिपथं चेतःपथं दृक्पथं
काऽप्यन्या दयितस्य मे सखि कथं तस्यास्तु भेदग्रहः ॥१ [र. म. ७२]

इह कान्तस्य मुहुः स्तुत्याऽऽनुकूल्यं परवनितानासक्तिश्च व्यज्यते ।१। च पुनः, यः, अन्यस्यां चित्तं यस्य सोऽन्यचित्तोऽपि परनितम्बिनीरक्तचेताः अपि, स्वकीयस्त्रियामविकृतः सामोदः, सः द्वयोरपि दाक्षिण्यस्वाभाव्याद्दक्षिण प्ररूप्यते । यदुक्तं—

यो गौरवं भयं प्रेम दाक्षिण्यं[24] पूर्वयोषिति ।
न मुञ्चत्यन्यचित्तोऽपि ज्ञेयोऽसौ दक्षिणो यथा ॥२ [शृ. ति. १.२६]

सैवास्य प्रणतिस्तदेव वचनं ता एव केलिक्रियाः
भीतिः सैव तदेव नर्ममधुरं पूर्वानुरागोचितम् ।
कान्तस्याप्रियकारिणीव भवती तं वक्ति दोषाविलं
किं स्यादित्थमहर्निशं सखि मनो दोलायते चिन्तया ॥३ [शृ. ति. १]

अत्रापरनायिकाक्षिप्तचित्तत्वेन निजरमणीप्रीतिसत्त्वेन दाक्षिण्यं व्यक्तीकृतम् ।

यस्तस्याः अभ्युपगतनायिकायाः, अप्रियमनिष्टं कुर्वन्, प्रियं चेतोभीष्टं, वक्ति ब्रूते स्वकीयागः-गोपनाय, शठ प्रोच्यते । तदुक्तं—

प्रियं वक्ति पुरोऽन्यत्र विप्रियं कुरुते भृशम् ।
मुक्तापराधचेष्टस्तु कुटिलोऽसौ शठो यथा ॥१॥ [शृ. ति. १.२७]

सरलतरले आवां तावद्बहुश्रुतिशालिनौ पुनरिह युवां सत्यं शिष्टं तदत्र कृतागसि ।
प्रणयिनि पुनर्युक्तं रन्तुं न वेति बतावयोर्ध्रुवमुपगते कर्णौ प्रष्टुं कुरङ्गदृशो दृशौ ॥२॥ [शृ. ति. १]
कृतागसीत्यनेन शठत्वं स्फुटम । ३

22. अ. शे.-२०.८,९. 23. अतिरक्ततया-ला. 24. मूले तु-सद्भावम् इति ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

यो ज्ञातः साक्षात्त्वेनावगतोऽपराधो यस्य सः, ज्ञातापराधोऽपि नितम्बिन्याऽपमानितोऽवज्ञातः सन्नविलक्षो ह्रीमान् स दृष्टो भवेत् । यदुक्तं—

निःशङ्कः कृतदोषोऽपि विलक्षस्तर्जितोऽपि नो ।
मिथ्यावाग् दृष्टदोषोऽपि धृष्टोऽयं कथितो यथा ॥१॥ [शृ ति १.२८]

जल्पन्त्याः परुषं रुषा यदि बलाच्चुम्बत्यसावाननं
गृह्णात्याशु करं करेण बहुशः सन्ताड्यमानोऽपि सन् ।
आलीनां पुरतो दधाति शिरसा पादप्रहारं ततो[25]
नो जाने सखि साम्प्रतं प्रणयिने कुप्यामि तस्मै कथम् ॥२॥ [शृ. ति. १]

यदि बलाच्चुम्बत्यसावाननं इत्यादिवचनेन धाष्टर्यं प्रकटम् ।३।

ग्रन्थान्तरे इमाश्चतस्रोऽप्येकस्य नायकस्यावस्थाः यथा—

सा ते भवतु सुप्रीता यस्याः देव्याः स्तनद्वये ।
अन्योन्यं कलहायन्ते चत्वारो हरिबाहवः ॥१॥ [ ]

इह चतुर्भुजभुजानां कलहेनानुकूलत्वं प्रतीयते, इत्यादि ऊह्यं टीकान्तरतः ॥८-९॥

पूर्वनिर्दिष्टायाः नायिकायाश्चत्वारः प्रकाराः, तानाह ।

**अनूढा च स्वकीया च परकीया पणाङ्गना ।**
**त्रिवर्गिणः स्वकीया स्यादन्याः केवलकामिनः ॥१०॥**[26]

अनूढा कन्या १, स्वकीया २, परकीया ३, पणाङ्गना ४, इति चतस्रो[स्र]विधाः स्युः । तासु त्रिवर्गिणो धर्मकामार्थात्मकवर्गत्रयसाधकस्य पुंसः स्वकीया भवेत् । यथा श्रीरामचन्द्रस्य जनकतनया । प्रमदाः अन्या अपरास्तिस्रः, केवलं कामयत इत्येवं केवलकामी, तस्य केवलकामसुखार्थिनः एव. यथा माधवा[व]नलादीनां कामकन्दलयादयः ॥१०॥

प्रथमां लक्षयति —

**अनुरक्ताऽनुरक्तेन स्वयं वा स्वीकृता भवेत् ।**
**साऽनूढेति यथा राज्ञो दुष्यन्तस्य शकुन्तला ॥११॥**[27]

अनुरक्तेन स्नेहोदीरितेन नायकेनानुरक्ता अनुरक्त्यापन्नायाः स्वयमात्मना देवतागुरुसाक्ष्यं विना स्वीकृता अङ्गीकृता स्यात् , भोक्तुमित्यध्याहार्यम् । सा नितम्बिनी अनूढा प्रणीयते । यथा— दुःखयतीति दुःखं, दुःखनतीति वा, दुष्टानि खान्यत्रेति वा । अत्र सुखेऽपि दुःखवदुपचाराद् खमसुखं यथा स्यात्तथा । तस्य राज्ञो वसुधाधिपस्य[28] शकुन्तलाभिधाना ऋषितनया, तेन किल काननयातेन सा रहःसंपृक्ता (स)स्नेहामत्र निरमायि ॥११॥

---

25. मूले-' पादप्रहारान्ततो ' इति ।
26. अ.शे. २०.२.
27. अ.शे. २०.३.
28. भूपस्य-ला.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयां लक्षयति—

**देवतागुरुसाक्ष्येण स्वीकृता स्वीयनायिका ।[29]**
**क्षमावत्यतिगम्भीरप्रकृतिः सच्चरित्रभृत् ॥१२॥**

या देवतागुरुसाक्ष्येण देवा एव देवताः, साऽस्य देवतेति ज्ञापकात् स्वार्थे तप्रत्ययः । गृणन्ति हिताहितप्राप्तिपरिहारावुपदिशन्तीति गुरवः । ततो देवताश्च गुरवश्च देवतागुरवः, तेषां साक्ष्यं, तेन उत्तमप्रकृतिनायकेन स्वीकृता, करे पीडिता, सा स्वीयनायिका स्वामिन्येवानुरक्ता स्वकीया भवेत् । कीदृशी ? क्षमावती । शुश्रूषाशीलसंरक्षणमार्जवं विद्यतेऽस्याः सा क्षमावती । अतिगम्भीरा प्रकृतिः स्वभावो यस्याः सा । तथा सच्चरित्रं च रत्नं बिभर्तीति तथा । पतिव्रतानां प्राणेश्वरचित्तानुवृत्तधर्मत्वादिति भावः । इयं वयःकौशलाभ्यां मुग्धा १, मध्या २, प्रौढा ३ चेति त्रिविधा । तत्राद्यायाः कोपप्रभृतिकाश्चेष्टा न भवेयुर्मुग्धत्वात् । उदय[दित ?] यौवना मुग्धा लज्जाविदितमन्मथेति लक्षणात् । सुरतेतरकाले स्त्रीणां ह्रीरेव भूषणमिति वचनात् । मुग्धा यथा—

हस्ते धृताऽपि शयने विनिवेशिताऽपि क्रोडे कृताऽपि यतते बहिरेव गन्तुम् ।
जानीमहे नववधूरथ तस्य वश्या यः पारदं[30] स्थिरयितुं क्षमते करेण ॥१॥ [र. म. ७]

दरमुकुलितनेत्रपालि नीवी नियमितबाहुकृतोरुयुग्मबन्धम् ।
करकलितकुचस्थलं नवोढा स्वपिति समीपमुपेत्य कस्य यूनः ॥२॥ [र. म. ८]

लज्जामन्मथमध्यस्था मध्यमोदितयौवना । मध्या यथा । सागसि प्रेयसि धैर्ये वक्रोक्तिः, अधैर्ये परुषवाक् । मध्या यथा—

स्वापे प्रियाननविलोकनहानिरेव स्वापच्युते[31] प्रियकरग्रहणप्रसङ्गः ।
इत्थं सरोरुहमुखी परिचिन्तयन्ती स्वापं विधातुमपि हातुमपि प्रपेदे ॥३ [र म ९]

स्मरमन्दीकृतव्रीडा प्रौढा सम्पूर्णयौवना पतिमात्रविषयकेलिकलापकोविदा प्रौढा प्रगल्भेत्युच्यते । अस्यास्तु रतिप्रीतिः आनन्दात्सम्मोहः । प्रथमं यथा—

संस्पृश्य स्तनमाकलय्य वदनं संलिख्य गण्डस्थलीम्[32]
निष्पीड्याधरबिम्बमम्बरमपाकृष्य व्युदस्यालकम् ।
देवस्याम्बुजिनीपतेः समुदयं जिज्ञासमाने प्रिये
वामाक्षी वसताञ्चलैः श्रवणयोर्नीलोत्पलं निह्नुते ॥४॥ [र. म. १०]

द्वितीयं यथा—

नखक्षतमुरःस्थलेऽधरदले रदस्य व्रणं च्युता बकुलमालिका विगलिता (च) मुक्तावलिः ।
रतान्तसमये मया सकलमेतदालोकितं स्मृतिः क्व च रतिः क्व च(क्व च) तवालि शिक्षाविधिः ॥५
[र. म. ११]

मध्या प्रौढे मानावस्थितौ[33]प्रत्येकं त्रिप्रकारे धीराधीराधीराधीरा चेति । मध्यादिप्रकारे धीरादिभेदः स्वकीयाया एव न परकीयायाः ।[34] व्यंग्यकोपप्रकाशायाः मध्यायाः धीरायाः उत्प्रासवक्रोक्ति गी-

29. प्रथमं पादद्वयं-अ.शे. २०.४.
30. मूले-' पारतं ' इति ।
31. मूले-' स्वापच्युतौ ' इति ।
32. मूले-' संश्लिष्य कण्ठस्थलं ' इति ।
33. इदं ब. पुस्तके नास्ति ।
34. ' स्वकीयायामेव न परकीयायाम् '-पा.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

र्व्यत्रिजके भवेताम् । अधीरायाः वाक्पारुष्यं धीराधीरायाश्च वचनरुदिते कोपप्रसादके । प्रौढायास्तु धीराया रतौ[तावौ ?]दास्यं, अधीरायास्तु तर्जनताडनादि, धीराधीरायाः रतो[तावौ ?]दास्यं तर्जनताडनादिकोपस्य प्रकाशकम् । मध्या धीरा यथा—

कोऽयं द्वारि ? हरिः, प्रयातु विपिनं, शाखामृगस्यात्र किं,
कृष्णोऽहं दयिते ! बिभेमि सुतरां कृष्णः पुनर्वानरः ।
मुग्धेऽहं मधुसूदनः, पिब लतां तामेव पुष्पोत्कटा-
मित्थं निर्वचनीकृतो दयितयाऽस्फीतो हरिः पातु वः ॥१ [सुभाषितावलिः १०४] अ.शे. पृ २७

तथा—

लोलालिपुञ्जे व्रजतो निकुञ्जे स्फारीबभूवुः[35] श्रमवारिभाराः ।
देहे समीहे भवतोऽभिधातुं[36] धीरं समीरं नलिनीदलेन ॥६ [र. म. १२]

मध्याऽधीरायाश्च यथा—

जातस्ते निशि जागरो, मम पुनर्नेत्राम्बुजे शोणिमा
निष्पीतं भवता मधु प्रवितत व्याघूर्णितं मे मनः ।
भ्राम्यद्भृङ्गघने निकुञ्जभवने लब्धं त्वया श्रीफलं
पञ्चेषुः पुनरेष मां हुतवहः क्रूरैः शरैः कृन्तति ॥७ [र. म. १३]

मध्या धीराधीरा यथा—

कान्तानुराग चतुरोऽसि मनोहरोऽसि नाथोऽसि किञ्च नवयौवनभूषितोऽसि ।
इत्थं निगद्य सुदृशा वदने प्रियस्य निःश्वस्य बाष्पलुलिता निहिता दृगन्ताः ॥८ [र. म. १४]

अत्रास्याः सबाष्पत्वं दर्शितम् । प्रौढा त्रिविधा । तत्र प्रौढाधीरा यथा—

नो तल्पं भजसे न जल्पसि सुधाधाराऽनुकारा गिरो
दृक्पातं[37] कुरुषे न वा परिजने क्रोधप्रकाशच्छलात् ।
इत्थं केतकगर्भगौरि दयिते कोपस्य संगोपनं
तस्यादेव न चेत्पुनः सहचरी कुर्वीत साचिस्मितम् ॥९ [र. म. १५]

अत्र 'नो तल्पं भजसे' इत्यनेनोद्भूतकोपाया अपि, धीरत्वेन कोपाकृतिं गोपयित्वा 'सुधाधारानुकारा गिर' इत्याद्युपचाराः । प्रौढा अधीरा यथा—

प्रतिफलमवलोक्य साऽयमिन्दोः[38] कलायां हरशिरसि परस्यावासमाशङ्कमाना ।
गिरिशमचलकन्या तर्जयामास कम्पत्प्रचलवलयवलगत्कान्तिभारं[39] करेण ॥१० [र म. १६]

अत्राधीरतया संतर्जनाघातौ स्पष्टौ प्रौढायाः धीराधीरायाः । आनुकूल्यौदासीन्ये यथा—

तल्पोपान्तमुपेयुषि प्रियतमे वक्रीकृतग्रीवया
काकुव्याकुलवाचि साचिहसितस्फूर्जत्कपोलश्रिया ।
हस्तन्यस्तकरे पुनर्मृगदृशा लाक्षारसक्षालित-
प्रौष्ठीपृष्ठमयूखमांसलरुचो विस्फारिताः दृष्टयः ॥११॥ [र. म. १७]

---

35. मूले–'स्फारा बभूवुः' इति ।
36. मूले–'भवतो विधातु' इति ।
37. मूले–'दृक्पातं' इति ।
38. मूले–'स्वीयमिन्दोः' इति ।
39. मूले–'कान्तिभाजा' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

एते धीराधीरादिषड्भेदाः द्विविधाः ज्येष्ठाः कनिष्ठाश्च । परिणीतत्वे सति भर्तुरधिकस्नेहा ज्येष्ठा, परिणीतत्वे सति भर्तुः न्यूनस्नेहा कनिष्ठा । धीरा ज्येष्ठा कनिष्ठा यथा—

एकस्मिन् शयने सरोरुहदृशोर्विज्ञाय निद्रां तयो-
रेकां पल्लवितावगुण्ठनपटामुत्कन्धरो दृष्टवान् ।
अन्यस्याः सविधं समेत्य निभृतव्यालोलहस्ताङ्गुलि-
व्यापारैर्वसनाञ्चलं चपलयन् स्वापच्युतिं क्लृप्तवान् ॥ [र. म. १८]

अधीरा ज्येष्ठाकनिष्ठा यथा—

अन्तःकोपकषायिते प्रियतमे पश्यन् घने कानने
पुष्पस्यावचयाय नम्रवदनामेकां समायोजयन् ।
अर्धोन्मीलितलोचनाञ्चलचमत्काराभिरामाननां
स्मेराधाधरपल्लवां नववधूमन्यां समालिङ्गति ॥१३ [र. म. १९]

धीराधीरा ज्येष्ठाकनिष्ठा यथा—

धैर्याधैर्यपरिग्रहग्रहिलयो रेणीदृशोः प्रीतये
रत्नद्वन्द्वमनन्तकान्तिरुचिरं मुष्टिद्वये न्यस्तवान् ।
एकस्याः कलयन् करे प्रथमतो रत्नं परस्याः प्रियो
हस्ताहस्तिमिषात् स्पृशन् कुचतटीमानन्दमाविन्दति ॥१४ [र. म. २०]

एताः द्वादश मुग्धयान्विताः त्रयोदशतद्विधाः । स्वकीया अनूढा कन्या १, परोढा परकीया २, पणाङ्गना वेश्या ३ । एतत्त्रयेण मिलिताः षोडषाऽप्यष्टाभिः - प्रोषितभर्तृका १, खण्डिता २, कलहान्तरेता ३, विप्रलब्धा ४, उत्का ५, वासकसज्जा ६, स्वाधीनपतिका ७, अभिसारिका च इतोदृशाभिधानाभिरवस्थाभिर्गुणिताः अष्टाविंशत्यधिकशतसंख्याकाः भेदाः भवन्ति । तत्रापि च—
दोषानुरूपकोपायाऽनुनीतासु प्रसीदति । रज्यते च भृशं नाथे गुणहार्योत्तमेति सा ॥१५ [शृ. ति. १.७५]

दोषे[40] स्वल्पेऽपि या कोपं धत्ते कष्टेन मुञ्चति ।
प्रयाति कारणाद्रागं मध्यमा सा मता यथा ॥१६ [शृ. ति. १.९०]

या कुप्यति विना दोषैः स्निह्यत्यनुनयं विना ।
निर्हेतुकप्रवृत्तिश्च चलचित्तेति साऽधमा ॥१७ [शृ. ति. १.९१]

इत्येवंविधलक्षणलक्षितोत्तमामध्यमाधमात्मकत्रिकगुणनाच्चतुरशीत्युत्तरत्रिशतीविधाः भवेयुः ३८४। इत्येतदर्थाधिकारस्तु शृङ्गारतिलके रसमञ्जर्यां च सविस्तरं व्याख्यातोऽस्तीति ततोऽवसेयः । एतद्वृत्तौ जिनवर्धन्यां तु त्रयोदशप्रकाराऽपि नायिकाः स्वकीयात्वेनैकैव गणिताः । तस्याश्च विंशतिरलङ्काराः । तथा - लीला शृङ्गारचेष्टाविशेषो, वाग्वेषचेष्टितः प्रियस्यानुकृतिर्वा १ । विलासः प्रियसमीपगमने यः स्थानासनविलोकनेषु विकारः, अकस्माच्च क्रोधस्मितचमत्कार-मुखविकूणनं २ । विच्छित्तिः आभरणविलेपनादीनां कुतश्चित्प्रियापराधाद्दीर्घकालानादरेण

40. मूले-'दोषं' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सखीनां यत्नाद्वारणं च ३ । अभिमतवस्तूनामुपप्लुतावपि गर्वादनादरः सापराधस्य च स्रक्चन्दनादिना संयमनं ताडनं बिब्बोक ४। सौभाग्यगर्वात् स्मितादीनां सांकर्यं किलकिञ्चितम् ५। प्रियकथासु स्वाङ्गविजृम्भणं कर्णकण्डूयनं मोट्टायितं ६ । सुरतसमये गाढपीडने कुचकचाधराद्यादाने-ऽमातेऽपि संमद । तदुक्तं "केशाधरादिग्रहणे मोद्यमानस्य मानसे दुःखिते च बहिः कुप्येद्यत्र कुट्टमितं हि तत्" कुट्टमितं ७ । मसृणाङ्गविन्यासो ललितम् ८ । भाषणावसरेऽपि व्याजविषादजल्पनं विहृतम् ९ । मदरागहर्षजनितो विपर्यासो विभ्रमः १० । इत्येते दश स्वाभाविकाः ।

कामकलादिप्रयोगे निःसाध्वसत्वं प्रागल्भ्यं १ । अमर्षेर्ष्याद्यवस्थास्वपि प्रश्रयः औदार्यं २ । क्रोधादिष्वपि वचनादिकोमलत्वं माधुर्यं ३ । रूपयौवनलावण्यैः पुंभोगाद्यभिवर्धितैः मन्दा मध्या तीव्रा तनुच्छायापरिपाट्या शोभा ४ । कान्तिः ५ सैव । तीव्रा दीप्तिः ६ । अचापल्याविकत्थनत्वे धीरत्वं ७ । इत्यमी सप्तायत्नजाः ।

दावहावहेलाः । भ्रूतारिकादीनां भूयान् विकारो हावः १ । अङ्गस्याल्पो विकारः स्वचित्त-वृत्तिभावः २ । ततोभूयिष्ठो विकारो हेला ३ । इत्येवंलक्षणास्त्रयोऽङ्गजाः ।

अलङ्कारा इत्थमेते विंशतिसङ्ख्याका अप्युत्तमनायिकाया एव भवेयुः, अपरासु रूपकान्ति-मतीष्वप्यभावात् । एते शैशवे[ऽ?]स्फुटिताः, यौवने उद्रिक्ताः निरीक्ष्यन्ते, स्थाविरेऽन्तर्हिताः । नरस्यापि इमे स्युः, तथापि प्रमदानामेवैतेऽलङ्कारा इति तन्निष्ठत्वेनेष्यन्ते । पुरुषेषूत्साह एव निखिलोत्तमोऽलङ्कारः ॥१२॥

परकीयां लक्षयति—

**परकीयाऽप्यनूढैव वाच्यभेदोऽस्ति चानयोः ।**
**स्वयमप्यतिकामैका सख्यैवैका प्रियं वदेत् ॥१३॥**

परकीया परनितम्बिन्यपि अनूढैव[41] प्रागुदिताऽपरिणीतकन्यैव भवेत् । परमनयोरनूढा-परिणीतकन्ययोर्वाच्यभेदो भणितव्यविशेषो वर्तते । यथा—

अनूढाऽपरिणीतेत्र कन्या परकीयाऽपि परिणयनादनन्तरमेव सधवा १, विधवा वाऽविधवाऽपि केनचिदभ्युपगता २, तदन्या ३ चेति त्रिविधाऽपि परकीया द्विभेदा । तस्याः सङ्घटनोपायमाचष्टे । स्वयं आत्मना, एका काचन अत्याधिक्येन कामः कन्दर्पो यस्याः साऽतिकामा मन्मथोन्मत्ता सती, स्वयं स्वेन, प्रियं चेतः आकूतं वदेद् बोधयेत् नायकाय । यथा—

"गोष्ठेषु तिष्ठति पतिः बधिरा ननान्दा नेत्रद्वयस्य न च पाटवमस्ति यातुः ।"
इत्थं निशम्य तरुणी कुचकुम्भसीम्नि रोमाञ्चकञ्चुकमुदञ्चितमाततान ॥१ [र म १०]

इतरा एका सख्या सखीवक्त्रेणाभीप्सितं व्यक्तीकुर्वीत । यथा—
अन्ने अरुई अरइ जुगवंजायाइं सा भणिइमहं ।
दोस तु सुदय सुन्दर एहि तुम्हं तच्छपडियरिउं ॥२[ ]

41. 'परकीया...अनूढैव' इदं पा. पुस्तके नास्ति ।
ततु अ.शे. २०.४ तृतीय चरणम् ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्वीयपरकीयनार्योरष्टावस्था भवेयुः । यदाह—

कुतश्चित्कारणाद्यस्याः पतिर्देशान्तरं गतः ।
दत्त्वावधिं भृशार्ता सा प्रोषितप्रेयसी यथा ॥ [शृ. म. १.८१]

उत्क्षिप्यालकमालिकां विलुलितामापाण्डुगण्डस्थला-
द्विश्लिष्यद्वलयप्रपातभयतः प्रोद्यम्य किञ्चित्करौ ।
द्वारस्तम्भनिषण्णगात्रलतिका केनापि पुण्यात्मना
मार्गालोकनदत्तवृत्तिरबला तत्कालमालिङ्गिता[42] ॥२ [शृ. ति. १]

कुतश्चिन्नागतो यस्याः उचिते वासके प्रियः ।
तदनागमसन्तप्ता खण्डिता सा मता यथा ॥३ [शृ. ति. ७९]

सोत्कण्ठं रुदितं सकम्पमसकृद्यातं सबाष्पं चिरं
चक्षुर्दिक्षु निवेशितं सकरुणं सख्याः समं जल्पितम् ।
नागच्छत्युचितेऽपि वासकविधौ कान्ते समुद्विग्नया
तत्तत्किञ्चिदनुष्ठितं मृगदृशा नो यत्र वाचां गतिः ॥४ [शृ. ति. १

निरस्तो मन्युना कान्तो नमन्नपि यया पुनः ।
दुःस्थिता तं विना साऽभिसन्धिता[43] कथिता यथा ॥५ [शृ. ति. ७७

यत्पादप्रणतः प्रियः परुषया वाचा स निर्वासितो
यत्सख्या न कृतं वचः जडतया यन्मन्युरेको धृतः ।
पापस्यास्य फलं तदेतदधुना यच्चन्दनेन्दुद्युति-
प्रालेयाम्बुसमीरपङ्कजबिसैर्गात्रं मुहुर्दह्यते ॥६ [शृ. ति. १]

प्रेष्य दूतीं स्वयं दत्त्वा सङ्केतं नागतः प्रियः ।
यस्यास्तेन विना दुःस्था विप्रलब्धा च सा यथा ॥७ [शृ. ति. ७८]

यत्सङ्केतगृहं प्रियेण कथितं सम्प्रेष्य दूतीं स्वयं
तच्छून्यं सुचिरं निषेव्य सुदृशा पश्चाच्च भग्नाशया ।
स्थानोपासनसूचनाय विगलत्सान्द्राञ्जनैरश्रुभिः
भूमावक्षरमालिकेव लिखिता दीर्घं रुदन्त्या शनैः ॥८ [शृ. ति. १]

उत्का भवति सा यस्याः वासके[43] नागतः प्रियः ।
तस्यानागमने हेतुं चिन्तयत्याकुला यथा ॥९ [शृ. ति. १७५]

किं रुद्धः प्रियया कयाचिदथवा सख्या ममो[44]द्वेजितः
किं वा कारणगौरवं किमपि यन्नाद्यागतो वल्लभः ।
इत्यालोच्य मृगीदृशा करतले संस्थाप्य वक्त्राम्बुजं
दीर्घं निश्वसितं चिरं च रुदितं क्षिप्ताश्च पुष्पस्रजः ॥ १० [शृ. ति. १]

---

42. मूले-'आलिङ्ग्यते' इति । 43. मूले-'सातिसन्धिता' इति । मूले-'अभिमता' इत्यपि पाठः ।
43. मूले-'संकेतं' इति । 44. मूले-'तयो' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

भवेद्वासकसञ्ज्ञाऽसौ सज्जिताङ्गरतालया ।
निश्चित्यागमनं भर्तुः द्वारेक्षणपरा यथा ॥११ [शृ. ति. १.७६]

दृष्ट्वा दर्पणमण्डले निजवपुर्भूषां मनोहारिणीं
दीपार्चिःकपिशं च मोहनगृहं त्रस्यत्कुरङ्गीदृशा ।
एवं नो सुरतं भविष्यति चिरादद्येति सानन्दया
कामं कान्तदिदृक्षयाऽतिलुलिता द्वारे दृगारोपिता ॥ [शृ. ति. १]

यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति ।
विचित्रविभ्रमासक्ता सा स्वाधीनपतिर्यथा[45]॥१३ [शृ. ति. १.७४]

लिखति कुचयोः पत्रं कण्ठे नियोजयति स्रजं
तिलकमलिके कुर्वन् गात्रा[46]दुदस्यति कुन्तलान् ।
इति चटुशतैर्वारंवारं वपुः परितः स्पृशन्
विरहविधुरो नास्याः पार्श्वं विमुञ्चति वल्लभः ॥१४ [शृ. ति. १]

या निर्लज्जीकृता बाढं मदनेन मदेन च ।
अभियाति प्रियं साऽभिसारिकेति मता यथा ॥१५॥ [शृ. ति. १.८०]

नो भीतं तडितो दृशा जलमुचां तद्दर्शनाकाङ्क्षया
नो गर्जिर्गणिता भृशं श्रुतिसुखं तद्वाचि संचिन्त्य च ।
धारापातसमुद्भवा न च मता पीडा तदालिङ्गनं
वाञ्छन्त्या दयिताऽभिसारणविधौ तन्व्या परं तत्वरे[47]॥१६ [शृ. ति. १] इति ॥१४॥

पणाङ्गनास्वभावमातनुते—

**सामान्यवनिता वेश्या भवेत्कपटपण्डिता ।**
**न हि कश्चित्प्रियस्तस्याः दातारं नायकं विना ॥१४॥[48]**

गुणवदगुणयोः साधारणत्वाद्वित्तमात्रोपधिकसकलपुरुषाभिलाषा सामान्यवनिता । विशन्त्यस्मिन्नयनमनांसीति विशेषो दारिकाणां निवासः स्थानं वेशो वेश्या गृहेऽपि चेति तालव्यमः तेषु रभसः, तत्र । वेशे वाटे भवा वेश्या; 'दिगादित्वाद्य' [हे. व्या. ६.३.१२४] । वेशेन शोभते इत्येके । कामलेखा भवेत् । किंभूता ? कपटपण्डिता । कम्पयत्येन कपटम् । कपटकीकटादय इति साधुः । के मूर्ध्नि पटमिवाच्छादकमिति वा । पण्डा जाताऽस्याः, सा पण्डिता । ततस्तत्र पण्डिता कपटपण्डिता कैतवदक्षा । केवलद्रविणलब्धालम्बनेन कृत्रिमप्रणयत्वात् । यथा—

मनस्यन्यद्वचस्यन्यत् क्रियायामन्यदेव हि ।
यासां साधारणस्त्रीणां ताः कथं सुखहेतवः ॥ [हे.यो.शा. २.८८]

अन्यच्च—

मांसमिश्रं सुरामिश्रमनेकविटचुम्बितम् ।
को वेश्यावदनं चुम्बेदुच्छिष्टमिव भोजनम् ॥२ [हे. यो. शा. २.८९]

45. मूले-'स्वाधीनपतिका' इति । 46. मूले-'गण्डा' इति ।
47. मूले. 'तत्परे' इति । 48. अ. शे. २०.१

Jain Education International For Private & Personal Use Only www.jainelibrary.org

कस्मात्कृत्रिमप्रणयत्वमित्याचष्टे— हि यस्मात् कारणात्तस्याः दातारं वित्तदायकं विना । तमपहायान्यः कश्चन न प्रियो नाभिमतो, यथा—

कुष्ठिनोऽपि स्मरसमान् पश्यन्ती धनकाङ्क्षया ।
तन्वन्ती कृत्रिमस्नेहं निःस्नेहां गणिकां त्यजेत् ॥३ [हे. यो. शा. २.९२]

चोलं नीलनिचोलकर्षणविधौ चूडामणिं चुम्बने
याचिष्ये कुचयोः करार्पणविधौ काञ्चीं पुनः काञ्चनीम् ।
इत्थं चन्दनचर्चितैर्मृगमदैरङ्गानि संस्कुर्वती
तत्किं यन्न मनोरथं वितनुते वारेषु वाराङ्गना ॥४॥१४॥ [र. म. ६९]

प्रच्छन्नप्रकाशयोर्विभागमभिधित्सुर्ब्रूते—

**सर्वप्रकाशमेवैषा याति नायकमुद्धता ।**
**वाच्यः प्रच्छन्न एवान्यः स्त्रीणां प्रियसमागमः ॥१५॥**

एषा गणिका, सर्वप्रकाशमेवेति निश्चितं सकलस्फुटं, नायकं याति नायकं प्रति सर्वप्रकाशं यानं गमनं करोतीत्यर्थः । सर्वप्रकाशमित्यादौ क्रियाऽव्ययानां भेदकानि एकत्वेऽपि । क्रियाणामव्ययानां च भेदकानि विशेषणानि क्लीबे स्युः एकत्वेऽपि । तद्यथा—मृदु पचन्ति, शोभनं पचन्ति । बहुवचनेऽपि क्रियाशब्दतद्विशेषणस्यैकत्वमेव । क्रियाविशेषणानां कर्मत्वात् कर्मणि द्वितीया । सर्वो हि धात्वर्थः करोत्यर्थेन व्याप्तः; मृदु पचन्ति मृदु पचनं कुर्वन्तीत्यर्थः । तेन मृद्वादीनां, तद्धितविशेषणानां च कर्मत्वम् । तद्वदिहाप्यवसेयम् । अपरः पुनराचष्टे— सर्वे धात्वर्थाश्च भवत्यर्थानुगताः भवन्ति, क्रियाकर्तृत्वमनुभवन्तीत्यर्थः । पचति देवदत्तः इति देवदत्तप्रयुक्तः पाको भवति; गच्छति गमनं भवति; पठति पाठो भवति । तन्मते प्रथमाः मृदु पचनं यथा भवति तथा पचन्तीत्यर्थः । तद्वदत्रापि सर्वप्रकाशं निखिलव्यक्तं, यानं यथा भवति तथैव नायकं यातीत्यर्थः । कीदृशी गणिका? उद्धता उच्छृंखला । यद्वा उद्धता नरास्तां भजन्ते । अन्यस्त्रीणां अपरवनितानां तिसृणां प्रियसमागमः प्रच्छन्नः गुप्त एव वक्तव्यः । नायिकायाः असूयाकारणं सपत्नी प्रतिनायिका ॥१५॥

इदानीं वियोगप्रकारान् व्यनक्ति—

**पूर्वानुरागमानात्मप्रवासकरुणात्मकः ।**
**विप्रलम्भश्चतुर्धा स्यात्पूर्वः पूर्वो ऽयं गुरुः ॥१६॥**[49]

पृणाति पूर्वः, पूर्वति व्याप्नोति वा । अनुरञ्जनमनुरागः; तदनु स चासावनुरागश्च पूर्वानुरागः ततो द्वन्द्वः । पूर्वानुरागश्च मानात्मा च प्रवासश्च करुणश्च, तथा ते आत्मा यस्य सः पूर्वानुरागमानात्मप्रवासकरुणात्मकः । पूर्वानुरागः १, मानात्मा २, प्रवासः ३, करुणात्मकः ४ इति विप्रलम्भः वियोगश्चतुर्विधो भवेत् । अयं पूर्वः १, प्रथमः २, गुरुर्निबिडः कः ? परमार्थस्तु तार्तीयीकः तार्तीयकाद्द्वितीयो द्वितीयादाद्यो दुःसहः इति ॥१६॥

49. कारिकेषा अ. शे. २०.११ इत्यनेन प्रायः समाना ।



Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रथमं भेदं लक्षयति—

स्त्रीपुंसयोर्नवालोकादेवोल्लसितरागयोः ।
ज्ञेयः पूर्वानुरागोऽयमपूर्णस्पृहयोर्दश ॥१७॥[50]

नितम्बिनीपुरुषयोः नूतनावलोकनादेवेत्यवश्यंभावे विकसितस्नेहयो र्या अपूर्णा स्पृहा ययो तौ, तयोः अविच्छिन्नसुरताभिकाङ्क्षयोः दशावस्थाद्यं पूर्वानुरागाभिधानो विप्रलम्भो ज्ञेयो, यथा—

विरम नाथ विमुञ्च ममाञ्चलम् शमय दीपमिमं समया सखी ।
इति नवोढवधूवचसा युवा मुदमगादधिकं सुरतादपि ॥१ [शृ. ति. १]

मध्ये न कृशिमा स्तने न गरिमा देहे न वा कान्तिमा
श्रोणौ न प्रथिमा गतौ न जडिमा नेत्रे न वा वक्रिमा ।
लास्ये न द्रढिमा न वाचि पटिमा हास्ये न वा स्फीतिमा
प्राणेशस्य तथापि मज्जति मनो मय्येव, किं कारणम् ॥२ [र. म. ७०]

इहैताभ्यां वृत्ताभ्यां क्रमेण 'शमय दीप' मित्यादिना 'मनोमय्येव' इत्यनेन च प्रियतमस्य प्रियायाश्च पूर्वानुरागो ज्ञापितः ।

भ्रातर्निकुञ्ज सखि यूथि रसालबन्धो मातस्तमस्विनि पितस्तिमिर प्रसीद ।
पृच्छामि किञ्चिदिति नीरधराभिरामो दामोदरः कथय किन्न समाजगाम ॥३ [र. म. ६१]

भ्रातरित्यादिनेन प्रमादायाः पूर्वानुरागः ।

स्वीयाः सन्ति गृहे सरोरुहदृशो यासां विलासक्वणत्
काञ्चीकुण्डलहेमकङ्कणरणत्कारो[51] न विश्राम्यति ।
को हेतुः सखि कानने पुरपथे सौधे सखीसन्निधौ
भ्राम्यन्तीमपि[52] वल्लभस्य पुरतो[53] दृष्टिर्न मां मुञ्चति ॥४ [र. म ७३]

स्वीया इत्यनेन प्रियस्य पूर्वानुरागः । तथाऽवाचि शृङ्गारतिलके—

दम्पत्योर्दर्शनादेव प्ररूढगुरुरागयोः ।[54]
ज्ञेयः पूर्वानुरागोऽयमप्राप्तौ या दशा यथा ॥५ [२ २]

इन्दुं निन्दति पद्मकन्दकदलीतल्पं न वा मन्यते
कर्पूरं किरति प्रयाति न रतिं प्रालेयधारागृहे ।
श्वासैः केवलमेव खेदिततनुर्यातीत्यसौ[55] बालिका
यत्तत्कोऽपि युवा ध्रुवं स्मरसुहृच्चेतस्यमुष्याः स्थितः ॥६ [शृ. ति. २]

पूर्वं नारी भवेद्रक्ता पुमान्पश्चात्तदिङ्गितैः ।
ततः सम्भोगलीलेति स्वभावसुभगा स्थितिः ॥७॥१७ [शृ. ति. २.२०]

---

50. अ. शो. २०.१२.

51. मूले-'झणत्कारो' इति ।

52. मूले-'भ्राम्यन्ती मम' इत्यपि पाठः ।

53. मूले-'परितो' इति ।

54. मूले-'समुत्पन्नानुरागयोः' इत्यपि पाठः ।

55. मूले-'ध्यायत्यसौ' इति पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

द्वितीयभेदलक्षणं विवृणुते—

मानोऽन्यवनितासङ्गादीर्ष्याविकृतिरुच्यते ।
प्रवासः परदेशस्थे प्रिये विरहसम्भवः ॥१८॥

भर्तुरन्यवनितासङ्गात् अपरवनिताप्रसङ्गात् नायिकायाः ईर्ष्ययाऽसूयया विकृतिरवा[र्वा ?]ङ्मुखत्वादि, धवस्य वा आरामावगणनादिना विकृतिः । समानविप्रलम्भो यथा—

अनालोच्य प्रेमपरिणतिमनादृत्य,[56] सुहृदस्त्वया कान्ते[57] मानः किमिति सरले सम्प्रति कृतः । समाकृष्टा ह्येते प्रलयदहने[58] भासुरशिखाः स्वहस्तेनाङ्गाराः किमिदमधुना[59] रण्यरुदितैः ॥१[अ.श.८०]

काचिन्नायिका सखीदत्तोपालम्भैः कान्ते मानग्रहमुत्सृष्टवती । यथा—

विरहविषमः कामो वामस्तनुं कुरुते[60] तनुं दिवसगणनादक्षश्चायं व्यपेतघृणो यमः ।
त्वमपि च वशो[61] मानव्याधेर्विचिन्तय नाथ हे किसलयमृदुर्जीवत्येवं[62] कथं प्रमदाजनः ॥२
[अ. श. ६७]

अत्र काचिद्दूती प्रणयापमानितं नायकं सम्बोधयति स्म । शृङ्गारश्चात्र विप्रलम्भः । यदुक्तं—

विप्रलम्भस्तु विश्लेषो रूढविश्रम्भयोर्द्विधा ।
मानप्रवासभेदेन मानोऽपि प्रणयेर्ष्ययोः ॥२ [ ]

तत्र प्रणयमानः स्यात्कोपावेशितया द्वयोः ।
स्त्रीणामीर्ष्याकृतो मानः स्यादन्यासङ्गिनि प्रिये ॥२ [भा. प्र. ४.४]

मानवती यथा—

प्रियापराधसूचिका चेष्टा मानः, स च त्रिविधो लघुर्मध्यमो गुरुश्च । अपरस्त्रीदर्शादिजन्मा लघुः १, गोत्रस्खलनादिजन्मा मध्यमः २, अन्यस्त्रीसङ्गमजन्मा गुरुः ३ । अन्यथासिद्धकुतूहलादिनापनेयो लघुः । अन्यथासिद्धवादशपथाद्यपनेयो मध्यमः । चरणपतना[63]द्यपनेयो गुरुः । अपरस्त्रीदर्शादिजन्मा यथा—

स्वेदाम्बुभिः क्वचन पिच्छलमङ्गभूमौ[64] शातोदरि क्वचन कण्टकितं चकास्ति ।
अन्यां विलोकयति भूषयति प्रियेऽपि[65] मानं क्व दास्यति पदं तव तन्न विद्मः ॥१ [र म. ३६]

गोत्रस्खलनादिजन्मा यथा—

यद्गोत्रस्खलनं तत्र भ्रमो यदि न मन्यसे ।
रोमालिव्यालिसंस्पर्शी[66] शपथं तन्वि कारय ॥२ [र. म. ३७]

---

56. प्रेम्णः परिणति- इतीदं शतके ।
57. स्त्वयाकाण्डे–इतीदं शतके ।
58 दहने भासुर–इतीदं शतके ।
59. तदलमधुना–इतीदं शतके ।
60 तनूकुरुते इतीदं शतके ।
61. वशगो–इतीदं शतके ।
62 जीवेदेवं– इतीदं शतके ।
63. चरणपतना–पा.
64. मूले–'सङ्गमेतत' इत्यपि पाठः ।
65. मूले–'भाषयति प्रियेऽपि' इत्यपि पाठः ।
66. मूले–'–व्यालसंस्पर्शापथं' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अपराङ्गनासङ्गमजन्मा यथा—

दयितस्य निरीक्ष्य भालदेशं चरणालक्तकपिञ्जरं[67] सपत्न्याः ।
सुदृशो नयनाम्बुजस्य भासः[68] श्रुतिमुक्ताः शिखरोपमाः बभूवुः ॥३ [र.म.३८]

यदुक्तं—

स्नेहं विना भयं न स्यान्मन्मथो नेर्ष्यया विना ।
तस्मान्मानप्रकारोऽयं द्वयोः प्रीतिविवर्धनः[69] ॥४ [शृ. ति. २.५३]

दृष्ट्वा चन्द्रमसं मनोभववधूकेलिक्रियाकन्दुकं
प्रोन्मीलन्नवमालतीपरिमलं चाघ्राय मानौषधम् ।
दीपार्चिः कपिशां च चित्रवलभीमालोक्य लोलदृशा
मानिन्या चटुमात्रिकेण रमणे मानो मनाग्मन्दितः ॥५।२ [शृ. ति २]

तृतीयं लक्षयति—

प्रिये रमणे, प्रमदाजने वा, देशान्तरस्थे यो विरहस्य विप्रयोगस्य, संभव उद्भवः विरहसम्भवो भवेत्, सः प्रवासः प्रणीयते । तथोक्तं शृङ्गारतिलककारेण—

परदेशं व्रजेद्यत्र कुतश्चित्कारणात्प्रियः ।
स प्रवास इति ख्यातः कष्टावस्थो द्वयोरपि ॥६ [शृ. ति. २.५७]

यथा—

कामं कर्णकटुः कुतोऽतिमधुरः केकारवः केकिनां
मेघाश्चामृतवर्षिणोऽपि विहिताः प्रायो विषस्यन्दिनः ।
उन्मीलन्नवकन्दलावलिरसौ सप्यौप्यशय्यायते[70]
तत्किं यद्विपरीतमद्य न कृतं तस्याः वियोगेन मे ॥७ [शृ ति. २]

इह प्रियतमस्य व्यक्तो विप्रयोगः ।
निःश्वासैः सह साम्प्रतं सखि गताः वृद्धिं परां रात्रयः
सार्धं लोचनवारिणा विगमितं[71] तत्प्राकृतं[72] मे सुखम् ।
प्राणाशा तनुतामुपैति च मुहुर्नूनं तनुस्पर्द्धया
कन्दर्पः परमेकमेव विजयी याते च कान्ते स्थितः ॥८ [शृ. ति. २]

किं तत्र नास्ति रजनी किं वा चन्द्रो न किन्तु सोऽप्यरुचिः ।[73]
येन सखि वल्लभामपि न स्मरति स मां विदेशरुचिः ॥९ [शृ. ति २]

इह दयितायाः कन्दर्पः परमेक एव विजयी 'विदेशरुचि'रित्यादिभिः प्रवासो बोधितः ३ ।

---

67. मूले-'पिञ्जलं' इति परिमलव्याख्यायाम् ।
68. मूले-'नयनस्य कोणभासः' इति ।
69. मूले-'प्रीतिप्रकाशकः' इत्यपि पाठः ।
70. 'सद्योऽप्यसह्यायते' इति मूले ।
71. मूले-'विगलितं' इति ।
72. मूले-'यत्प्राक्तनं' इति ।
73. मूले-'चन्द्रो न सुन्दुरुचिः' इत्यपि पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तुर्यभेदमावेदयति—

स्यादेकतरपञ्चत्वे दम्पत्योरनुरक्तयोः ।
शृङ्गारः करुणाख्योऽयं वृत्तवर्णन एव सः ॥१९॥[74]

अनुरक्तयोरन्योन्यं आन्तरप्रीत्यन्वितचेतसोः दम्पत्योः जायापत्योः अनुरक्तयोः, एकतरस्य पञ्चत्वे देहस्तावत्पञ्चभूतारब्धनिधनत्वे, तस्य पञ्चानामभावः पृथक्कृत्वं पञ्चत्वम् । प्रत्येकं स्वांशसंक्रमात्तस्मिन्नाशेऽन्यतरस्य भर्तुः कलत्रस्य वा विरहोऽयं करुणाह्वयः शृङ्गारो जायेत । परं सवृत्तवर्णने आचारदृढत्वप्रवेदने कृत्यवानित्यध्याहार्यम् । तदुक्तं—

यत्रैकस्मिन्विपन्नेऽन्यो मृतकल्पोऽपि तद्गतम् ।
नायकः प्रलपेत्प्रेम्णा करुणोऽसौ मतो यथा ॥ [शृ. ति. २.६०]

म्लानो मुक्ताश्रुरुद्विग्नः श्रान्ताङ्गो[75] नष्टचेतनः ।
सचिन्तो दैन्यभावोऽस्मि[76]न्नैवंप्रायो जनो भवेत् ॥१ [शृ. ति. २.६१]

अत्र प्रियतमस्य करुणविप्रयोगः ।

वक्त्रं चन्द्रमसा दृशौ मृगगणैः केशाः कलापिव्रजै-
र्मातङ्गैः स्तनमण्डलं भुजलतोल्लासो लतामण्डपैः ।
सौगन्ध्यं मलयानिलेन बलिना तन्वी विभज्येति सा
सर्वैर्निष्करुणैर्हृता ध्रुवमहो दैवेन नैकेन मे ॥२ [शृ. ति. २]

इयतीं सुभगावस्थां गतोऽसि यस्याः कृते स्मरातङ्कात् ।
मूर्छां हरामि सा तव गतपुण्या नयनसलिलेन ॥३ [शृ. ति. २]

इह नायिकायाः दैवेन नैकेन मे मूर्छां हरामीत्यादिभिराचारदार्ढ्यम् ।

स्त्रीपुंसयोर्भवेदेष सापेक्षः[77] सङ्गमे पुनः ।
शृङ्गारवचनप्रायः करुणः स्यात्स चान्यथा ॥४ [शृ. ति. २.६२]

एवं विप्रलम्भचतुष्टये । प्रेयसी रमणपरतया दृष्टान्तद्वितयं प्रदर्शितम् । अयं संयोगवियोगप्रच्छन्नप्रकाशप्रभृतिकः प्रकारः । शृङ्गारो निश्चितनायकनिष्ठत्वेनैव भणितः । वृत्ते नाट्ये चेयं मम भार्या, ममेदं धनं, मां प्रति स्नेहात्कटाक्षक्षेपा इत्यादि सम्बन्धेनैव पात्राभिनीयमानतत्तद्वेषगतिवागादिनिरीक्षणश्रुत्यनुभवलक्षणैर्विभावानुभावादिभिः सामान्येन प्रतीतेरभिख्यातः । पार्षद्यानां वासनारूपेण स्थितः स्थायी रतिनामानुभूयमानतैकस्वरूपो विभावादिस्मृतिमर्यादोऽलौकिकचमत्कृतिविधायकत्वेन केवलसातस्वरूप एव शृङ्गारः । तदुक्तं—

अमृतमेव हि सज्जनमानवो वितथमित्थमुवाच कविर्जनः ।
विरचयेदमृतं रसितं सुखं श्रुतविलोकित एव हि सज्जनः ॥१ [ ]

---

74. प्रथमपादत्रयं–अ. शो. २०.१४

75. मूले–'स्रस्ताङ्गो' इति पाठः ।

76. मूले–'दैन्यभागस्मिन्' इति ।

77. मूले–'साक्षेपः' इत्यपि पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्त्रीसङ्गादृतेऽपि श्रोतृणां सुखमित्याह—

इक्षुर्भिक्षुर्मृषा द्राक्षा दुग्धं मुग्धं सुधा मुधा ।
विद्वद्गोष्ठीरसाग्रे तु शर्करा कर्करायते ॥ इति २ [　　　　]

अस्मिन् रसे त्रयस्त्रिंशतो भावानामान्तर्गताः[अन्तर्गतता] । शङ्काऽसूयाभयग्लानिव्याधिचिन्तास्मृतिधृत्यौत्सुक्यविस्मयहर्षव्रीडोन्मादमदविषादजडतानिद्राऽवहित्थाचापलमतय इत्येते भावाः सामान्यतः शृङ्गारे व्यभिचारिणः प्रयोक्तव्याः ॥१९॥ इति शृङ्गाररसः १ ।

इदानीं वीररसं निदर्शयति—

**उत्साहात्मा भवेद्वीरः त्रिधा धर्मजिदानतः ।**
**नायकोऽत्र भवेत्सर्वैः श्लाघ्यैरधिगतो गुणैः ॥२०॥**[78]

उत्साहः प्रगल्भता आत्मा स्थायी यस्य सः उत्साहात्मा । उत्साहस्थायीसपत्नगतान्यायामूढपरिणामविशेषप्रतापपराक्रमाधिक्षेपप्रभृतयो विभावाः, दार्ढ्यधीरत्वगाम्भीर्यौदार्यादिमा अनुभावाः । उद्यतश्चेह वीरे अमर्षप्रतिवर्गवितमतिधृतिक्रोधासूयासंहर्षावेगरोमहर्षणगर्वमदोग्रताभावा व्यभिचारिणो ज्ञेयाः इत्येतादृशो वीररसः स्यात् । सः त्रिविधः । कुतः ? धर्मो जन्तुरक्षणात्मकश्चाजिः संगरश्च, दानमुत्सर्जनं च तत्तथा । तस्मादिति तसिप्रत्यये धर्माजिदानतः धर्मवीरा मेघरथनृपादयो यथा—

आद्योत्पत्तिकपोतरक्षणविधा संजातकीर्त्युच्चयं
स्वर्गे नाकि नदीतटेऽनवरतं गायन्ति देवाङ्गनाः ।
श्रोतुं लक्ष्ममिषा श्रितः किमु विधु तन्नादरागी मृगः
सश्रीपञ्चमचक्रवर्ति जिन यो [वो ?] दद्यात्सुखं नित्यशः ॥१ [　　　　]

इह पारापतरक्षणाय प्राग्भवशान्तिजीवस्य स्वकीयतनोरपि निरीहत्वमुदितम् । अन्यच्च लोकोक्तं यथा—

हेमधेनुधरादीनां दातारः सुलभा भुवि ।
दुर्लभः पुरुषो लोके सर्वभूताभयप्रदः ॥२ [　　　　]

तथा—

अयि विहङ्ग वराककपोतकं विसृज धेहि धृतिं मम मेदसा ।
शिबिरहं भवता विदितो न किं सकलसत्त्वसमुद्धरणे क्षमः ॥३ [शृ. ति. ३]

रणवीराः रावणरामचन्द्राद्याः । यथा—

यत्रैरावततीव्रदन्तमुसलैरेरण्डकाण्डायितम्
वज्रेणापि विकीर्णवह्नितनिनामाणालिनालायितम् ।
मद्वक्षस्यवलम्ब्य किञ्चिदधुना तद्विस्मृतं वज्रिणा
युद्धं यद्यवलम्बते स तु पुनः सज्जोऽस्म्यहं रावणः ॥३ [शृ. ति. ३]
विजेतव्या लङ्का चरणतरणीयो जलनिधिः
विपक्षः पौलस्त्यो रणभुवि सहायाश्च कपयः ।
तथाप्याजौ रामः सकलमवधीद्राक्षसकुलं
क्रियासिद्धिः सत्त्वे वसति महतां नोपकरणे ॥४ [　　　]

78. पादत्रयं १,३,४-अ. शे. २०,२१

Jain Education International　　For Private & Personal Use Only　　www.jainelibrary.org

एतत्काव्यद्वयेनानयोर्वीररसाधिक्यकथनम् । दानवीराः श्रीमदाम्रभट्टविक्रमबलिप्रभृतयो यथा—

द्वात्रिंशद्रम्भलक्षा भृगुपुरवसतेः सुव्रतस्यार्हतोऽग्रे
कुर्वन् मं[मां]गल्यदीपं ससुरनरवरश्रेणिभिः स्तूयमानः ।
योऽदादर्थिव्रजस्य त्रिजगदधिपतेः सद्गुणोत्कीर्तनायां
स श्रीमानाम्रभट्टो जगति विजयते दानशौण्डाग्रयायी ॥५ [ ]

अत्र दानवीरत्वं व्यक्तम् ।

मुषितोऽसि[79] हरे नूनं भुवनत्रयमात्रलब्धितोषेण ।
बलिरर्थितदोऽस्मि यतो न याचितः किञ्चिदप्यधिकम् ॥६ [शृ. ति. ३]

अत्रातिदानवीरत्वं स्फुटम् । इमं नायकमावेदयति । अस्मिन् सवीरे सर्वैः श्लाघनीयैः धैर्यगाम्भीर्यप्रमुखैर्गुणैरधिगतो ज्ञातो व्याप्तो वा नायकः स्यात् । धीरोद्धतो व्यसनार्तो, लुब्धः तद्बोधकारकः प्रतिनायको दुर्योधनादिः २ इति वीररसः २ । इतर्हि करुणमभिधत्ते—

**शोकोत्थः करुणो ज्ञेयस्तत्र भूपातरोदने ।**
**वैवर्ण्यमोहनिर्वेदप्रलापाश्रूणि कीर्तयेत् ॥२१॥[80]**

शोकात् स्थायिभावादिष्टविरहानीप्सितसंयोगादिविभावैरुत्तिष्ठतीति शोकोत्थः करुणाभिधानो रसो ज्ञातव्यः । तत्र तस्मिन् शोके भूपातरोदनदैवोपालम्भप्रभृतीननुभावान् वैवर्ण्यमोहनिर्वेदप्रलापाश्रुदैन्यचिन्ताग्लानिजडतामृतिव्याध्यभिरव्यान् व्यभिचारिणः कीर्तयेद्वर्णयेत्, बुध इति शेषः । यदुक्तं—

शोकात्मा करुणो ज्ञेयः प्रियमृत्योर्धनक्षयात् ।
तत्रेत्थं नायको देव हतः स्यात् दुःखभाजनम् ॥१ [शृ. ति. ३.५]

यथा— भर्ता सङ्गर एव मृत्युवसतिं प्राप्तः समं बान्धवैः
यूनां काममियं दुनोति च मनो वैधव्यभावाद्वधूः ।
बालो दुस्त्यज एक एव च शिशुः कष्टं कृतं वेधसा
जीवामीति महीपते प्रलपति त्वद्वैरिसीमन्तिनी ॥१ [शृ. ति.३]
भूपातो दैवनिन्दा च रोदनं दीननिःस्वनः ।
शरीरताडनं मोहो वैवर्ण्यं चात्र जायते ॥ [शृ. ति. ३.६]

इत्यनेन शोकात्मनि करुणेऽनुभावकथनम् ।

क्व चाम्भोधेर्जन्म क्व च वपुरिदं कुन्दधवलं
क्व चावासस्थानं पुनरहह विष्णोः करतले ।
क्व नीचानामास्ये परिणतिरियं चुम्बनविधा-
वितीवोच्चैः शङ्खः करुणकरुणं रोदित्यनुदिनम् ॥ [ ]

सोत्कण्ठं रुदितं सकम्पमसकृद्ध्यातं सबाष्पं चिरं
चक्षुर्दिक्षु निवेशितं सकरुणं सख्याः समं जल्पितम् ।
नागच्छत्युचितेऽपि वासकविधौ कान्ते समुद्विग्नया
तत्तत्किञ्चिदुदीरितं मृगदृशा नो यत्र वाचां गतिः ॥३॥२१॥ [ ] इति करुणरसः ।३।

---

79. मूले-'मुखितोऽसि' इति ।      80. अ.शे. २.१८, चतुर्थे चरणे तत्र 'वर्णयेत्' इति पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अथ हास्यरसं व्यञ्जयति—

हासमूलः समाख्यातो हास्यनामा रसो बुधैः ।
चेष्टाङ्गवेषवैचित्र्याद्वाच्यो हास्यस्य सम्भवः ॥[81]२२[82]॥

हासो मूलं स्थायी यस्य स तथा हास्यनामा रसो बुधैर्विद्वद्भिः, समाख्यातो भणितः । एतज्जननं ब्रूते । चेष्टा इतरगतिवचनानुकाराद्याः । अङ्गवेषवैकृत्यं नटनशीर्षजकर्तनगुप्तावयवाविर्भावनादिः । ततो द्वन्द्वः-चेष्टाश्चाङ्ग च वेषश्च चेष्टाङ्गवेष, तस्य वैकृत्यं तथा । तत्र चेष्टा हिताहितप्राप्तिपरिहारार्था स्पन्दनमात्रं वा यथासम्भवं योज्या । अङ्गवैकृत्यं अभिप्रायानुरूपक्रियाविष्करणभ्रूकुटिमुखरागादित्वम् । वेषवैकृत्यं सीमन्तिनीरूपान्तरपरिग्रहवैकृत्यं वा व्याख्येयम् । तस्माद्विभावाद्हास्यरसस्य उद्भवः सम्भवः, वाच्यो वक्तव्यः ॥२२॥

अमुष्यानुभावानावेदयति—

कपोलाक्षिकृतोल्लासो भिन्नौष्ठः स महात्मनाम् ।
विदीर्णास्यश्च मध्यानामधमानां स शब्दकः ॥२३॥[83]

केन जलेन पूर्यते इति कपोले, कपोले चाक्षिणी च तथा । तत्र कृतः उल्लासो येन सः कपोलाक्षिकृतोल्लासः गल्लस्थलचक्षुः विहितविकासः । उपलक्षणादोष्ठस्पन्दनाननरागकरतालप्रमुखा अनुभावाः अस्मिंश्च । श्रमचपलतानिद्रास्वप्नग्लानिशङ्काऽसूयाऽवहित्थाख्याः व्यभिचारिणो मन्तव्याः । स हास्यरसस्त्रिविधः –स्मितं १, विहसितं २, अपहसितं ३, चेति । तत्र महात्मनां प्रधानस्त्रीपुंसानां अभिन्नौष्ठोऽस्फुटितौष्ठपुटः गण्डस्थलविकासमात्रम् । स्मिङ् ईषत् हसने क्तप्रत्यये स्मितं भवेत् ।

ईषद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः ।
अलक्षितद्विजद्वारं स्मितमिच्छन्ति सूरयः ॥१ [ना शा. ६.६५] प्रायः समानं

द्वितीयं च पुनः, मध्यमानाम् । विदीर्णं विवृत्तं, आस्यं वक्त्रं, येन सः विदीर्णास्यः । किंचिद् दृश्यदशनो नात्युच्चैर्नात्यल्पहासो विहसितं—

आकुञ्चितकपोलाक्षं सस्वनं मधुरं तथा ।
प्रस्तावोत्थं सास्यरागमाहुर्विहसितं बुधाः ॥१[84]

तृतीयमधमानां निकृष्टजनानां, सशब्दः सबाष्पलोचनः निष्कारणको धुतकम्पशाखः स्कन्धे सकराघातश्च अपहसितम् । अयमभिप्रायः–हसन्तमन्यं निरीक्ष्यात्मना विभावप्रभृतीननवलोकयन्नपि मनुजो हसति । यथा—

[अ]म्लदाडिमरसास्वादः समीपस्थमानववदने सरसार्द्रतां विधत्ते, संक्रमणभवो हास्य इव । कश्चन गाम्भीर्याद्बहिः हसन्न विलोकयते । परं विभावादिसम्बन्धे अन्तर्हासो भवेदेवेत्यैदंपर्यम् । तथा चाह

81. चोद्भवः–सिंहदेवगणिवृत्तौ ।     82. अ. शे. २०.१६

83. अ. शे. २०.१७

84. ना. शा. ६.६८ अनेन प्रायः समानः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

हास्यरसाधिकारं सोदाहरणं शृङ्गारतिलककारः—

विकृताङ्गवचःकृत्यवेषेभ्यो जायते रसः ।
हास्योऽपि हासमूलात्मा पात्रत्रयगतो यथा ॥१ [शृ. ति. ३.१]

किञ्चिद्विकसितैर्गण्डैः किञ्चिद्विस्फारितेक्षणैः ।
किञ्चिल्लक्ष्यद्विजः सोऽयमुत्तमानां भवेद्यथा ॥२॥ [शृ. ति ३.२]

पाणौ कङ्कणमुत्फणः फणिपतिर्नेत्रं क्षलत्पावकं[85]
कण्ठः कुण्ठितकालकूटकुटिलो वस्त्रं गजेन्द्राजिनम् ।
गौरीलोचनलोभनाय सुभगो वेषो वरस्येति मे
गण्डोल्लासविभावितः पशुपतेर्हासोद्गमः पातु वः ॥१॥३ [शृ. ति. ३]

मध्यमानां भवत्येष विवृताननपङ्कजः ।
नीचानां निपतद्बाष्पः श्रूयमाणध्वनिर्यथा ॥ [शृ. ति. ३.३]

मुग्धे त्वं सुभगेन वेत्सि मदनव्यापारमद्यापि यन्
नूनं ते जलजैषिणाऽयमलिना दष्टो[86] न भर्त्राऽधरः ।
सख्येत्थं[87] हसितं वधूं प्रति तथा सानन्दमाविर्भवद्
वक्त्रान्तर्न्नवसी[88]धुगन्धरसिकैर्भृङ्गैर्यथा धावितम् ॥५॥२ [शृ. ति. ३]

त्यक्त्वा गुञ्जफलानि मौक्तिकमयी भूषा स्तनेष्वाहिता
स्त्रीणां कष्टमिदं कृतं सरसिजं कर्णे न बर्हिच्छदम् ।
इत्थं नाथ तवारिधाम्नि शबरैरालोक्य चित्रस्थितिं
बाष्पार्द्रीकृतलोचनैः स्फुटरवं तारैः स्फुटं[89] हस्यते ॥६॥३ [शृ. त. ३]

अस्मिन् सखि कराघातनेत्रोल्लासाङ्गवर्तनम् ।
नासा कपोलविस्पन्दो मुखरागश्च जायते ॥७ [शृ. ति. ३.४]

सर्वत्रेह हास्यं प्रकटम् ॥२३॥ इति हास्यरसः ४।

सम्प्रत्यद्भुतरसं वितनुते—

**विस्मयात्माद्भुतो ज्ञेयः[90] स चासम्भाव्यवस्तुनः ।**
**दर्शनाच्छ्रवणाद्वापि प्राणीनामुपजायते ॥२४॥**

विस्मयश्चित्रमात्मा स्थायी यस्य सः विस्मयात्माऽद्भुतरसो विद्वद्भिरवसेयः । स च दिव्यसुरयानेन्द्रजालनाविलकर्मसमीहितलब्धिप्रमुखस्यासम्भाव्यस्य दुष्प्रापस्य वस्तुनः पदार्थस्य दर्शनाद्वाऽथवा श्रवणादित्यनेन दर्शनश्रवणरूपविभवादपि भि[भि]न्नक्रमे चेतनावदङ्गभूतामुपजायते सम्पद्यते ॥२४॥

---

85. मूले-'ज्वलत्पावकं' इति ।
86. मूले- 'दृष्टो' इति ।
87. मूले- 'सख्यैवं' इति ।
88. मूले- 'गत' इति
89. मूले-'दारैः समं' इति ।
90. अ. शे. २.२५



Jain Education International For Private & Personal Use Only www.jainelibrary.org

एतस्यानुभावान् व्यञ्जयति—

तत्र नेत्रविकासः स्यात् पुलकः स्वेद एव च ।
निष्पन्दनेत्रता साधुसाधुवाक् गद्गदा च गीः ॥२५॥[91]

तत्र तस्मिन्नद्भुतरसे नेत्रविकासः स्यात् । पुलको रोमाञ्च, स्वेदः प्रस्वेद एवेति निश्चयेन, च पुनः, निष्पन्दनेत्रता निर्निमेषता; साधुसाध्विति वाग्वाणी, गद्गदा अव्यक्ता गीश्चेत्यनुभावाः जायन्ते। लक्षणतो हर्षाश्रुप्रसादवितरणादिमा अपि आवेगजडतामोहहर्षणविस्मयस्मृत्याह्वयाः व्यभिचारिणोऽस्मिन्मन्तव्याः ।

दमनकतरुशाखालम्बि जम्बीरयुग्मं विकचकमलकोषे दाडिमीबीजपङ्क्तिः ।
तुहिनकिरणबिम्बे खञ्जरीटप्रचारः त्रितयमिदमपूर्वं देव ! दृष्टं मयाऽद्य ॥१ [ ]

अत्राद्भुतत्वं स्पष्टम् । यदुक्तं—

विस्मयात्माऽद्भुतो ज्ञेयो रसो रसविचक्षणैः ।
मायेन्द्रजालदिव्यस्त्रीविपिनाद्युद्भवो यथा ॥२ [शृ. ति. ३.१६ ]
सत्यं त्वया हृता हंस वनितानामियं गतिः ।
भ्रमन्त्येतास्तथाऽप्येतदिन्द्रजालमिव प्रिये ॥३ [शृ. ति. ३ ]

इत्यद्भुतम् ।

नराधिप ! तव कीर्तिर्धवलयत्यपि जगन्ति ।
रक्तीकरोति सुहृदो मलिनयति च वैरिवदनानि ॥४ [ ]
गद्गदः साधुवादश्च स्वेदः पुलकवेपथुः ।
दृष्टेर्निश्चलतारत्वं विकासश्चात्र जायते ॥५॥२५॥ [शृ. ति. ३.१७ ]

इत्यद्भुतरसः ५ ।

भयानकं निरूपयति—

भयानको भवेद्भीतिप्रकृतिर्घोरवस्तुतः ।
स च प्रायेण वनितानीचबालेषु शस्यते ॥२६॥[92]

भीतिर्भयं, प्रकृतिः स्थायिभावतया यस्य सः तथा भयानकनामा रसो जायेत । कस्मात्? घोरवस्तुतः । राक्षसप्रभृत्यवलोकनविकृतध्वनिश्रवणशून्यसद्मारण्यध्वान्ताद्यरूपविभावात् । चः समुच्चये । सः भयानकः प्रायेण; वनिताश्च नीचाश्च बालाश्च तथा तेषु वनितानीचबालेषु प्रमदानीचजनशिशुषु, शस्यते ईड्यते, नैसर्गिकस्य तस्य तस्मिन्नेव सद्भावात् । एतत्त्रितयोदाहरणानि यथा—

प्रणयकलहसंगान्मन्युभाजा निरस्तः प्रकटितचटुकोटिः पादपद्मानतोऽपि ।
नवजलधरगर्जभीतयाऽसौ कयाचित् त्रुटिततरलहारं सस्वजे प्राणनाथः ॥५ [शृ ति. ३]
कम्पोपरुद्धसर्वाङ्गैर्गलत्स्वेदाम्बुबिन्दुभिः ।
त्वदारब्धैर्महीपाल वैरिभिर्वनितायितम् ॥६ [शृ. ति. ३ ]
श्रुत्वा तूर्यनिनादं द्वारे भयचलितललितबाहुलतः ।
धन्यस्य लगति कण्ठे मुग्धशिशुर्धूलिधूसरितः ॥७ [शृ ति. ३ ]

91. अ.शे. २०,२६. तत्र चतुर्थे चरणे–'साधुवादास्तथा च गीः', 'साधुवादस्तया मतः,' 'साधुवादास्तथा मता' इति पाठाः' ।

92. अ. शे, २०–२२ चतुर्थे चरणे 'शस्यते' इत्यस्य स्थाने 'दृश्यते' इति पाठः ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

तदुक्तं— भयानको भयस्थायोभावोऽसौ जायते रसः ।
शब्दादिविगतप्रौढिर्बालस्त्रीनीचनायकः ॥८ [ शृ. ति. ३.१२ ]

उत्तमास्तु निर्भयत्वेऽपि गुरुनृपतिप्रभृतिभ्यो भीतिं प्रकाशयन्तो नितरामुत्तमाः भवेयुः । प्रख्यापिते हि साध्वसे गुरुर्विनयवन्तं वेत्ति पाणिकम्पनादिचेष्टया । न नीचस्वभावमेनं कलयति ।[93] दरवत् कृतकं रत्याद्यपि गणिकादौ घटते, परं तदुक्तौ न किमपि प्रयोजनम् । गुरुभूपालाद्या अपि परप्रसत्तये कृतकं रोषाद्यं व्यक्तीकुर्वन्ति ॥२६॥

एतस्यानुभावव्यभिचारिणो निवेदयति—

**दिगालोकास्यशोषाङ्गकम्पगद्गदसम्भ्रमाः ।**
**त्रासवैवर्ण्यमोहाश्च वर्ण्यन्ते विबुधैरिह ॥२७॥[94]**

दिश आलोक्यन्तेऽस्मिन्निति दिगालोको हरिद्वलोकनम् । शोषणं शोषः; अस्यत्यवर्णमास्यं, अस्यतेऽस्मिन्नित्यमरटीकायामास्यमाननं, तस्य शोषः आस्यशोषः । अङ्गन्त्येकदेशत्वमङ्गानि शरीरावयवरूपाणि पाणिहृदयचरणादीनि । तेषां कम्पोऽङ्गकम्पः, गद्गदः अव्यक्तवचनं, सम्भ्रमः प्रमदविहितौत्सुक्यम् । ततो द्वन्द्वः दिगालोकश्च आस्यशोषश्च, अङ्गकम्पश्च, गद्गदश्च, सम्भ्रमश्च तथा तत्प्रभृतयोऽनुभावाः । च पुनः, सन्त्रासमृतिवैवर्ण्यमोहा व्यभिचारिणोऽत्र विबुधैर्वर्ण्यन्ते व्याख्यायन्ते । तथोक्तमनुभावस्वरूपं—

वैवर्ण्यं गद्गदत्रासौ हस्तपादादिकम्पनम् ।
स्वेदास्यशोषदिक्प्रेक्षासम्भ्रमश्चात्र जायते ॥९।२७॥ [ शृ. ति. ३.१३ ]

इति भयानकरसः ६ ।

एतर्हि रौद्ररसं प्रणिगदति—

**क्रोधात्मको भवेद्रौद्रः क्रोधश्चारिपराभवात् ।**
**भीष्मवृत्तिर्भवेदुग्रः सामर्षस्तत्र नायकः ॥२८॥[95]**

क्रोधो मन्युरात्मा स्थायीभावो यस्य स क्रोधात्मको रौद्राभिधानो रसः स्यात् । च पुनः, क्रोधः जनपदव्रतिताहरणजातिविद्याजुगुप्सनरोषाद्यरिपराभवरूपविभावात् प्रादुर्भूतो भवेत् ।

अस्योदाहरणानि—

यैः प्राणापहृतिः कृता मम पितुः क्षुद्रैर्मुधा क्षत्रियैः
रामोऽहं रमणीर्विहाय बलवान्नि शेषमेषां हठात् ।
भास्वत्प्रौढकुठारकोटिघटनाकाण्डत्रुटत्कन्धरा
स्रोतोऽन्तः श्रुतिविश्रशोणितभरैः कुर्यां क्रुधो निर्वृतिम् ॥१ शृ. ति. ३ ]

शस्त्रोद्दारितकुम्भिकुम्भविगलद्रक्ताक्तमुक्ताफलः
स्फारस्फूर्जितकान्तिकल्पितबृहत्चञ्चच्चतुष्काचितम् ।
क्रुद्धोद्भासिनवीरधोरणिरणत् खड्गाग्रमुग्रावहं
युद्धं सिद्धवधूगृहीतसुभटं जातं तथा दुर्धरम् ॥२ [ शृ. ति. ३ ]

---

93. कल्पन्ति-च    94 अ. शे २.२३ इत्यनया सह कारिकैषा प्रायः समाना ।
95 कारिका एषा अ शे २०.१५ इत्यनया सह समाना ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दत्वा धैर्यभुजङ्गमूर्ध्नि चरणावुल्लङ्घ्य लज्जानदी-
मङ्गीकृत्य घनान्धकारपटलं तन्व्या न दृष्टः प्रियः ।
सन्तापाकुलया तया च परितः पाथोधरे गर्जति
क्रोधाक्रान्तकृतान्तमत्तमहिषभ्रान्त्या दृशौ योजिते ॥३ [ ]

उक्तोदाहरणेषु रौद्रत्वं प्रकटम् । तत्र तस्मिन् रौद्रे, भीष्मा भयानका, वृत्तिः व्यापारो यस्य सः भीष्मवृत्तिः, सामर्षः स प्रतिचिकीर्षारूपः । उच समवाये, उच्यति क्रुधा समवैति इत्युग्रः । शूद्रादय इति रक्तगत्वं च । दारुणकर्मविधायकत्वादुच्छृङ्खलो नायकः स्यात् ॥२८॥

अस्यानुभावव्यभिचारिणो निरूपयति—

**स्वांसाघातस्वशंसास्त्रोत्क्षेपभ्रुकुटयस्तथा ।**
**अत्रारातिजनाक्षेपो दलनं चोपवर्ण्यते ॥२९॥**[96]

अत्रास्मिन् रौद्ररसे अस्यति परं सः, अस्यते भारेणांसः, आहननमाघातः, स्वश्चासावंसश्च स्वांसः तस्य तस्मिन्वा घातः स्वांसाघातः स्वकीयस्कन्धप्रहारः । शंसनं शंसा, स्वस्य शंसा स्वशंसा निजार्थवादः । अस्यतेऽस्त्रमायुधं, अस्यन्ते बाणा अनेनेति वा, अस्त्रं शरासनम् । उत्क्षेपणमुत्क्षेप, तस्योत्क्षेपोऽस्त्रोत्क्षेपः । भ्रुवः कुटनं कुटिलीकरणं, भ्रुकुटिः, तदनुद्वन्द्वः । स्वांसाघातश्च स्वशंसा च, अस्त्रोत्क्षेपश्च, भृकुटिश्च स्वांसाघातस्वशंसाऽस्त्रोत्क्षेपभृकुटयोऽनुभावाः । उपलक्षणतोऽपरेऽपि चक्षुरागदशनाधरग्रहणरक्ताकृष्ट्यादिमाः स्युः । तथा शत्रुलोकाक्षेपोऽरिविनाशनं चो[चा]नुक्तसमुच्चयार्थे हर्षासूयागर्वोत्साहमदचापल्योग्रतामर्षवेगाभिधानाः व्यभिचारिणः उपवर्ण्यन्ते । यदाह—

क्रोधात्मको भवेद्रौद्रः प्रतिशत्रुममर्षतः ।
रक्षःप्रायो भवेत्तत्र नायकोऽत्युग्रविग्रहः ॥१ [शृ. ति. ३.७]
मुखरागायुधोत्क्षेपः स्वेदकण्ठाधरग्रहः ।
शक्तिशंसापराघातो भृकुटिश्चात्र जायते ॥२॥ [शृ. ति. ३.८]

इति रौद्ररसः ।

इदानीं बीभत्सरसं व्यनक्ति—

**बीभत्सः स्याज्जुगुप्सातः सोऽहृद्यश्रवणेक्षणात् ।**
**निष्ठीवनास्यभङ्गादि स्यादत्र महतां न च ॥३०॥**[97]

बीभत्साह्वयो रसो जुगुप्सालक्षणः स्थायिभावाद्भवेत् । सा जुगुप्सा वान्तिव्रणपूतिकीटप्रभृत्यसुन्दरपदार्थश्रुतिनिरीक्षणविभावात्प्रादुर्भवति । यदाह सोदाहरणं—

जुगुप्साप्रकृतिर्ज्ञेयो बीभत्सोऽहृद्यदर्शनात् ।
श्रवणात्कीर्तनाद्वापि पूत्यादेर्विषयाद्यथा ॥१ [शृ. ति. ३.१४]

लुठत्कृमिकलेवरं स्रवदसृग्वशावासितं
विकीर्णशवसन्ततिप्रसरदुग्रगन्धान्वितम् ॥२
भ्रमत्प्रचुरपत्रिकं त्रिकविवृत्तनृत्यक्रियम् ।
प्रवीणगुणकौणपं परिबभौ परेताजिरम् ॥३ [शृ. ति ३]

96. अ.शे. २०.२०     97. अ. शे. २०.२४.

Jain Education International For Private & Personal Use Only www.jainelibrary.org

यकृच्छकृन्मलश्लेष्ममज्जास्थिपरिपूरिताः ।
स्नायुस्यूता बहीरम्याः स्त्रियश्चर्मप्रसेविकाः ॥४ [ ]
क्वचिद्वीणावाद्यं क्वचिदपि हहाहेति रुदितं
क्वचिद्विद्वद्गोष्ठी क्वचिदपि सुरामत्तकलहः ।
क्वचिद्रम्या रामा क्वचिदपि गलत्कुष्ठिनिवहो
न जाने संसारः किममृतमयः किं विषमयः ॥५ [भर्तृ. वै. श.]

अस्मिन् बीभत्से निष्ठीवनं थूत्कृतिः आस्यभङ्गो लपनमोटनं, ते आदौ यस्य तन्निष्ठीवनास्यभङ्गादिः । आदिशब्देन वपुः सङ्कोचनगूढपयोल्लासनासाविकूणनपिधानप्रमुखमप्यनुभावत्वेनावसेयं भवेत् । अपस्मारविषादभयरोगमतिमदोन्मादाख्याः व्यभिचारिणश्च इमेऽत्र मन्तव्याः । च पुनः, महतां महापुरुषाणां अनुभावव्यभिचारिणो न भवेयुः । यदुक्तमनुभावस्वरूपं—

नासाप्रच्छादनं वक्त्रकूणनं मात्रसंवृत्तिः ।
निष्ठीवनादि चात्रस्यादुद्वेगाज्जायते रसः ॥३०॥ [शृ. ति. ३.१५]

इति बीभत्सरसः ।

साम्प्रतं शान्तरसं प्रतिपादयति—

**सम्यग्ज्ञानसमुत्थानः शान्तो निःस्पृहनायकः ।**
**रागद्वेषपरित्यागात् सम्यग्ज्ञानस्य चोद्भवः ॥३१॥**[98]

भवभीरुत्ववैराग्यासारतादिमयं सम्यग्ज्ञानम् । ततो विभावात्समुत्थानं समुद्भवो यस्य स तथा तादृशः शान्तनामा रसो भवेत् । किंलक्षणः? निःस्पृहो निराकाङ्क्षो नायको यस्य सः निःस्पृहनायकः । 'च' शब्दः स्वगतानेकभेदद्योतकः । एतस्मात् रागद्वेषपरिक्षयात् स्थायिनः समत्वरूपादस्य सम्यग्ज्ञानस्य चोद्भवः प्रादुर्भावः स्यात् । अत्र नियमप्रमुखा अनुभावाः धृतिस्मृतिमतिप्रभृतयः व्यभिचारिणश्च स्वतो ज्ञातव्याः । यदुक्तं—

सम्यग्ज्ञानोद्भवः शान्तः समत्वात्सर्वजन्तुषु ।
गतेच्छो नायकस्तत्र तमोरागपरिक्षयात् ॥१ [शृ. ति. ३.१८]
धनमहरहर्दत्तं स्वीयं यथार्थितमर्थिने
कृतमरिकुलं नारीशेषं स्वखड्गविजृम्भितैः ।
प्रणयिनि जने रागोद्रिक्ते रतिर्विहिता चिरं
किमपरमतः कर्तव्यं नस्तनावपि नादरः ॥२ [शृ. ति. ३]

इहानुभावानाह—

निरालम्बं मनो यत्र बाढमात्मनि तिष्ठति ।
सुखे नेच्छा तथा दुःखे नोद्वेगस्तत्र जायते ॥३[99] [शृ. ति. ३.१९]
विरतः कामभोगेभ्यः स्वशरीरेऽपि निःस्पृहः ।
संवेगनदनिर्मग्नः सर्वत्र समतां श्रयेत् ॥४ [हे. यो. शा. ७.५]
शत्रौ मित्रे तृणे स्त्रैणे स्वर्णेऽश्मनि मणौ मृदि ।
मोक्षे भवे भविष्यामि निर्विशेषमतिः कदा ॥५ [हे. यो. शा. ३.१४५]

---

98. अ. शे. २०.२७. 99. मूले-'ऽप्युद्वेगो नात्र जायते' इति ।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

अमन्दानन्दजनने साम्यवारिणि मज्जताम् ।
जायते सहसा पुंसां रागद्वेषमलक्षयः ॥६ [हे. यो शा. ४.५०]

प्रणिहन्ति क्षणार्धेन साम्यमालम्ब्य कर्म तत् ।
यन्न हन्यान्नरस्तीव्रतपसा जन्मकोटिभिः ॥७ [हे यो. शा ४.५१]

भवारण्यं भीमं तनुगृहमिदं छिद्रबहुलं
बली कालश्चौरो नियतमसिता मोहरजनी ।
गृहीत्वा ज्ञानासिं तरति फलकं शीलकवचं
समाधानं कृत्वा स्थिरतरदृशो जागृतजनाः ॥८ [ ]

यदार्षं जो चन्दणेण बाहुं अ लिम्पइ वासिणा वि तच्छेइ ।
संथुणइ जो य निंदइ महरिसिणो तत्थ समभावा ॥९ [ ]

पहरिज्जंतो दुज्जोहणेण तह पंडवेहिं थुव्वंतो
समसतुमित्तभावो दमदंतमहारिसो जयओ ॥१०

इह शान्तरसो व्यक्त एव ॥३१॥ इति शान्तरसः ९ ।

अधुना वृत्तकर्ता समर्थयति —

**दोषैरुज्झितमाश्रितं गुणगणैश्चेतश्चमत्कारिणं**
**नानाऽलङ्कृतिभिः परीतमभितो रीत्या स्फुरन्त्या सताम् ।**
**तैस्तैस्तन्मयतां गतं नवरसैराकल्पकालं कवि-**
**स्त्रष्टारो घटयन्तु काव्यपुरुं सारस्वतध्यायिनः ॥३२॥**

सरस्वती देवताऽस्य तस्य । तस्या अयं वा । 'तस्येदं' इत्यणि [हे. व्या ६.३.१६०] । सारस्वतः, तं सारस्वतम् । सरस्वत्यधिष्ठिततया मन्त्रविशेषं ध्यायन्तीत्येवंशीलाः सारस्वतध्यायिनः कविस्त्रष्टारः । कविं परमपण्डितं सृजन्तीति कविस्त्रष्टारः कविरूपविधातारः । काव्यपुरुषं तद्धर्म्यसाधर्म्याद्रचयन्तु निर्मापयन्त्वित्यन्वयः । किंविशिष्टं काव्यपुरुषम् ? दोषैरनर्थकप्रमुखैरुज्झितं परास्तम् । पुनः किंभूतम ? औदार्यप्रभृतिभिर्गुणगणैराश्रितं समन्वितम् । तथा नानालङ्कृतिभिर्ध्वन्यात्मकाभिश्चित्रादिभिरभ्युच्चयरूपजात्युपमाप्रभृतिभिश्च । चेतश्चमत्करोतीत्येवंशीलश्चेतश्चमत्कारी । तं मनश्चमत्कृतिविधायकम् । केषाम् ? सतां सत्पुरुषाणाम् । पुनः किंलक्षणम् ? स्फुरन्त्या स्फूर्तिं विदधत्या रीत्या गौडीयादिमया ।

लाटी हास्यरसे प्रयोगनिपुणैः रीतिः प्रबन्धैः कृता
पाञ्चाली करुणे भयानकरसे शान्ते रसे मागधी ।
गौडी वीररसे च रौद्रजरसे वत्सोभदेशोद्भवा
बीभत्साद्भुतयोर्विदर्भविषया शृङ्गारभूते रसे ॥१ [ ]

इत्यादि शास्त्रान्तरोक्तलक्षणयाऽभितः सामस्त्येन, पर्यैति परीतं परिवेष्ठितम् । पुरुषपक्षे सतां रीत्या सदाचारेण स्वस्वोचितमार्गेण परीतम् । तैस्तैर्प्रथमानवविख्यातैः शृङ्गारप्रमुखैर्नवरसैस्तन्मयताम् । इहाभिव्याप्तौ मयट्, तेन तदभिव्याप्ततां तद्वाच्यत्वमिति यावद्गतं प्राप्तम । कल्पान्तकालमामर्यादीकृत्याकल्पकालं प्रलयावधीत्यर्थः। इह सारस्वतध्यायिन इति ग्रन्थावसानविसर्जनीयावलोकनं न दोषविधायकम्,

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ध्वनेरेव श्रेयोरूपत्वात् । देवताक्षेमादिवाचकध्वनीनां समस्तानामनिन्दनीयत्वाच्चाक्षरन्यासतो गणतोऽपि वा । किंचोक्तविशेषणशब्दोऽयं शास्त्रान्ते मङ्गलार्थकः । यथाह भगवान्भाष्यकारः—

मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि हि शास्त्राणि प्रथन्ते, वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति । अध्येतारश्च वक्तारः स्युरिति ॥३२॥

इति बृहत्खरतरगच्छे भट्टारकप्रभुश्रीजिनराजसूरिविजयिराज्ये श्रीसागरचन्द्रसूरिसन्ताने पट्टानुक्रमसंजातश्रीमद्वाचनाचार्यरत्नधीरगणिप्रवरविनेयवाचनाचार्यज्ञानप्रमोदगणिविनिर्मितायां वाग्भट्टालङ्कारवृत्तौ पञ्चमः परिच्छेदः ५॥ श्रीरस्तु ॥

व्याख्यातमस्मिन् यदसङ्गतं तत् ग्रन्थे विशोध्यं विबुधैर्महद्भिः ।
मयि प्रसद्य हृदयपरस्य दोषगुणामलज्ञानविधौ पटिष्ठैः ॥१

विधाय टीकां यदि मां सुपुण्यं समर्जितं वाङ्मयकाहितेन ।
सिद्धिं लभन्तामचिरेण सम्यग् भव्या विधूताखिलकर्मसङ्गाः ॥२

चन्द्रकुलविपुलवियदिन्दुमुख्य उद्योतनाभिधः सूरिः ।
आसीत्तत्पट्टाधिपगणभृच्छ्रीवर्धमानगुरुः ॥३

तत्पा[त्पा ?]दपद्‌माहर्मणिरभूज्जिनेश्वर सुज्ञानसूरिवरः ।
खरतरगणस्य सुमहिमकारी जिनचन्द्रसूरिश्च ॥४

श्री अभयदेवसूरिर्नवाङ्गवृत्त्युत्करस्य निर्माता ।
श्रीजिनवल्लभसूरिर्युगाद्वरो जैनदत्तगुरुः ॥५

पट्टानुक्रमभूता जिनादुदयराजभद्रसूरीशाः ।
श्रीजिनपूर्वश्चन्द्रः समुद्रहंसौ जिनाल्लक्ष्म्यौ ॥६

श्रीजिनमाणिक्यगुरुर्युगप्रधानजिनचन्द्रमुनिनाथः ।
युगवरजिनसिंहाह्वः खरतरगच्छश्रिये चासीत् ॥७

तत्पट्टोदयभूधरारुणवरो भव्याम्बुजोद्बोधकः ।
प्रोद्यच्छ्रीजिनराजसूरिगुणभृद् भट्टारकोच्चीपतिः ।
अल्पीयः पदिनां प्रसन्ननयनस्तूच्चैः पदारोपको
बोहित्थान्वयशेखरो विजयतां स्फूर्जत्प्रतापावलिः ॥८

सूरिश्रीजिनसागरपरिवृत जिनराजविजयिनि सुराज्ये ।
प्रथमोदितजिनराजगुरुः धृतभुवनरत्नसूरिपदः ॥९

तदीयपत्कैरवपार्वणेन्दुः साधुप्रभुः सागरचन्द्रसूरिः ।
संविग्नशिष्यावलिलब्धरेखा तन्नामधेयोऽभवदुच्चशाखा ॥१०

तत्पट्टपर्वाचलचण्डधामा बभौ च धर्मादिमरत्नसूरिः ।
सद्धर्मरत्नाकर इत्युदग्रो बुद्ध्या गुरुर्वर्जयतीव लब्ध्या ॥११

तदीयशिष्यः समयार्थपारगः पुण्यश्रियां वल्लभ इत्यतोऽभवत् ।
श्रीमानुपाध्याय ५ पुण्यवल्लभो यथार्थनामा वृषरत्नसेवधिः ॥१२

Jain Education International For Private & Personal Use Only www.jainelibrary.org

ततो बभौ वाचकमौलिरत्नं धीमान्दयाधर्मगणिर्दयालुः ।
तदन्वभूच्छ्रीशिवधर्मनामा सद्वाचनाचार्य गुणाद्भुतो वै ॥१३

इष्टौ तदीयौ हि विनेयमुख्यौ श्रीहर्षहंसाभिधरत्नधीरौ ।
वादीभवृन्दोद्धततारसिंहौ स्फुरद्गरीयो गुणरत्नगेहौ ॥१४

जिताः समुद्राः गुरुभिर्मदीयैः ज्ञानं ददद्भिस्त्रिदशैरलभ्यम् ।
यद्दीयमानं सततं मुनिभ्यः प्रवर्धते चैव करोति मुक्तिम् ॥१५

तिरस्कृता स्वप्नमणिद्रुमाद्याऽनुभाववाराः प्रकटप्रभावाः ।
प्रकाशितच्छात्रसुबुद्धिवित्ता जीयासुरिद्धा गुरुतुष्टपादाः ॥१६

श्रीमद्वाचकधुर्याऽनल्पधियां रत्नधीरसुगुरूणाम् ।
टीका मया प्रसादाद्विहिता ग्रन्थानुसारेण ॥१७

संवद्विक्रमनृपतो विधुवसुरसशशिभिरङ्किते वर्षे ।
ज्ञानप्रमोदवाचकगणिभिरियं रचिता वृत्तिः ॥१८

श्रीपातिसाहिपुङ्गवसिलेमसाहौ प्रवर्तमानेऽत्र ।
राज्ये नवकोट्टपतेः श्रीगजसिंहस्य भूपस्य ॥१९

चन्द्रार्कौ गगने यावद्यावत्पृथ्वी सभूधरा ।
वाग्भटालङ्कृतेर्वृत्तिर्जीयाज्ज्ञानप्रमोदिका ॥२०

वृद्धो मदीयशिष्यो गणिगणगुणनन्दनः सनन्दिजयः ।
गुणनन्दनगणिरलिखत् प्रथमादर्शं प्रयत्नेन ॥२१

संवत् १६८१ वर्षे श्रीमद्बृहत्खरतरगच्छे भट्टारकश्रीजिनराजसूरिविजयिराज्ये श्रीसागरचन्द्रसूरिसन्ताने पट्टानुक्रमसंजातरीहडगोत्रशृङ्गारश्रीमद्वाचनाचार्यरत्नधीरगणिप्रवरविनेयानां वाचकज्ञानप्रमोदगणिभिर्विरचिता वाग्भटालङ्कारवृत्तिः समाप्ता । श्रेयो दिशन्तु ॥

स्फुटं त्रीणि सहस्राणि श्लोकानां त्रिशतानि च ।
ग्रन्थमानमिदं ज्ञेयमत्र वृत्तौ सुनिश्चितम् ॥१

संवत् १८४३ वर्षे ज्येष्ठशुक्लप्रतिपदितिथौ रविवारे लिखितेयं वृत्तिर्वाग्भटालङ्कारस्य गुणचन्द्रर्षिणाऽस्मत्पठनहेतवे । श्रीमद्विक्रमपुरवरान्तरा ॥ श्रीरस्तु ।

पंजाबीगुरुश्री प्रेमविजयजीना शिष्य मुनिमानविजयजिहेतवे ।

Jain Education International		For Private & Personal Use Only		www.jainelibrary.org

# Appendix 1

## SOME IMPORTANT VṚTTIS ON VĀGBHAṬĀLAṄKĀRA

### (a) Ṭīkā by Siṁhadevagaṇi

The ṭīkā by Siṁhadevagaṇi is perhaps the earliest commentary on the work of Vāgbhaṭa, though the writer gives no information about himself in his commentary. The colophons do not mention anything and even at the end there is no reference to the biographical details of the commentator. The description of the ṭīkā available with the B.O.R.I. gives no details. The work of Vāgbhaṭa with the ṭīkā of Siṁhadevagaṇi is published atleast thrice. One such publication is No. 48 in the Kāvyamālā Series (1936). The work is edited by Kedāranātha Śāstrī.

